TRIVANDRUM SANSKRIT SERIES.

No. CXXIII.

Śri Citrodayamanjari,

No. XII.

SAṄGRĀMAVIJAYODAYA

EDITED BY

K. SĀMBAŚIVA ŚĀSTRĪ

Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERN
HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1936.

All Rights Reserved.]

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२३.

श्रीचित्रोदयमञ्जरी ।

ग्रन्थाङ्कः १२.

सङ्ग्रामविजयोदयः

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण

के. साम्बशिवशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महोन्नतमहामहिमश्रीचित्रावतारमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः १११२. क्रिस्ताब्दाः १९३६.

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
  श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
  मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
  श्रीमद्वाञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदाड्डिण्डिमा
  श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

PREFACE.

This work, Saṅgrāmavijayodaya, is an important treatise, connoting, as it does, a rare innovation. Though treatises, like Raṇadīpika dealing on the same theme are extant even at present, this work marks a wholesome departure from them inasmuch as it throws light on the manifold methods of practical application pertaining to Tantra, Mantra and allied sciences, conducive to the attainment of glorious victory; it also embodies many valuable truths worthy of special attention. It is not a matter of astonishment to those conversant with history that from time immemorial the Zamindars, Kings and Emperors of India resorting to राजिङीयवृत्ति were always vying with one another for the annihilation of powerful opponents. Not only in the east but also in the west, the same practice was in vogue. Scholars interested in ancient history are well aware that reciprocal conflict and hostility were prevalent not only in temporal concerns from Vedic times onwards, but also in celestial regions where the tremendous wars between the Devas and Asuras engendered by a burning zeal for the possession of paradise and of divine ambrosia are too well known. As war is thus a concomitant of nature it is to be presumed that treatises imparting instruction in magical and mystical formularies leading to victory have had their origin from prehistoric times. This is clear from the following stanzas :—

जगदेकहेतुरीशो
  जगाद जगतो हिताय सर्वज्ञः ।
शास्त्रमतिविस्तरार्थं
  युद्धस्य जयार्णवं नाम ॥

विष्णुपितामहगिरिजा-
  नन्दीन्द्रकुमारचन्द्रसूर्याद्यैः ।
गरुडोरगेन्द्रमुनिभिः
  श्रुतञ्च तच्छास्त्रमीशानात् ॥

That Saṅgrāmavijayodaya is a precious gem extracted from Yuddhajayārṇava, is evident from the following verse in Ārya metre,

युद्धजयार्णवशास्त्रा-
  दुद्धृत्य मनाक् ततो मयार्याभिः ।
क्रियते शास्त्रं सारं
  सङ्ग्रामविजयोदयं नाम ॥

In order to attain consummate perfection in the exposition of each topic dealt with in this treatise, appropriate citations have been made in it from Aindra, Brāhma, Hora and other works as is manifest from the following couplets in Ārya metre.

गुलिकं वदन्ति केचित्
समस्तसन्निवस्थमैन्द्रशास्त्रज्ञाः । Page 46, Śloka 45.

ब्राह्मीयाद्वक्ष्येऽहम्
तद्राज्ञः शत्रुविजयाय । Page 41, Śloka 1.

अथ वक्ष्ये संक्षेपात्
होराशास्त्रार्णवात्समुद्धृत्य । Page 53, Śloka 52.

Five manuscripts of the work have been obtained, marked क, ख, ग, घ, ङ respectively. Though Saṅgrāmavijayodaya in its present shape may appear to be a complete work in that it dwells at length on every topic taken for discussion it has to be noted that it is incomplete, since no colophon is found after the Kārika: —

प्रणिपत्य महादेवम्
ब्रह्मेन्द्रोपेन्द्रवन्दिताङ्घ्रियुगम् ।
जगदेकहेतुमीशम्
शशाङ्कमौलिं जायाय नरः ॥

occurring at the close of chapter 24 in the manuscript marked ग, since only 1586½ Kārikas are embodied in this work in spite of the existence of a greater number of Kārikas and Adhyāyas in the original as is evident from the words

"ब्रह्मायुःपरीक्षणं नाम द्वाविंशोऽध्यायः; अत ऊर्ध्वं मन्त्रभागः अष्टादशाध्यायाः; पिण्डेन चत्वारिंशदध्यायाः । श्लोकानां द्विसहस्रं पञ्चशताधिकं (2500) ज्योतिर्भाग एव मयापेक्षितो लिखितः ।"

recorded at the end of the manuscript marked क and since the essential discussion on the arrangement of troops in battle array is conspicuous by its absence.

Subject.

The very title of the work signifies the topics discussed in it. It is hoped that the detailed table of contents appended to each chapter would be of immense service to readers in general. This work composed as it is within the small compass of 24 chapters may be divided into 3 portions. The

first portion imparts instruction, to the aspirants for victory in war, on weal and woe, in conformity with the dogmas upheld by astrological Śāstras and based on नक्षत्र, तिथि, वार, योग, लग्न, ग्रहचार etc.

The second division contains an elucidative exposition of ways and means of acquiring prescience and presentiment as to the result of war by dint of superhuman intuition derived from concentrated adoration of particular deities. This presentiment is utilised for the safety of one's own army as well as for the destruction of antagonists, by spells, incantations and sacrifices, by the creation of internal dissensions within the enemy's camp, by the diffusion of poisonous gas, by the burning of incenses, by throwing charmed clods of earth, by mystical charms, preservatives and medicines and by benumbing and paralysing the attacking forces, all these leading to the extermination of enemies.

The third part is of great significance and utility as it deals with the manufacture of weapons of war of the type of घाताख्यक which are sure to bring about the irremediable destruction of the enemy's forces, with the prevention of arms and missiles hurled at by the enemy and with the effective treatment of wounds and bruises by the application of unguents and ointments.

Though this treatise is thus intended, in the main, for the benefit of the belligerent parties in war it is of immense service to humanity at large as it explains the diverse effects of planetary movements and prescribes valuable rules for the procurement and preservation of health.

The author and his date.

The manuscript materials so far available do not furnish any conclusive data either for ascertaining the author's identity or for determining the exact period in which he flourished. The references made in the following couplets,

आकाशव्योमाम्बर-
करगुणवर्णाः कलेर्मानम् ।   Page 12. Śloka 22.
रन्ध्रादिचन्द्रशिखिनः
शकाब्दराशौ लियोजयेत्तानि ।   Page 12. Śloka 24.

to Kaliganana method of Āryabhaṭa as well as to Śāka Era lead us to the surmise that the author belongs to a period later than that of Āryabhaṭa. It is also probable that he was a contemporary of Śrī Ravi Varma Kulaśe-

khara, the king of Quilon, who reigned during the latter half of the 13th century A. D. and who is famous by the honorific title of Saṅgrāmadhīra as is suggested by the elegance of the word Saṅgrāma occurring also in the title of this work, Saṅgrāmavijayodaya. Be that as it may, the references to Horaśāstra of Varāhamihirācārya of the 6th century A. D, already alluded to, conclusively prove that the date of the author is much later than that of Āryabhaṭa who flourished decidedly much earlier. Moreover, this assumption is still more corroborated by the language of Prākrit used for the exposition of mantras, thereby indicating a period when that language was highly popular and proving that the author's date could not have been much later than that of Hemacandra and others, the reputed authors of Kāvyas in Prākrit. The places of his birth and residence are difficult to be ascertained for want of requisite materials. It is thus by all means certain that the author belongs to a later period than the 13th century A D.

It is also known from the following lines :—

बालः कुमारो राजा च वृद्धो मृत्युरिति क्रमात् ।

(रणदीपिका) Page 18. Śloka 29,

तिथिमध्ये च षण्णाडीभुक् खगो वापरस्तथा ।

(रणदीपिका) Page 18. Śloka 30.

बालस्ततः कुमारो राजा वृद्धो मृतः सदा ज्ञेयः ।

(सङ्ग्राम) Page 18. Śloka 17.

तिथिमध्ये तिथिनाथः षण्णाडीभुक् खगः प्रपूर्वं स्यात् ।

(सङ्ग्राम) Page 18. Śloka 15.

that Raṇadīpika which deals with the subject in 8 chapters is a brief compendium of this work.

Samarāṅgaṇasūtradhāra, a valuable publication of the Baroda Series was examined as necessitated by the meaning of its title and found to have no connection with the present publication. The former work deals with the science of architecture.

The publication of this edition is based on five manuscripts :—

1. The manuscript marked क belonging to the Library of His Most Gracious Highness the Maharaja, consisting of 23 chapters and appearing to be about 400 years old.

2. That marked ख belonging to M. R. Ry., Narayanan Elayathu Avl., Vembanattillom, Ambalapuzha. It contains 24 chapters and appears to be 300 years old. It is worn out in several places.

3. That marked ग belonging to the library of Brahmasri Narayanan Namburi Avl., Vadasseri Illom, Vaikom and also appearing to be 300 years old.

4. That marked घ obtained from the library at the Manalikara Matom, Kalculam. Though complete, it is equally worn out.

5. That marked ङ belonging to Brahmasri Suran Kandan Namburi Avl., Udayamperur, Vaikom, comprising only 22 chapters and appearing to be equally old.

All these manuscripts have been of great help to me in filling up the various lacunae found in them at different places. Acknowledging with gratitude my deep indebtedness to the libraries mentioned above, I place this valuable edition before the enlightened public.

Trivandrum, 13-12-1936. K. SĀMBAŚIVA ŚĀSTRĪ.

॥ श्रीः ॥

निवेदना ।

ग्रन्थोऽयं सङ्ग्रामविजयोदयनामा किमप्यपूर्वं प्रस्थानमधिरूढः श्रद्धामर्हति । सत्स्वपि रणदीपिकादिषु तुल्यधर्मेषु बहुसारो बहुमुखानि तत्त्वानि विजयोदयपर्याप्तानि तान्त्रिकाणि मान्त्रिकाणि च वर्त्मानि प्रायोगिकीं गतिमनुरुन्धानः प्रकाशयन्नन्य एवायं मन्ये धन्यवादसमुचितः प्रथते । पुरा खलु भारतेषु सर्वतो देशाधिपतयो राज्याधिपतयो मण्डलाधिपतयश्च राजिलीयां वृत्तिमवलम्ब्योपजीव्यघस्मराः प्रतिदिनमन्येषां दूषका भीषकाश्च स्वयं भीरवो जिजीविषुरिति नेदं विस्मापकं चरितवेदिनाम् । न केवलं पौरस्त्येषु, पाश्चात्त्येषु च देशेषु काममियमेवावस्था । अतिपुरातनं चरित्रमन्विच्छतां नेदं भूमावेव, किन्तु लोकान्तरेषु च । वेदादिसमये देवासुरादिभिरन्योन्यमत्सरिभिः स्वर्गकामैरमृतलालसैश्च कलहायमानैरेव कालः क्षेपितव्य आसीदिति विस्पष्टं विदुषाम् । एवं प्रकृतिसिद्धे युद्धे तत्र जयोपायनिवेदनपरं तन्त्रमप्यनादिसिद्धं बोद्धव्यम् । तदिदमत्रोपगीयते —

"जगदेकहेतुरीशो
जगाद जगतो हिताय सर्वज्ञः ।
शास्त्रमतिविस्तरार्थं
युद्धस्य जयार्णवं नाम ॥
विष्णुपितामहगिरिजा-
नन्दीन्द्रकुमारचन्द्रसूर्याद्यैः ।
गरुडोरगेन्द्रमुनिभिः
श्रुतं च तच्छास्त्रमीशानाद् ॥"

(पृ० १.)

इति । अयं च प्रस्तुतः सङ्ग्रामविजयोदयस्तस्मादर्णवात् समुद्धृतः कौस्तुभ इति —

"युद्धजयार्णवशास्त्रा-
दुद्धृत्य मनाक् ततो मयार्याभिः ।

क्रियते शास्त्रं सारं
सङ्ग्रामजयोदयं नाम ॥"

(पृ० १.)

इति समनन्तरयार्यया बोध्यते । एवं युद्धजयार्णवशास्त्रात् सङ्गृहीतसारेऽप्यस्मिन् ग्रन्थे समपेक्षितसर्वांशपरिपूर्तये ऐन्द्र-ब्राह्मीय-होरादीनि ग्रन्थान्तराण्यवलम्बा अभवन्नित्येभिरार्याभिरवगम्यते । यथा —

"गुलिकं वदन्ति केचित्
समस्तसान्निध्यमैन्द्रशास्त्रज्ञाः ।"

(पृ० ४६. श्लो० ४५.)

"ब्राह्मीयाद् वक्ष्येऽहं
तद्द्वाराज्ञः शत्रुविजयाय ।"

(पृ० ४१. श्लो० १.)

"अथ वक्ष्ये संक्षेपात्
होराशास्त्रार्णवात् समुद्धृत्य ।"

(पृ० ५३. श्लो० ५२.)

यद्यप्येवमसौ सङ्ग्रामविजयः प्रतिपाद्ययावत्प्रमेयप्रचुरः परिपूर्णस्तथाप्युपलब्धो भागः खिल इत्यवसातव्यम् । तथाहि — क. ख. ग. घ. ङ. संज्ञितासु पञ्चसु मातृकासु ग. संज्ञितायामन्ते चतुर्विंशाध्यायपरिसमाप्तौ

"प्रणिपत्य महादेवं
ब्रह्मेन्द्रोपेन्द्रवन्दिताङ्घ्रियुगम् ।
जगदेकहेतुमीशं
शशाङ्कमौलिं जयाय नरः ॥"

इति कारिकासमनन्तरं ग्रन्थसमाप्तिवाक्यादर्शनाद् , ङ चिह्नितायामन्तिमे पत्रे "ब्राह्मायुःपरीक्षणं नाम द्वाविंशोऽध्यायः । अत ऊर्ध्वं मन्त्रभागः अष्टादशाध्यायाः । पिण्डेन चत्वारिंशदध्यायाः । श्लोकानां द्विसहस्रं पञ्चशताधिकम् (२५००) । ज्योतिर्भाग एव मयापेक्षितो लिखितः" इति कथनाद् गणनायां सत्यां मुद्रिते (१५८६½) सार्धषडशीत्युत्तरपञ्चशताधिकसहस्रकारिकाणामेवोपलम्भाद् , अवश्यनिरूपणीयव्यूहरचनादिकार्यविकलनादपि ग्रन्थोऽयं सावशेषोपलब्धः प्रतीयते ।

ग्रन्थनामधेयेनैव प्रतिपाद्यं प्रमेयमिह सामान्यतो ज्ञायते । प्रत्यध्यायं सविस्तरा साङ्गा च कापि विषयानुक्रमणी समायोजिता मन्ये ग्रहीतॄणामत्यन्तायोपयोगाय । सचश्चतुर्विंशत्यध्यायीपरिमितेऽस्मिन् मुद्रिते प्रायस्तिस्रः कक्ष्याः शक्यविभजनाः । तासु प्रथमा — षोडशाध्यायीं यावज्ज्योतिस्तन्त्रानियन्त्रितैर्नक्षत्र-तिथि-वार-योग-लग्न-ग्रहचारादिभिर्जयार्थिनः फलाफले बोधयन्ती ।

प्रमेयम् ।

द्वितीया — तत्तद्विविधदेवतोपास्तिमहिम्ना साङ्ग्रामिकाणि वस्तुतत्त्वानि पूर्वमेव विज्ञाय स्वसैन्यरक्षां परसैन्यशिक्षां च साधयितुमाभिचारिकहोमादिभिरन्तश्छिद्राद्युत्पादनेन, विषधूमिकाप्रचारणदीपविशेषादिप्रदर्शनेन, मृत्तिकाप्रक्षेपणादिना च मन्त्रयन्त्रौषधादिसामग्र्या शत्रुसैन्यव्यामोहन-स्तम्भीकरण-प्रत्युच्चाटनादीनि निरूपयन्ती ।

तृतीया — धाराल्लिप्तकादिशस्त्रनिर्मितिप्रकारकथनेन, परचक्रप्रयुक्तशस्त्रास्त्रप्रतिबन्धनसम्प्रदायेन क्षतकिणीकरणचिकित्सानिवेदनेन तदुपयुक्तसेकादिक्रियाप्रतिपादनेन दुष्परिहरप्राणापायादिदोषसाधकलेपादीनि शत्रुसंहरणचणानि विशदयन्ती च सप्रयोजना सङ्ग्रामविजयोदयाय ।

एवं सङ्ग्रामप्रवृत्तानुद्दिश्य बहून् आह्वानांशानुपदिशन्नप्ययं ग्रन्थः सामान्यतो लोकयात्रानिहितमतीनामप्यनेकान् नक्षत्रग्रहचारादिफलभागान् आरोग्यसाधनोपायभूतान् प्रयोगांश्चोदाहरन् मन्ये सर्वोपकारपर्याप्तोऽपि ।

अस्य च विशिष्टस्य ग्रन्थस्य कर्ता किमभिधेयः किंजातीयः किंदेशीयः किंसमयीय इत्यादि निष्कृष्य निरूपयितुं न कापि सामग्री प्रसन्ना ।

कर्ता जीवितसमयश्च ।

"आकाशव्योमाम्बर-
कलगुणवर्णाः कलेर्मानम् ।"

(पृ० १२. श्लो० २२.)

"रन्ध्रादिचन्द्रशिखिनः
शकाब्दराशौ नियोजयेत् तानि ।"

(पृ० १२. श्लो० २४.)

इत्यादिभिरार्यभटादिगणितप्रकारेण कलिगणना[illegible]नाद् भवेदयं ग्रन्थकारस्तदनन्तरसमयवर्तीति शक्यमूहितुम् । सङ्ग्रामविजयोदयनाम्नि सङ्ग्रामशब्दोपादानस्वारस्यात् सङ्ग्रामधीरविरुदस्य कोलम्बपुराधीश्वरस्य श्री-रविवर्मकुलशेखरस्य विरुदैकदेशसङ्ग्रामपदमनुस्मारयता ग्रन्थोऽयं तस्य समय-वर्ती क्रिस्त्वब्दीयत्रयोदशशताब्द्या उत्तरार्धजीवीत्यपि सम्भावना प्रसरति । पूर्वोक्तया दिशा होराशास्त्रस्मरणात् तत्कर्तुः श्रीवराहमिहिराचार्यात् क्रिस्त्व-ब्दीय-षष्ठशताब्द्यां लब्धजीवितादर्वाचीनस्य ततोऽपि प्राक्तनाद् आर्यभटा-चार्यादनन्तरत्वं सुतरां सिध्यति ।

किञ्च मन्त्रकथने प्रायः प्राकृतस्वीकरणात् प्राकृतभाषायाः प्रचुर-सञ्चारसमयाविर्व्यञ्जनाद् तदनुगुणतया प्राकृतभाषाकाव्यप्रवर्तकहेमचन्द्रा-दिभ्यो नात्यन्तार्वाचीनतापि मार्गान्तरेण प्रविशति । कतमदेषु साधिष्ठमिति तु प्रमाणान्तरप्राप्तिसापेक्षमिति सद्यस्तदीयाद् विचाराद् विरम्यते । सर्वथा क्रिस्तीयत्रयोदशशताब्द्या अनर्वाचीनत्वमक्षतम् ॥

न्तरादर्शः ।

[illegible]कृत्या प्रकृत्या च परिमितैरष्टाभिरध्यायैः परिपुटिताया रणदीपि-कायाः अयं सङ्ग्रहाधार इति विनिर्दिश्यमानपङ्क्तिभ्यो-ऽवगम्यते—

"बालः कुमारो राजा वृद्धो मृत्युरिति क्रमात् ।"

(रणदीपिका पृ० १८. श्लो० २९.)

"तिथिमध्ये च षण्णाडीभुक् खगो वापरस्तथा ।"

(रणदीपिका पृ० १८. श्लो० ३०.)

'बालस्ततः कुमारो राजा वृद्धो मृतः सदा ज्ञेयः ।"

(सङ्ग्राम० पृ० १८. श्लो० १७.)

"तिथिमध्ये तिथिनाथः षण्णाडीभुक् खगः प्रपूर्वं स्यात् ॥"

(सङ्ग्राम० पृ० १८. श्लो० १५.)

समराङ्गणसूत्रधारनाम्ना कश्चिद् ग्रन्थो बरोडादेशीयप्रसिद्धीकरणा-[illegible] प्रतिमान् परीक्षितः केवलं नाम्न्येव विश्राम्यति न रूप चर्च्यते । शिल्पविज्ञानीयः सः ॥

एतत्प्रसिद्धीकरणाधाराश्च पञ्च तालपत्रात्मानो मातृकाः । तासु

१. महोन्नतमहामहिमश्रीयुतास्मन्महाराजग्रन्थशालीया त्रयोविंशतितमाध्यायपर्यन्ता चतुःशतीपरिवत्सरपर्युषिता क· संज्ञा ।

२. अम्बरनदीवास्तव्य-वेम्पनाट्टिल्लं श्रीनारायणन् इळयतुस्वामिका चतुर्विंशत्याध्यायैः कृताकृतिः प्रायस्त्रिशतवर्षी जीर्णा ख. संज्ञा ।

३. व्याघ्रपुरीदेशस्थ- वटश्शेरिइल्लं नारायणन्नम्पूरिग्रन्थालयस्थिता पूर्ववत् त्रिशतवत्सरीज्येष्ठा ग. संज्ञा ।

४. कल्कुळं मणलिक्करमठीयग्रन्थशालासम्पादितासमग्रा पूर्ववज्जीर्णा घ. संज्ञा ।

५. व्याघ्रपुरीपरिसरवर्त्युदयंपेरूर्वासि-ब्रह्मश्री शूरन् कण्टन् नम्पूरिस्वामिका द्वाविंशत्यध्यायीमात्रा पूर्ववत् पर्युषिता ङ. संज्ञा च ।

आभिरन्योन्यखिलपूरणपर्याप्ताभिरनेकशास्त्रीयार्थविचिन्तनसमुत्तेजिताभिर्यावत्सम्भवमनेन रूपेण प्रसिद्धीकृत्य प्रतिपाद्यगौरवादमुं विजयोदयं महाजनसमक्षमवतारयन्नस्मि धन्यधन्यः ॥

अनन्तशयनम्, १५-४-११२.

के. साम्बशिवशास्त्री.

विषयानुक्रमणिका ।

विषयः.	पृष्ठम्.
प्रथमोऽध्यायः ।	
मङ्गलाचरणम्	१
प्रस्तुतग्रन्थस्याकरः	,,
तदुपदेष्टा	,,
तच्छ्रोतारः	,,
ग्रन्थारम्भप्रतिज्ञा	,,
ताराधिष्ठिता दिशः	,,
पूर्वाद्या राशयः	२
राशीनां विभागः	,,
क्षेत्रांशनायकाः	,,
द्रेक्काणाधिपाः	,,
कालहोरेशाः	,,
अयुग्मराशिभोक्तारः	,,
युग्मराशिभोक्तारः	,,
उभयेषां राशिभोगव्यवस्था	,,
सुहृदो ग्रहाः	,,
ग्रहाणामुच्चनीचभावः	,,
सूर्यादीनां किरणसङ्ख्या	३
पृष्ठोदया मूर्धोदया उभयोदयाश्च राशयः	,,
मेषादिद्वादशराशीनां प्रदेशाः	,,
द्वादश होराभेदाः	,,
भावानां संज्ञाभेदाः	,,
राशीनामूर्ध्वमुखत्वाद्यवस्थाविशेषाः	,,
मेषादीनां किरणसङ्ख्या	४
राशीनां वर्णाः	,,
नृराशयः	,,

विषयः

पशुराशयः
सरीसृपराशयः
खगराशयः
जलयोनिराशयः
पौरराशयः
ग्राम्यराशयः
वनेचरराशयः
मेषादिक्रमेण कल्पिताः शरीरावयवाः
राशीनामाकृतयः
निशि बलिनो राशयः
दिवा बलिनो राशयः

अथ द्वितीयोऽध्यायः ।

प्राच्यादीनां पतयो ग्रहाः
कालपुरुषस्यात्मादित्वेन सूर्यादीनां प्रकल्पनम्
सूर्यादिग्रहाणां वर्णाः
स्त्रीपुंनपुंसकरूपा ग्रहाः
क्रूराः सौम्याश्च ग्रहाः
विहगग्रहौ
द्विपदग्रहौ
कीटग्रहः
चतुष्पदग्रहौ
जामित्रादिस्थानभेदेन ग्रहाणां समविषमादिदृष्टिभेदाः
ग्रहाणां सन्निवेशः
पृथिव्यादीनां पतयः
सूर्यादीनां गृहभेदाः
सूर्यादीनां भूमिवनादीनि स्थानानि
दिवा रात्रौ च यथायथं बलवन्तो ग्रहाः

पृष्ठम्.

ग्रहेष्वापेक्षिकस्य बलाधिक्यस्य प्रदर्शनम्	७
शिशिराद्यृतुनायकाः	,,
ग्रामचरौ ग्रहौ	,,
अरण्यचरा ग्रहाः	,,
जलचारिणौ ग्रहौ	,,
सात्त्विकादयो ग्रहाः	,,
सूर्यादीनां राजादित्वम्	,,
भौमादीनां मूर्धादिस्थानानि	,,
सूर्यादित्वेन रूपितानां पुरुषाणां वर्णाकृतिगुणादयः	८
ग्रहाणां शुभाशुभफलसूचकाः स्थानभेदाः	९
तत्तत्स्थानेषु स्थितैः सूर्यादिभिः सूच्यमानानि फलानि	,,
राशावेकस्मिन् ग्रहाणां भुक्तिकालः	,,
तत्तद्ग्रहचारः पूर्वजन्मकृतं शुभाशुभमवश्यं व्यञ्जयतीति स्थापनम्	१०

अथ तृतीयोऽध्यायः।

निमेषादयः कालावयवास्तन्मानं च	,,
अयनभेदेन दिनस्य वृद्धिक्षयौ	११
उत्तरायणे दिनमानम्	,,
दक्षिणायने ,,	,,
उभयानुरोधि ,,	,,
मुहूर्तवासरादीनां मानम्	,,
घटीपात्रविधानम्	,,
कृतादियुगानां तत्सन्धीनां च मानम्	१२
कल्पस्य ब्रह्मणो दिनस्य च मानम्	१३
तत्राचार्यमतम्	,,
ब्रह्मादीनामायुर्मानम्	,,
मेषादिराशिस्फुटीकरणम्	,,
राश्युदयादिज्ञानोपायः	१४

विषयः.	पृष्ठम्.
तत्र छायामानम्	१४
क्रूराः सौम्याश्च मुहूर्तान्तरकालेन	१५
उदयादिभेदेन राशीनां चतुष्प्रकारत्वम्	१६
तेषां मानम्	,,
उदयादिराशौ स्थिता ग्रहाः	,,

अथ चतुर्थोऽध्यायः ।

पञ्चस्वराः, तदधिपतयः, तद्भुक्तिकालश्च	१७
पञ्चपक्षिणां भुक्तिनिबन्धना अवस्थाभेदाः	१८
तत्र जयार्थिनैष्टव्यः कालः	,,
पञ्चपक्षिणां कालदेशभेदाद् बलाबलत्वविवेचनम्	१९
तिथिवारनक्षत्रयोगविशेषैः पञ्चस्वराणामुत्पन्ना अवस्था.	२०
पञ्चस्वरोदयस्थानभूता देहावयवाः	,,
देहे पञ्चभूतानामुदयस्थानानि	२१
वामनासापुटे वायुरूपेण चरन्तः पृथिव्याद्यात्मकाश्चत्वारो ग्रहाः	,,
दक्षिणपुटे चरन्तस्तादृशा ग्रहाः	,,
तैः प्रदर्श्यमानः कालः	,,
ह्रस्वदीर्घत्वविधया स्वराणां स्त्रीपुंरूपव्यक्तिभेदकल्पनम्	,,
तिथिवारयोगविशेषेण क्रूरत्वमापन्ना नव ताराः	,,
नाम्नामादिमध्यावसानेषु ह्रस्वदीर्घस्वरसत्तया तद्वतः पुरुषस्य जयापजयनिर्णयः	,,
पञ्चस्वरभुक्त्या स्थानादीनामन्येषामपि फलानां परिज्ञानम्	२२

अथ पञ्चमोऽध्यायः ।

कादिहान्तेषु वर्णेषु शुक्लकृष्णरूपपक्षद्वयप्रकल्पनम्	,,
तत्र तिथीनां भुक्तिकालः	२३
तत्र कुतिथिसन्धिष्वमायाश्चारः	,,
गुरुलघुकलाभिर्यथाक्रमं शुक्लकृष्णपक्षयोः प्रवर्तनं तत्फलं च	,,

विषयः.	पृष्ठम्.
सौम्याः क्रूराश्च तिथयः	२३
रेचकपूरकहेतोः शुक्ले कृष्णे च पक्षे सूर्याचन्द्रमसोः परस्परकलापानम्	,,
पूरकरेचकयोश्चन्द्रसूर्यसम्बन्धि कृत्यम्	,,
देहे शुभाशुभोद्दीपकस्तिथीनां चारः	,,
वारविशेषयोगेन दुष्यास्तिथयः	,,
मासभेदेन दग्धास्तिथयः	२४
ब्रह्माद्यास्तिथिपतयः	,,

अथ षष्ठोऽध्यायः ।

पञ्चस्वरनामाक्षरतारादिभिः शतकोष्ठं चक्रं विलिख्य ततः शुभाशुभपरीक्षणम्	२४,२५
वैनाशिकं नक्षत्रम्	२६
अश्विन्यादिनक्षत्राणामधिपतयः	,,
देवासुरमनुष्यांशास्ताराः	,,
तासु परस्परं योगार्हास्तदनर्हाश्च	,,
ताराणां योनयः	,,
योन्यादिभिस्तासां परस्परबलाबलत्वचिन्तनम्	२७
द्वादश कुलताराः	,,
अकुलाः कुलाकुलाश्च ताराः	,,

अथ सप्तमोऽध्यायः ।

दिव्ययोगाः	२८
सिद्धयोगाः	,,
उक्तकुलादिनक्षत्रैश्चन्द्रस्य योगे फलम्	,,
संहारयोगाः	२९
क्षतयोगाः	,,
नाशयोगाः	,,
मृत्युयोगाः	,,

विषयः.	पृष्ठम्.
यमखण्डयोगः	२९
चिकित्सितादिक्रियारम्भाणां विहितः कालः	३०
विषयोगः	,,
वाप्यादीनां शुचीकरणे विहितः कालः	,,
युद्धारम्भे विहितः कालः	,,
वरयोगः	,,
नागकरणयोगः	३१
अथाष्टमोऽध्यायः ।	
अष्टवर्गभवं पक्षिचक्रम्	,,
तत्राष्टवर्गेशाः पक्षिणः	,,
तेषां स्थानानि	,,
तत्संयुक्ता ग्रहाः	,,
मासभेदेन पक्षिणां बलाबलत्वम्	,,
अहोरात्रनिबन्धनं बलाबलत्वम्	३२
तिथिभेदनिबन्धनं बलाबलत्वम्	,,
पक्षिणां भुक्तिकालः	,,
अथामरचक्रम्	,,
तत्राष्टवर्गो वर्णस्तत्लाभाश्च	३३
तेषां बलाबलत्वचिन्तनम्	,,
अथ वर्णचक्रम्	,,
तत्रस्था वर्णास्तेषां बलौपयिकं देशादि च	,,
अथ यायिस्थायिबलाबलसन्दीपनं चक्रम्	,,
तत्राष्टवर्गो वर्णस्तत्पतयश्च	,,
तेषां बलाबलत्वविवेचनम्	३४
अथ वर्गाष्टकसंयुक्तं चक्रान्तरम	,,
तत्रस्था वर्णादयः	३५
जैजयपराजयेक्षणप्रकारः	

विषयः.	पृष्ठम्.
अष्टायबलप्रदर्शनम्	३५
तत्राष्टायवर्णादयः	"
तद्बलाबलत्वचिन्तनद्वारा युद्धे जयपराजयनिर्णयः	"
अथ नवमोऽध्यायः ।	
अथ सूर्यचारपरिज्ञानोपयोगि सप्तशलाकाचक्रम्	३६
तेन जयपराजयपरीक्षणप्रकारः	३७
अथ चतुष्कुम्भोपलक्षितं द्वादशराशिसमेतं चक्रान्तरम्	"
ततो ज्ञातव्याः फलविशेषाः	"
अह्नि रात्रौ च परिहरणीया रवेर्दृष्टिगोचरा दिग्भागाः	३८
अथ रविचक्रम्	"
तदनुरोधेन जयापजयपरीक्षणम्	३९
प्रकारान्तरेण रविचक्रं ततः फलचिन्तनं च	"
अथ सङ्क्रान्तिचक्रम्	"
तेन शुभाशुभवीक्षणम्	४०
अथ दशमोऽध्यायः ।	
अथ चन्द्रचारादिना जयाजयपरीक्षणप्रकारः	४१
तत्र चन्द्रशूलम्	"
ततः शुभाशुभवीक्षणम्	४२, ४३
अथ ताराचक्रं, ततो जयमरणाद्यवेक्षणं च	४४
अथ शनिचारः	"
गुलिकस्वरूपम्	४५
गुलिकभुक्तिकालः	४६
विषमगुलिकभुक्तिकालः	"
गुलिकोदयस्थानादि	४७
अथैकादशोऽध्यायः ।	
अथ राहुचारेण शुभाशुभवक्षिणम्	४८
तत्राष्टविधो राहुः	"

विषयः	पृष्ठम्
अत्र संवत्सरराहुः	४८
मासराहुः	४९
तिथिराहुः	,,
प्रहरराहुः	,,
पक्षराहुः	५०
घटिकाराहुः	,,
ऋक्षराहुः	५१
ताराराहुः	५२
फणिराहुः	,,
अथ सन्तानचक्रम्	५३, ५४
अथ द्वादशोऽध्यायः ।	
अथ विष्टिचक्रम्	५५
तत्र विष्टेः स्वरूपम्	,,
अष्टविधा विष्टिः	,,
तस्याः स्थानानि मुक्तिकालश्च	,,
विषापहरणादिक्रियारम्भोचिता विष्टयः	५६
नित्यविष्टिचारः	,,
अथैकाशीतिपदान्वितं कालचक्रम्	५६, ५७
शतपदचक्रम्	५८
ताराचक्रम्	५९
शस्त्रघातप्रबोधकं नरचक्रम्	६०
कूर्मचक्रम्	६१
द्वादशकोष्ठचक्रम्	६२
जयापजयसन्दीपनमायचक्रम्	,,
मात्राभेदचक्रम्	६३
सेवाचक्रम्	६४
सेवाचक्रान्तरम्	,,

विषयः.	पृष्ठम्.
अथ त्रयोदशोऽध्यायः ।	
अथ ताराप्रवेशनिगमचक्रम्	६५
उडुरिक्तपूर्णचक्रम्	६६
तारामयं गरुडचक्रम्	,,
ग्रहपीडाचक्रम्	,,
राहुचक्रम्	६७
अन्धादयश्चतुर्विधास्ताराः	,,
तासां प्रपञ्चनम्	६८
नाडीचक्रम्	,,
त्रिकण्टकचक्रम्	६९
चतुष्कण्टकचक्रम्	,,
अंशकचक्रम्	,,
अष्टोत्तरशतवर्णनक्षत्रगणचक्रादिः	७०, ७१
चन्द्रगतिचक्रादिः	७२–७४
जयानुकूला नक्षत्रग्रहहोरादयः	७५–७७
अथ चतुर्दशोऽध्यायः ।	
अथ योगिन्युदयबलम्	७७
अष्टयोगिनीनां नामानि	७८
तासां वर्णाः सञ्चरणस्थानानि च	,,
योगिनीनामुदयक्रमः	,,
तासां दृष्टिगोचरा दिशो भुक्तिकालश्च	७९, ८०
अथ पञ्चदशोऽध्यायः ।	
अथ विजिगीष्वादित्वेन कल्पितानां ग्रहाणां बलाबलचिन्तनम्	८१
तत्र तथाविधानां ग्रहाणां नामनिर्देशादिः	,,
सन्धिविग्रहादिप्रयोजका राशिग्रहयोगाः	८२, ८३

विषयः.	पृष्ठम्.
अत्र संवत्सरराहुः	४८
माससराहुः	४९
तिथिराहुः	,,
प्रहरराहुः	,,
पक्षराहुः	५०
घटिकाराहुः	,,
ऋक्षराहुः	५१
ताराराहुः	५२
फणिराहुः	,,
अथ सन्तानचक्रम्	५३, ५४

अथ द्वादशोऽध्यायः ।

अथ विष्टिचक्रम्	५५
तत्र विष्टेः स्वरूपम्	,,
अष्टविधा विष्टिः	,,
तस्याः स्थानानि भुक्तिकालश्च	,,
विषापहरणादिक्रियारम्भोचिता विष्टयः	५६
नित्यविष्टिचारः	,,
अथैकाशीतिपदान्वितं कालचक्रम्	५६, ५७
शतपदचक्रम्	५८
ताराचक्रम्	५९
शस्त्रघातप्रबोधकं नरचक्रम्	६०
कूर्मचक्रम्	६१
द्वादशकोष्ठचक्रम्	६२
जयापजयसन्दीपनमायचक्रम्	,,
मात्राभेदचक्रम्	६३
सेवाचक्रम्	६४
सेवाचक्रान्तरम्	,,

विषयः.	पृष्ठम्.
अथ त्रयोदशोऽध्यायः ।	
अथ ताराप्रवेशनिगमचक्रम्	६५
उडुरिक्तपूर्णचक्रम्	६६
तारामयं गरुडचक्रम्	,,
ग्रहपीडाचक्रम्	,,
राहुचक्रम्	६७
अन्धादयश्चतुर्विधास्ताराः	,,
तासां प्रपञ्चनम्	६८
नाडीचक्रम्	,,
त्रिकण्टकचक्रम्	६९
चतुष्कण्टकचक्रम्	,,
अंशकचक्रम्	,,
अष्टोत्तरशतवर्णनक्षत्रगणचक्रादिः	७०, ७१
चन्द्रगतिचक्रादिः	७२–७४
जयानुकूला नक्षत्रग्रहहोरादयः	७५–७७
अथ चतुर्दशोऽध्यायः ।	
अथ योगिन्युदयबलम्	७७
अष्टयोगिनीनां नामानि	७८
तासां वर्णः सञ्चरणस्थानानि च	,,
योगिनीनामुदयक्रमः	,,
तासां दृष्टिगोचरा दिशो भुक्तिकालश्च	७९, ८०
अथ पञ्चदशोऽध्यायः ।	
अथ विजिगीष्वादित्वेन कल्पितानां ग्रहाणां बलाबलचिन्तनम्	८१
तत्र तथाविधानां ग्रहाणां नामनिर्देशादिः	,,
सन्धिविग्रहादिप्रयोजका राशिग्रहयोगाः	८२, ८३

विषयः.	पृष्ठम्.
अथात्मचारः	८४
उच्चाटनादिष्वभ्यर्हितश्चारः	,,
प्राणरूपस्यात्मनस्तत्तच्छक्तिनियोगाद् इडापिङ्गलादि-नाड्याश्रयणे समुत्पद्यमाना वृत्तिविशेषाः	८५
त एव बाह्यगगनदेशेऽपि द्रष्टव्या इति निगमनम्	८६
चतुर्विंशतिकालहोराणां प्रपञ्चनम्	,,
ताभिर्ज्ञातव्या विषयाः	८७
कालहोराणामधिपाः	,,
तेषां भुक्तिकालादिकम्	,,
कालहोराभिर्नष्टद्रव्यचोरादीनां निर्णयप्रकारः	,,
देहे बाह्ये चाहर्दिवमुदयमानानां कालहोराणां भुक्ति-कालः	८८
शरीरे वामदक्षिणभागयोश्चरन्तीषु कालहोरास्वारोपिता ग्रहाः	,,
होरास्ताः समाश्रित्य वहद्भिः श्वासैरायुःपरीक्षणम्	८८-९०
मरणकारका योगविशेषाः	९१
तेषामपवादाः	९२
विविधा आयुःपरीक्षणोपायाः	९३—१००

अथ षोडशोऽध्यायः ।

अथ पौष्णे कालचक्रे आन्तरमपमृत्युचिह्नप्रतिबोधनम्	१०१-१०४
बाह्यं तत्प्रतिबोधनम्	१०५,१०६

अथ सप्तदशोऽध्यायः ।

प्रकारान्तरेण कालकृतमृत्युचिह्नप्रबोधनम्	१०७,१०८
अथ कालवञ्चनम्	१०९
तत्र मृत्युहृद् यन्त्रं, तत्पूजादि च	,,
मृत्युञ्जयमन्त्रयन्त्रयोः प्रयोगविशेषाः	११०
मृत्युञ्जयसाधकाः श्वासनिरोधतत्स्थान-भेदामृतस्रावादयः	१११,११२

विषयः. पृष्ठम्.

अथाष्टादशोऽध्यायः ।

विषयः	पृष्ठम्
अक्षरसङ्ख्याप्रयुक्ता मन्त्राणां संज्ञाभेदाः	११३
तेषां विनियोगः	११४
पुनश्च पल्लवादिसंज्ञितानां मन्त्राणां स्वरूपप्रपञ्चनं विनियोगश्च	,,
हुङ्कारफट्कारादीनां विनियोगः	११५
वश्यादिमन्त्राणां प्रयोगकालः	११६
पुनश्च मन्त्राणां द्वैविध्यं, तद्विवरणं च	,,
मन्त्रस्वरूपविभागः	,,
पिण्डबीजादीनां प्रपञ्चनम्	११७
उच्चाटनादिक्रियाणां स्थानद्रव्यादिकम्	,,
स्तम्भनादिकरणे लग्नम्	११८
मन्त्राणामुच्चारणभेदाः	,,
विषापहरं यन्त्रम्	११९
परशक्तिनाशनं ,,	,,
भूतादिभ्यः सङ्कटे जप्तव्यो मन्त्रः	,,
सर्वरक्षाकरं यन्त्रम्	१२०
मृत्युञ्जययन्त्रम्	,,
वह्निस्तम्भनं यन्त्रम्	,,
गजतुरगादिस्तम्भकृद् ,,	१२१
वागादिस्तम्भनं ,,	१२२
क्रोधस्तम्भकारि ,,	,,
परसेनास्तम्भनं ,,	१२३
रिपुस्तम्भनं ,,	१२४
कर्णमोटीमन्त्रः	१२५
परसैन्यभक्षकं यन्त्रम्	,,
तादृशं यन्त्रान्तरम्	१२६
समस्तदेशभ्रामकं यन्त्रम्	,,
सर्वायुधवारणः पट्टः	,,

विषयः.	पृष्ठम्.
उरुवीराख्यः पट्टः	१२६
शत्रुपलायनकृत् ,,	१२७
परसैन्यहरं स्वसैन्यसंरक्षणं च यन्त्रम्	१२८
शत्रुभयकारी शब्दभङ्गमन्त्रः	१२९
तादृशास्तिलकयोगः	,,
परचक्रस्तम्भनादिकृत् प्रयोगः	,,
भूतपिशाचाद्युच्चाटनो मन्त्रः ध्यानं च	१३०

अथैकोनविंशोऽध्यायः ।

परचक्रे व्याधिजनको होमः	१३१
त्रैलोक्यविमर्दनाख्यं चक्रम्	,,
शत्रूणां सद्योमृत्युप्रदा विद्या	१३२
शत्रुमारकं विभ्रमचक्रादि	१३३
शस्त्रवारणमभेद्यकवचं नाम चक्रम्	,,
मृत्युहरः प्रयोगः	१३४
देवासुरसङ्ग्रामे निर्मिता प्रत्यङ्गिरा नाम विद्या	१३५-१३७
तस्याः प्रयोगः	१३८-१४१
सम्पद्वर्धनी वसुधारा नाम विद्या	१४१,१४२
सर्वदोषप्रशमनी वादादिषु जयप्रदा च असिवेताली नाम विद्या	१४३
तत्तन्मन्त्रः स्वस्य परिग्रहणयोग्यो न वेति परीक्षा	१४४
विजयसाधकं सूत्रधारणम्	१४५
तादृशो वेणीबन्धः	१४६
लिखितमात्रेण शत्रुवृन्दस्तम्भनकरं यन्त्रम्	१४७
जिह्वावाक्स्तम्भनप्रयोगः	,,
स्त्रीवश्यादिकृन्मन्त्रः	१४८
पाषाणस्तम्भनविद्या	,,
शत्रूणां दाहस्फोटमलापोच्चाटनकारी मन्त्रः	१४९

विषयः.	पृष्ठम्.
तेन होमः	१५०
देवताभिरप्यमेघत्वप्रापकं यन्त्रम्	,,
स्तम्भनमोहननिग्रहादिकृत् शक्तिमन्त्रः	१५१
मरीचामन्त्रस्तत्प्रयोगाश्च	१५२,१५३

अथ विंशोऽध्यायः ।

शत्रूणां बाधिर्यान्ध्यादिजनको व्याघ्रादिदुष्टमृगाणां मुखबन्धनश्च फेलाख्यो मन्त्रः	१५३
तेन शत्रुमुखस्तम्भनम्	१५५
दुष्टवशीकरणम्	,,
सम्मोहनम्	१५६
सर्ववशीकरणहोमः	,,
चतुष्पथमृत्क्षेपे सर्वमुखस्तम्भनकृन्मन्त्रः	१५७
भस्मक्षेपे शत्रुचतुर्दिक्षु स्तम्भनकृन्मन्त्रः	,,
वाक्क्रोधगर्भयात्राशकटादियन्त्रस्तम्भनकृन्मन्त्रः प्रयोगश्च	१५८
निगलकवाटस्फोटनमन्त्रः	,,
स्वप्ने देव्या भाषणमन्त्रः	,,
घटस्तोभकृन्मन्त्रः	,,
स्वप्नवाराह्याः सकलीकरणम्	१५९
तन्मन्त्रप्रयोगः	,,
स्वप्नवाराहीध्यानम्	,,
स्त्रीनृपादीनां वश्यप्रयोगः	१६०

अथैकविंशोऽध्यायः ।

कर्णपिशाचीमन्त्रविधानम्	,,
अङ्गुष्ठदीपदर्पणादिषु मातङ्ग्या त्रिकालवार्ताकथनम्	१६१
स्वप्ने शुभाशुभज्ञानाय जप्तव्यो मातङ्गीमन्त्रः	,,
स्वप्नमाणवकाख्यो मन्त्रः	,,
दिगबन्धनमन्त्रः	१६२

विषयः.	पृष्ठम्.
दीपे अष्टवर्षकन्याकर्णे च त्रिकालवार्ताकथनाय प्रसाध्यो मन्त्रप्रयोगः	१६२
जप्तभक्तपिण्डदानेन स्त्रिया आकर्षणमन्त्रः	१६३
शङ्कयुद्धमन्त्रविधानम्	,,
समस्तभोगप्रदयक्षिणीमन्त्रविधानम्	१६४
यक्षिण्यागमनाय कर्तव्यः प्रयोगः	,,
यक्षिण्या रतिप्रदानसाधकः ,,	१६५
रात्रावुद्दिष्टप्रमदाकर्षकः ,,	,,
उद्दिष्टस्त्रियाः पुरतः सद्यो योनिरसाशयक्षरणकारी प्रयोगः	१६६
ब्रह्मदुहितुर्यक्षिण्याः कल्पः	,,
तस्या मन्त्रसिद्ध्या साध्यानि फलानि	१६७
अस्त्रस्तम्भनशस्त्रवारणादिषूपयोज्याः सिद्धौषधयः	१६८,१६९
तासां समुद्धारविधिरुपयोगप्रकारश्च	१७०-१७८

अथ द्वाविंशोऽध्यायः ।

अथ शस्त्राणां धारालिप्तकम्	१७९
क्षते तीव्रकृमिसङ्घातजनको लेपः	,,
मृत्युकारी ,,	,,
प्रलापादिकृत् ,,	,,
स्फोटकरो ,,	,,
क्षते सद्यः कीटजालोत्पादको ,	,,
विषवच्छीघ्रमृत्युकारी ,,	१८०
अथ क्षतवेगदोषशमनमौषधम्	,,
अथायुधपरिषेकः	,,
तत्र विहितो वारः	,,
आयुधनिर्मितावुत्तमसमयः	,,
आयुधतीक्ष्णीकरणाय कर्तव्याः परिषेकाः	,,
पानमात्रेण शस्त्रजालैरवध्यत्वप्रापकमौषधम्	१८१
देहस्य वज्रवत् कठिनत्वसम्पादकमुद्वर्तनम्	,,
यावज्जरणमस्त्रशस्त्रैरभेद्यत्वसाधकमौषधम्	१८२

विषयः.	पृष्ठम्.
वक्त्रे शिरसि वा धारणेन सर्वास्त्रशस्त्रवारणमौषधम्	१८२
तादृशी गुलिका	,,
आयुधैरनपायित्वसाधकः पञ्चविधो योगाभ्यासः	१८३
तत्र वज्रीकरणम्	,,
क्षुरिकाकरणम्	,,
सङ्कोचः	,,
सम्पुटकम्	,,
घण्टिकाग्रम्	,,
वक्त्रमध्यस्थितवर्गान्तिमवर्णैरायुधवारणम्	,,
धारणाविशेषैः शस्त्रवारणम्	१८४
वारुणास्त्रस्तम्भनम्	,,
आग्नेयास्त्रस्तम्भनम्	,,
वायव्यास्त्रस्तम्भनम्	,,
सर्वायुधवारणं योगान्तरम्	,,
पार्थिवशस्त्राणि	,,
वारुणास्त्राणि	,,
आग्नेयास्त्राणि	,,
वायव्यास्त्राणि	,,
उग्रास्त्राणि	,,
उग्रास्त्रप्रतीघातः	१८५
उक्तं सर्वमिदमस्त्रशस्त्रवारणकरणं गुरुवचनादेव कर्तव्य-मित्युपदेशः	,,

अथ त्रयोविंशोऽध्यायः ।

अथ शत्रुसम्मोहनकृद् धूपादिकम्	,,
तत्र सुप्तिदो धूपः	,
सम्मोहकृद् ,,	,
रात्रावन्धत्वकारी दीपः	१८६
सम्मोहकृद् भक्ष्यं भोज्यं च	,,

विषयः.	पृष्ठम्.
प्रज्ञापहरणमौषधम्	१८६
भ्रमोत्पादको दीपः	,,
लङ्घनेन भ्रमजनकं सूत्रम्	,,
अन्तर्धानकारकश्चूर्णयोगः	,,
तादृशः कज्जलयोगः	१८७
जयापजयज्ञानसाधको मन्त्रः	१८७, १८८
कडोरक-प्रसेनादिमन्त्रसाधनेन दीपादिभ्यः शुभाशुभविज्ञानम्	१८९–१९१
स्वप्नदेवमन्त्रसिद्ध्या शत्रुमित्रस्थानदेशादीनां परिज्ञानम्	१९२
त्रैलोक्यवार्तालाभप्रयोजकः पिशाचिकामन्त्रः	१९३
षण्मासात् स्वर्णचयस्य निधेश्च प्रापको मन्त्रः	,,
पापविध्वंसनशैवमन्त्रोद्धारः	,,
असुरवधाय त्रिपुरारिणा सृष्टो हनूमत्पटः	१९४
परसैन्यस्तम्भनकरो रूपावतारमन्त्रः	१९५
दुर्भिक्षशत्रुभयादिहल्लोहादिद्रव्यमयो हनूमत्पट्टः	१९६

अथ चतुर्विंशोऽध्यायः ।

सद्यः शत्रुसैन्यस्तम्भनकृद् रासमन्त्रः	१९७
सीमान्ते द्विषत्प्रवेशनिरोधकं लेखाकरणम्	१९८
समस्तरौद्रास्त्रस्तम्भनकृन्मन्त्रः	,,
वामबाहौ धारणेन सर्वायुधवारणं सूत्रम्	,,
परसैन्यविनाशकचामुण्डायन्त्रविधानम्	१९९–२०१
रिपूच्चाटनकृद् भस्म	२०२
शत्रुपराङ्मुखीकरणपटविधिः	,,
शब्दश्रवणे द्विषद्भीतिजनकं तूर्यसंस्करणम्	२०३
दशाहाद् रिपूणां महाज्वरस्फोटमसूरिकादिमहाव्याधिजनकस्य हनूमन्मूलमन्त्रस्य विधानम्	,,
सर्वविधजयसाधकं रणपिच्छकविधानम्	२०४, २०५

॥ श्रीः ॥

सङ्ग्रामविजयोदयः ।

प्रथमोऽध्यायः ।

जयति जगदेकहेतुः शशाङ्कमौलि[1]स्त्रिलोचनः शर्वः ।
सकलसुरासुरवन्दितचरणयुगः शङ्करः सकलः[2] ॥ १ ॥

श्रियमादधातु भवतां[3]मुमापतिस्त्रिगुणमूर्तिरव्यक्तः ।
श्रीमाननन्तशक्तिस्त्रिलोकनाथस्त्रयीरूपः ॥ २ ॥

क्षितिजलपवनहुताशनयजमानाका[5]शसूर्यसोममयम् ।
[6]विभुमजमीशमनन्तं नमामि विश्वेश्वरं विश्वम् ॥ ३ ॥

जगदेकहेतुरीशो जगाद जगतो हिताय सर्वज्ञः ।
शास्त्रमतिविस्तरार्थं युद्धस्य जयार्णवं नाम ॥ ४ ॥

विष्णुपितामहगिरिजानन्दीन्द्रकुमारचन्द्रसूर्याद्यैः ।
गरुडोरगेन्द्रमुनिभिः श्रुतं च तच्छास्त्रमीशानात् ॥ ५ ॥

युद्धजयार्णवशास्त्रादुद्धृत्य मनाक् ततो मयार्याभिः ।
क्रियते शास्त्रं सारं सङ्ग्रामजयोदयं नाम ॥ ६ ॥

प्राचीदक्षिणपश्चिमसौम्याशाधिष्ठिताः पृथिव्यां च ।
अष्टाविंशतितारा: साक्षादनलादियाम्यान्ताः ॥ ७ ॥

---

१. 'लिः समस्तगः श' ख. पाठः. २. 'लः ॥ क्षिति' क. पाठः. 'तामायुगमीशास्त्रि', ४. 'जः ।' ख. पाठः. ५. 'शसोमसूर्यम' . ग. पाठः. ६. 'प्र' ग. पाठः.

G. P. T. 2810. 500. 22-6-1106.

अजवृषयमकर्कटकाः सिंहः कन्या तुलालिचापमृगाः ।
घटमीनौ द्वौ द्वादश पूर्वाद्या राशयो ज्ञेयाः ॥ ८ ॥

तेऽपि द्विविधा ज्ञेयाः पुरुषस्त्रीसंज्ञिताः क्रमेणैव ।
तेऽपि चरस्थिरमिश्राः प्राच्यादीशानपर्यन्ताः ॥ ९ ॥

भौमसितसौम्यशशिरविसौम्यसितोर्वीजसूरिसूर्यसुताः ।
सशनैश्चरशक्रास्ताः क्षेत्रांशकनायकाः प्रोक्ताः ॥ १० ॥

भूमिसुतभानुसुरगुरुमन्दसितज्ञासुरास्तमन्दबुधाः ।
शीतकरभौमगुरवो द्रेक्काणस्वामिनो ज्ञेयाः ॥ ११ ॥

भास्करभृगुबुधशशिनः शनिगुरुरक्ताश्च कालहोरेशाः ।
वाराद्यधिपः पूर्वं ह्युदेति तत्षष्ठपः क्रमशः ॥ १२ ॥

क्षितिजशनैश्चरसुरगुरुसौम्यासुरमन्त्रिणश्च विषमभुजः ।
भूतेषुनागपर्वतशरादिनसङ्ख्याप्रभोक्तारः ॥ १३ ॥

भार्गवबुधेन्द्रगुरवो मन्दारौ युग्मराशिभागेशाः ।
बाणकुलाद्रिद्विपशरभूतैक्रमभागिनो ज्ञेयाः ॥ १४ ॥

ओजे राशौ प्रथमं पक्षं भुङ्क्ते दिवाकरः सततम् ।
चन्द्रस्तदर्धभोगी युग्मे राशौ शशी पूर्वम् ॥ १५ ॥

आचार्यौ गुरुसौम्यौ बुधशुक्रौ व्युष्णदा विभूजाः स्युः ।
वीन्द्वर्का वीन्दुकु(जाः ? ज)प्रभाकरास्ते क्रमात् सुहृदः ॥

मेषवृषमकरकन्या उच्चाः क्रमशः कुलीरमीनतुलाः ।
आदित्यचन्द्रकुजबुधसुरगुरुशुक्रार्कतनयानाम् ॥ १७ ॥

---

१. 'सितबु' ख. पाठः. २. 'ताः क्रमेण विज्ञे' ग. पाठः.

नीचास्तुलालिकर्कटमीनाम्बुचराङ्गनाः समेषाः स्युः ।
एते क्रमेण साक्षादादित्यादिग्रहान्तानाम् ॥ १८ ॥

दिग्दहनाष्टाविंशतितिथिशरनक्षत्रविंशतिश्चैव ।
अत्युच्चैरतिनीचैरादित्यादिग्रहान्तानाम् ॥ १९ ॥

शरमूर्च्छाचलधर्माः सदिक्कलावेदबाणयुगलाश्च ।
किरणाः केत्वन्तानां सूर्यादीनां क्रमेणोक्ताः ॥ २० ॥

अजवृषकुलीरकार्मुकनक्राः पृष्ठोदयाः समाख्याताः ।
उभयोदयो[१] द्विमीनः शेषा मूर्धोदयाः सर्वे ॥ २१ ॥

वनभूपुराम्बुगिरि[२]नदपुरापगोद्याननिम्नजलगर्भाः ।
मेषादीनां द्वादशराशीनां च प्रदेशाः स्युः ॥ २२ ॥

तनुधनसहजहितसुतद्विट्स्त्रीमृतिधर्मकर्मलाभगमाः ।
द्वादश होराभेदाः स्वलग्नधाम्नस्तथारभ्य ॥ २३ ॥

उदयो देहो लग्नं द्वितीयमर्थो द्विकं शुभं ख्यातम् ।
दुश्चिक्यं सहजगृहं सोपचयं यत्तृतीयं च ॥ २४ ॥

पातालहिबुककण्टककेन्द्रचतुष्कं चतुर्थभवनं च ।
पुत्रं त्रिकोणसंज्ञं पञ्चमकं षष्ठमहितं च ॥ २५ ॥

जामित्रमस्तभवनं चतुरश्रं रन्ध्रमष्टमं निधनम् ।
धर्म[३]त्रिकोणनवमं दशमं मेषूरणं व्योम ॥ २६ ॥

एकादशमौपचयं लाभं भवमायभवनमाख्यातम् ।
अन्त्यं व्ययञ्च कथितं द्वादशमं निर्गमं रिःफम् ॥ २७ ॥

---

१. 'यस्तु मी', २. रिपुर्यपणापगो' क. पाठः, ३. 'यत्तु त्रि' ग. पाठः.

लग्नहिबुकास्तदशमं केन्द्रं च चतुष्टयं परं तस्मात् ।
पणपरमापोक्लीमं त्रिविधं ज्ञेयं ततः परतः ॥ २८ ॥
मुक्तो रविणोर्ध्वमुखस्तिर्यग्वक्रोऽग्रसंस्थितो राशिः ।
तत्संविष्टो यस्मादधोमुखो भवति न श्रेष्ठः ॥ २९ ॥
नागत्रयोदशाचलहररसषड्सहयेशदिङ्मनवः ।
सचतुर्विंशतिकिरणा मेषादीनां तु विज्ञेयाः ॥ ३० ॥
वृश्चिकमीननृमिथुनाः श्यामाः श्वेतास्तुलाकुलीरवृषाः ।
केसारिमेषभधनुषो रक्ताः शेषास्त्रयः कृष्णाः ॥ ३१ ॥
अजहरिधनुषो भूपाः शूद्रा वृषभाङ्गनामृगा वैश्याः ।
मिथुनतुलाकुम्भाः स्युर्विप्रास्ते कर्कटालिझषाः ॥ ३२ ॥
अजवृषभसिंहधनुषश्चतुष्पदाः स्युर्मनुष्यसंज्ञास्ते ।
घटयुग्मतुलाकन्याः सरीसृपौ कीटकर्कटकौ ॥ ३३ ॥
विहगौ झषपाठीनौ मनुष्यजश्चापपूर्वभागो यः ।
जलयोनयः सदोक्ताः कुलीरघटनक्रमीनाः स्युः ॥ ३४ ॥
चापतुलाधरकन्याः पौराः कुम्भाजयुग्मवृषभास्ते ।
ग्राम्याः केसरिमेषौ वनेचरौ केचन प्राहुः ॥ ३५ ॥
शीर्ष+वदनग्रीवास्कन्धोरःकुक्षिवस्तिलिङ्गानि ।
ऊरुयुगजानुजङ्घाचरणानि भवन्त्यजादीनाम् ॥ ३६ ॥
कन्या सानलसस्या प्लवगा च तुलाधरो घटी मीनौ ।
नक्रो मृगेन्द्रवदनो नरोऽश्वजघनो धनुष्पाणिः ॥ ३७ ॥

---

१. 'नाझषा वै' ख., 'नामृगास्यश्च । वैश्यास्तौलिघटवीणधरकाः स्युर्वि' ग. पाठः. २. 'च्यरूपास्ताः । घ', ३. 'निजः स', ४. 'ज' ग. पाठः.

मेषवृषसिंहवृश्चिककर्कटकास्ते स्वनामतुल्याः स्युः ।
नरमिथुनं दण्डधरं वीणाहस्तं च विज्ञेयम् ॥ ३८ ॥

अजवृषयमकर्कीणां मूर्च्छामनुतीर्थकृत्तुरङ्गाः स्युः ।
पुष्करभागाः क्रमशः प्रोक्ताः शेषाष्टराशीनाम् ॥ ३९ ॥

अजवृषयमकर्किकुम्भमीनाः
पृथुबलिनो निशि राशयः षडेते ।
हरिमकरतुलालिचापकन्या
दिवसबलाः षडिमेऽत्र राशयश्च ॥ ४० ॥

दिवसे बलिनो नृराशयो निशि बलिनः पशुराशयस्ततश्च ।
दिव[1]से विलये सरीसृपाः पृथुबलिनः खगराशयस्ततश्च ॥

इति सङ्ग्रामविजयोदये प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः ।

रविशुक्रभौमविषधरशनैश्चरशशाङ्कसौम्यवाक्पतयः ।
प्राच्यादीनां पतयो भवन्त्यमी वारनेतारः ॥ १ ॥

कालस्यात्मादित्यो मनः शशाङ्को धरात्मजः सत्त्वम् ।
ज्ञो वाग् जीवः प्राणो भृगुः सुखं सूर्यजः कोपः ॥ २ ॥

अरुणसितासृक्श्यामाः स्वर्णपयःकृष्णनीलवर्णाः स्युः ।
रविचन्द्रभौमबुधगुरुशुक्रार्कजभोगिनः क्रमशः ॥ ३ ॥

---

१. 'से बलिनः स' क. पाठः.

शशिशुक्रौ[1] स्त्रीरूपौ दिनकरगुरुभूमिसूनवः पुरुषाः ।
बुधभुजगसूर्यतनया नपुंसकाः स्युर्ग्रहास्तेऽपि ॥ ४ ॥
क्षीणेन्दुसूर्यभूमिजनीलोरगकेतवः सदा क्रूराः ।
भार्गवसुरेज्यसौम्याः सौम्याश्चन्द्रश्च शुक्लेऽपि ॥ ५ ॥
विहगौ शनैश्चरबुधौ द्विपदौ गुरुभार्गवौ शशी कीटः ।
दिवसकरभूमितनयौ चतुष्पदौ सर्वदा भवतः ॥ ६ ॥
समदृष्टिर्जामित्रे त्रिपाददृष्टिश्चतुर्थनैधनयोः ।
नवमे सुतेऽर्धदृष्टिर्दशमे सहजेऽङ्घ्रिदृष्टिः स्यात् ॥ ७ ॥
कुजसूर्यौ चतुरश्रौ सुमण्डलः शीतकृद्[2] बुधस्त्र्यश्रः ।
आयतवृत्तो जीवः सितोऽष्टकोणो भवत्येवम्[3] ॥ ८ ॥
अत्यायतचतुरश्राः सूर्यात्मजराहुकेतवः सर्वे ।
भूम्यादीनां पतयः कोणशशाङ्कारबुधजीवाः ॥ ९ ॥
अदृढं रवेः सकाष्ठं नवं च शशिनः कुजस्य दग्धगृहम् ।
बहुशिल्पं शशिसूनोर्दृढं गुरोः स्याद् भृगोश्चित्रम् ॥ १० ॥
*दिनकरसूनोः शून्यं जीर्णं भुजगस्य वेश्म निर्दिष्टम् ।
केतुगृहं प्रविभग्नं निम्नाश्रितमाहुरन्येऽपि ॥ ११ ॥
भूमिवनकोशचैत्यज्वलनामृतदेवताश्रमाः प्रोक्ताः ।
मन्दासुरासुरगुरुसौम्योर्वीजेन्दुसूर्याणाम् ॥ १२ ॥
रात्रौ मन्देन्दुकुजाः शशाङ्कजः सर्वदाह्नि शेषाश्च ।
बलवन्तो निशि पापाः सौम्याः शुक्ले वदन्त्यन्ये ॥ १३ ॥

---

१. 'स', २. 'तगुर्बुध', ३. 'व' क. पाठः.

---

* 'जीर्णं संस्कृतमर्कजे' इति मुद्रितहोरा।

बुधभौमभास्करात्मजजीवसितेन्दूष्णरश्मिभुजगेन्द्राः ।
क्रमशो बलाधिकास्ते सहजस्य भवन्ति लोकेऽस्मिन् ॥

असितसितरक्तशशिबुधगुरवः शिशिरादिनायकाः प्रोक्ताः ।
क्षित्यादीनां पतयो बुधभृगुकुजमन्दजीवाः स्युः ॥ १५ ॥

जीवबुधौ ग्रामचरौ रविकुजसौरोरगास्त्वरण्यचराः ।
जलनिलयौ भृगुचन्द्रौ निर्दिष्टौ तत्र शास्त्रज्ञैः ॥ १६ ॥

भृगुसौम्यौ राजसिकौ रविगुरुशशिनस्तु सात्त्विकाः प्रोक्ताः ।
तामसिकौ कुजमन्दौ ग्रहस्वभावाः समाख्याताः ॥ १७ ॥

राजा दिनकृत् सोमः पण्यस्त्री स्यात् कुजोऽपि दण्डधरः ।
सौम्यो यतिरथ गणको गुरुरपि विप्रः सितः स्त्री स्यात् ॥

दासो निकृष्टजातिश्चण्डालः सूर्यसूनुराख्यातः ।
राहुश्च चर्मकारः केतुः सङ्कीर्णवर्णोऽयम् ॥ १९ ॥

आदित्यः शिववेषश्चन्द्रः कापालिकः कुजो भिक्षुः ।
पाशुपतो[2] ज्ञो जीवो विप्रः शुक्रस्तथा[3] योगी ॥ २० ॥

नग्नः शनैश्चरोऽसौ राहुर्वै भैरवः समाख्यातः ।
केतुर्भवेत् परिव्राड् ग्रहाः स्ववेषाः पृथक् प्रोक्ताः ॥ २१ ॥

मूर्धमुखकण्ठवक्षोहृदूरुयुग्माङ्घ्रियुगळभागाः स्युः ।
भौमसितसौम्यशशिरविमन्दगुरूणां प्रदेशास्ते ॥ २२ ॥

मस्तकलोचनकर्णश्वासाश्रयवक्त्रकण्ठचिबुकानि ।
सौरारसौम्यगुरुभृगुदिनकरशशिनां प्रदेशाः स्युः ॥ २३ ॥

---

१. 'जातो नि' ग. पाठः. २. 'तो जी', ३. 'तो' ख. पाठः. ४. 'र्गे' क., 'क्ष' ग. पाठः. ५. 'लाः स्युः ।' ग. पाठः. ६. 'म' ख. पाठः.

शशिनः कपोलवक्षः शुक्रस्य तु[1] नासिकाग्रनेत्रयुगम् ।
लिङ्गाग्रशिरःकण्ठाः कोणस्य गुरोश्च कर्णयुगम् ॥ २४ ॥
गुदहृदयबाहुयुगलं कुजस्य हनवो रवेश्च[2] जानुयुगम् ।
पृष्ठोरू शशिसूनोर्निर्दिष्टौ[3] शास्त्रतत्त्वज्ञैः ॥ २५ ॥
रक्तश्यामो ह्रस्वः कृशोऽल्पकेशः समांसलः शूरः ।
पित्तात्मकः प्रतापी मधुदृक् सूर्योऽस्थिसारश्च ॥ २६ ॥
गौरश्चपलो दीर्घः स्त्रीलोलः श्लेष्मै[4]वातसंस्पृ[5]ष्टः[6] ।
तनुवृत्तो मृदुवाक् च स्वक्षश्चन्द्रो रुधिरसारः ॥ २७ ॥
क्रूरः खलः प्रतापी लुब्धो रक्तो दृढोऽभिमानी च ।
मज्जासारो भौमो रक्ताक्षो वातपित्तात्मा ॥ २८ ॥
श्यामः सुभगो मानी वातश्लेष्माधिकोऽचरो दीर्घः ।
नात्यँ[7]ङ्गस्त्वक्सारः कलान्वितो बुद्धिमान् सौम्यः ॥ २९ ॥
मेदःसारो मतिमान्[8] मेधावी धर्मवत्सलो गौरः ।
मध्यतनुः प्रियवादी बृहस्पतिः सर्वविद्यात्मा ॥ ३० ॥
गौरः श्यामः सुभगस्त्यागी भोगी समांसलो भद्रः ।
ज्ञानी च स्थिरबुद्धिः शास्त्रज्ञो भार्गवो दीर्घः ॥ ३१ ॥
रूक्षो दीर्घः कृष्णः पिङ्गाक्षो भीरुकः कृशः पिशुनः ।
वातप्रकृतिर्मन्दो निर्मांसः[9] स्नायुसारश्च ॥ ३२ ॥

---

१. 'च' क. पाठः. २. 'श्च बाहुयु' ग. पाठः. ३. 'ष्टौ तत्र शास्त्रज्ञैः' ख. पाठः. ४. 'ष्मरोगसं', ५. 'सृ' ग. पाठः. ६. 'ष्टः । मृदुलशुभो मृदुलवचाः स्व' ख. ग. पाठः. ७. '(ल्पङ्ग ? ल्पाङ्ग)', ८. 'हिमां मे', ९. 'सकः स्ना' ख. पाठः.

अतिकृष्णः कुटिलतनुर्दीर्घाङ्घ्रिर्विकटलोचनः क्रूरः ।
वक्रगतिर्दुर्मेधा राहुः साक्षादधोदृष्टिः ॥ ३३ ॥

एकादशे तृतीये दशमे षष्ठे च भास्करः शुभदः ।
जन्मनि धने चतुर्थे चाष्टेऽन्त्ये पञ्चमे क्रूरः ॥ ३४ ॥

जन्मा[1]नलर्तुसप्तमदशमैकादशे[2]शुभप्रदश्चन्द्रः ।
अर्धा[3](ष्टा ? स्ता)ष्टद्वादशे[4]निलयेऽसौ[5] मृत्युदो ज्ञेयः ॥ ३५ ॥

अनलरसरुद्रदशमे रुधिरार्कजराहुकेतवः शुभदाः ।
अष्टमजन्मार्धाष्टमजामित्रान्त्येषु जीवहराः ॥ ३६ ॥

जन्मद्वितीयपञ्चमचतुर्थषष्ठाष्टसप्तदशमेषु ।
द्वादशमे शशिपुत्रः फलप्रदः सर्वकार्यकरः ॥ ३७ ॥

भूतनयनेशसप्तमरन्ध्रस्थानेषु लाभमर्थाप्तिम् ।
पुत्रोत्पत्तिं पुष्टिं शक्राचार्यः स्थितः कुरुते ॥ ३८ ॥

जन्मनि दशमे षष्ठे द्वादशहिबुकाष्टमे तृतीये(षु ? च ।)
शत्रुत्वमर्थहानिं रुङ्निर्गमनं गुरुः कुरुते ॥ ३९ ॥

मुनिरसदशमस्थाने युवतिवियोगं विषूचिमपवादम् ।
कर्मविहीनं कलहं वस्त्रालाभं भृगुः कुरुते ॥ ४० ॥

अष्टमदशमैकादशपञ्चमहिबुकव्ययार्थसहजेषु ।
स्त्रीसम्पर्कं लाभं देहसुखं भार्गवः कुरुते ॥ ४१ ॥

आदित्यसौम्यशुक्राः सदैकराश्येकमासभोक्तारः ।
गुरुरेकवर्षभोक्ता त्रिपक्षभोक्ता भवेद् भौमः ॥ ४२ ॥

---

१. 'न्मांशलग्नस' ख. पाठः. २. 'शे' क. पाठः. ३. 'र्धा-र्धाष्ट', ४. 'श (तथे ?) षष्ठे च स मृ', ५. 'मनवमै' ग. पाठः.

वर्षद्वयाधवर्षं तिष्ठति राशौ शनैश्चरो राहुः ।
अर्धा[1]ब्दं वर्षं च दिनद्वयं साङ्घ्रिभुक् चन्द्रः ॥ ४३ ॥

पूर्वजन्मनि शुभाशुभमुद्यत्कर्मणः फलमिह ग्रहचारः ।
व्यञ्जयत्यखिलवस्तु पदा[2]र्थान् धाम्नि दीप इव तत्रै[3] तम-
[स्स्थान् ॥ ४४ ॥

इति सङ्ग्रामविजयोदये द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः ।

एकः कालोऽनादिः सर्वगतो व्यापको विभुर्नित्यः ।
सूक्ष्मो भवेदमूर्तिः सर्वेषां कारणं जगताम् ॥ १ ॥

अक्षिनिमेषकलाद्यैः काष्ठालवतुटिकलादिसङ्ख्याभिः ।
नाडीक्षणार्धयामप्रहराहोरात्रपक्षाद्यैः ॥ २ ॥

मासर्त्वयनाब्दयुगैः कल्पैर्मन्वन्तरादिसंहारैः ।
व्यक्ताव्यक्तैः स्कन्धैर्विधीयते कालसङ्ख्येयम् ॥ ३ ॥

निर्व्याधितस्य पुंसः समधातोर्वातवर्जितस्यैव ।
अक्षिनिमेषो ग्राह्यो निमेषषट्कं कला प्रोक्ता ॥ ४ ॥

तत्षट् काष्ठा ज्ञेया षट्काष्ठाभिर्लवः प्रोक्तः ।
षड्भिर्लवैस्तु[4]टिः स्यादेताः कालस्य कीर्तिता मुनिभिः ॥

अपरं वक्ष्ये सूक्ष्मं कालं सर्वा[5]र्थदीपकं जगताम् ।
नारीपयोधरान्तस्पन्दो[6] गुर्वक्षरैस्त्रिभिः प्रोक्तः ॥ ६ ॥

---

१. 'ब्दवर्षमोक्ता दिनद्वयदिसाङ्घ्रि' ख. ग. पाठः. २. 'र्थे घा' ख. पाठः. ३. 'त्र समस्तान्', ४. 'टी स्या' क. पाठः. ५. 'र्थ-साधनं ज' ख. पाठः. ६. 'न्दैर्गु' ख. ग. पाठः.

एकः प्राणो ज्ञेयः स चतुर्गुर्वक्षरोच्चारः।
तत्षष्ट्यधिकैस्त्रिशतैर्नाडी ज्ञेया समस्ततन्त्रेषु ॥ ७॥
प्राणैः षड्भिर्लवमिह तत्षष्टिर्नाडिका: प्रोक्ता:।
तत्सप्तार्धैः प्रहरं दिनश्चतुर्भिश्चतुर्भिरपि रजनी[1] ॥ ८ ॥
मकरस्थे दिवसकरे दिनवृद्धिः स्यात् पलद्वयेन सदा।
मकरे सङ्क्रान्ते सति गुणाहतानीह तान्येव ॥ ९ ॥
व्योमगुणभूतचन्द्रैर्युक्ता भागं हरे[2]च्च षष्ट्या तु।
लब्धा घटिकाः प्रोक्ताः शेषा ज्ञेया[3] लवाः पलास्तत्र ॥
दिनमानं कथितमिदं यावद् रविरुत्तरे स्थितस्तावत्।
दक्षिणमार्गे प्राप्ते कर्कटकेऽर्केऽत्र निशि वृद्धिः ॥ ११ ॥
एकत्र पिण्डितास्तैः[4] सर्वा लिप्ताः खकोशसंलक्ष्याः।
ताभिर्दिनमेकं स्यात् समस्तकालस्य मानेन ॥ १२ ॥
लिप्ताद्वयोर्मुहूर्तस्त्रिपञ्चभिस्तैस्तु[6] वासरैः[5] कथितः।
रात्रिस्त्रिपञ्चभिः स्याद् यावद्रविरुत्तरे प्राप्ते ॥ १३ ॥
तुल्यप[7]लैर्द्वादशभिः कुर्यादष्टाङ्गुलोच्छ्र्यं[8] पात्रम्।
विस्तारं द्वादशभिः कराङ्गुलैस्तत्प्रमाणोक्तम् ॥ १४ ॥
यन्त्राकृष्ट[9]शलाका हेमोद्भूता षडङ्गुलोपेता।
सावित्रमार्ष[10]तुलया शलाकया वेधये[11]द् घटीपात्र[12]म् ॥ १५ ॥

१. 'तुर्भी रजनी च ॥' ख. ग. पाठः. २. 'च्चु' क. पाठः. ३. 'या पला' ख, 'याः फला' ग. पाठः. ४. 'स्ते सर्वे लि' क. ग. पाठः. ५. 'रः प्रोक्तः ।' क. पाठः. ६. 'लि' ख. पाठः. ७. 'फ' ग. पाठः. ८. 'च्छ्रितं पा', ९. 'कृतिश्शला' ख. पाठः. १०. 'न', ११. 'येत् पा' क. पाठः. १२. 'त्रम् ॥ तस्मि' ग. पाठः.

षष्टिपलाम्भःपूर्णे कटाहे तत्र क्षिपेद् घटीपात्रम् ।
तस्मिन् मग्ने घटिका कालोदयसाधनी ज्ञेया ॥ १६ ॥

ताः षष्टिरहोरात्रं तैश्च त्रिशतैः सषष्टिभिर्वर्षम् ।
मानेन तेन कृतयुगमानं वक्ष्यामि संक्षेपात् ॥ १७ ॥

खाम्बरगगनद्विपकरमुनीन्दवः कृतयुगस्य सङ्ख्येयम् ।
सप्तदशलक्षवर्षाः साष्टाविंशतिसहस्रांश्च ॥ १८ ॥

सन्धिः सहस्रमेकं त्रेतायाः कीर्त्यते पुराचार्यैः ।
शून्यत्रयर्तुनवकरशशिनस्तस्याब्दसङ्ख्येयम् ॥ १९ ॥

द्वादशलक्षोपे(तं ? ता) षण्णवतिसहस्रसङ्ख्येयम् ।
त्रेतायुगस्य कथितो द्वापरसन्धिः सहस्रं च ॥ २० ॥

गगनखखवेदरसवसुसङ्ख्या च द्वापरस्य वर्षाणाम् ।
अष्टाब्दलक्षसंख्या चतुरुत्तरषष्टिसाहस्रम् ॥ २१ ॥

सन्धिश्चतुःसहस्रं द्वापरकलिकालयोः समाख्यातम् ।
आकाशव्योमाम्बरकरगुणवर्णाः कलेर्मानम् ॥ २२ ॥

अब्दचतुर्लक्षाणि द्वात्रिंशत्सहस्रवर्षसहितानि ।
कलियुगमानं साक्षादार्युस्तल्लक्षणं चारात् ॥ २३ ॥

रन्ध्राद्रिचन्द्रशिखिनः शकाब्दराशौ नियोजयेत् तानि ।
कलियुगभुक्तिः साक्षाद्भवति सदा सर्वलोकानाम् ॥ २४ ॥

ष्टिं हत्वा नवभिर्भुक्ताब्दैः संयुते कृते तस्मिन् ।
न्ध्रवसुहस्तयुक्ता भवेच्छकाब्दस्य सङ्ख्येयम् ॥ २५ ॥

---

१. स्तु', २. '' तैस्त्रिष', ३. 'स्रवर्षांश्च' ग. पाठः. ४. णं' ख. पाठः. ५. 'भ', ६. 'केष ॥'. ७. 'ष्टिर्हत्वा' ग. पाठः.

शकवर्षं रुद्रयुतं खरसैर्विभजेत् समूहमत्रैव ।
शेषा भुक्ते[1]ऽब्दे यत्र ग्राह्यं भुक्तिमत्रैव ॥ २६ ॥

द्वादशसहस्रवर्षं युगं भवेच्चतुर्युगं कल्पम् ।
एतत् सहस्रकल्पं तदहो ब्राह्मं वदन्त्यन्ये ॥ २७ ॥

भवति चतुर्युगमानं ब्राह्ममहोरात्रमाहुराचार्याः ।
शतमेकमने[2]नैवं दिनं[3]प्रमाणेन जीवति[4] ब्रह्मा ॥ २८ ॥

ब्राह्मं यद्दिनमेकं विष्णोर्यामः स वैष्णवो दिवसः ।
प्रहरो रुद्रस्य भवेत् तत्प्रहरश्चेश्वरस्यैव ॥ २९ ॥

ऐश्वरमेकं प्रहरं सदाशिवस्येति कीर्तितो मुनिभिः ।
अत ऊर्ध्वं परमपदं निराम[5]यं निर्लयं तत्त्वम् ॥ ३० ॥

एवञ्च कालसंख्या दृष्टादृष्टार्थसाधनी प्रोक्ता ।
सकलगणितागमेषु ज्ञातव्या सिद्धिमिच्छद्भिः ॥ ३१ ॥

अधुना मेषादीनां राशीनां वक्ष्य[6]ते यथा सम्यक् ।
गुणनन्दकरान् न्यस्य त्रिस्थाने च त्रिधा रूपम् ॥ ३२ ॥

पूर्वा[7]ङ्के तिथिहीनं रसो द्वितीये युतस्तृतीये च ।
त्रिंशद्युक्तं क्रमशः साक्षाल्लङ्कोदयाः प्रोक्ताः ॥ ३३ ॥

छाया त्रिविधा प्रोक्ता[8] सूर्येण प्राक्[9] क्रमेण तच्छाया ।
सा ह्रासवृद्धिगणनाक्रमेण संलक्ष्यते सम्यक् ॥ ३४ ॥

---

१. 'भूत्वाब्दे' ख., 'भुक्ताब्दे यद् ग्रा' ग. पाठः. २. 'वच दि' ख. ग. पाठः. ३. 'नं', ४. 'जीवितमिदम् ॥' ख. पाठः. ५. 'यं तल्लयं' क. पाठः. ६. 'ते स' ग. पाठः. ७. 'र्व्या' ख. ग. पाठः. ८. 'ज्ञेया सू' क, 'ख्याता सू', ९. 'प्रोत्क्रमेण' ग. पाठः.

प्रथमे ह्रासः षड्भिः षट्त्रिंशच्च द्वितीयके पश्चात् ।
रसरूपं त्रिस्थाने पश्चाद् वृद्धिः क्रमेणैव ॥ ३५ ॥
मेषादि[1] शस्यते ते क्रमाद् विलोमेन कन्यान्ताः ।
यावत्यस्ताः पश्चात्तावन्मीनो[2]न्तिका ज्ञेयाः ॥ ३६ ॥
एवं स्फुटं च कृत्वा राशीनामत्र भवति तच्चारम् ।
यत्नेन लक्षणीया छाया सर्वार्थसाधनकृत् ॥ ३७ ॥
अथ वक्ष्ये राश्युद[3]यं छायालग्नेन निश्चयी स भवेत् ।
शङ्कुस्त्रिविधः प्रोक्तो विलग्नसंसाधनो लोके ॥ ३८ ॥
एकं दारुसमुद्भवमाङ्गुल्यं च द्वितीयकं प्रोक्तम् ।
पौरुषमेतत् पश्चात् तृतीयमौहु[4]र्न(रः ? रं)शङ्कु[5]म् ॥ ३९ ॥
रविसङ्ख्याङ्गुलमानं यन्त्राकृष्टं तदर्धपरि[6]णाहम् ।
अच्छिद्रं नात्यन्तं शङ्कुं प्राहुस्तमाचार्याः ॥ ४० ॥
पा[7]दं द्विगुणं कृत्वा छायाशोध्यं मनुश्च निक्षिप्य ।
गगनेन्दुहस्तराशिर्विभज्यते तेन कूटेन ॥ ४१ ॥
पूर्वा[8]ह्ने या लब्धा भुक्ता लिप्ता तथापराह्ने तु ।
ज्ञेयास्तु विद्यमानाश्छाया[9]ः संसाधितास्तावत् ॥ ४२ ॥
खेकननया[10]रखेल[11]भभगारिरटानिनिवियरेखल[12]वे[13]विमैता ।
चूडे[14]द[15]धिसतत[16]महलवलरिच्छायाप[17]दान्यार्द्धा[18]त् ॥ ४३ ॥

---

१. 'दि गण्यतां क्रमाद् विलोमेन यावद् गत्या पश्चा', २. 'नान्तिके ज्ञे', ३. 'यं सच्छाया', ४. 'मार्तुर्न', ५. 'ङ्कुः ॥', ६. 'रिमाणम् ।', ७. 'द' ख. पाठः. ८. 'स्तु भो विमा' ग. पाठः. ९. 'यास्ससाधिकास्ता' ख. पाठः. १०. 'रि' क. पाठः. ११. 'भगखा' ख. पाठः. १२. 'ल्ल' गप', १३. 'तताः । तत्सिषर्हिंसित ... बल' क. पाठः. १४. 'त' पाठः. १५. 'धी' ख. पाठः. १६. 'तं; भवल', १७. 'पा' ग. पाठः. १८. 'द्धा· ॥' ~ —

भूत्वोत्तराभिवदनः पादच्छायां निरूपयेद् भूमौ ।
पादाहतक्रमेण हि मुनियुक्तं तद्धरेच्छायाम् ॥ ४४ ॥

अचलाब्धिकृते राशौ तदधोलिप्ताश्च पञ्चद[1]शानि(हि ? ह)ताः ।
उद्धृत्यानेन पुनः खरसैः सन्ताडयेत् तानि ॥ ४५ ॥

षण्णवतिः पूर्वे स्यात् षष्टिश्चैव द्वितीयके छाया ।
द्वादश चरणच्छाया तृतीयके षट् चतुर्थे तु ॥ ४६ ॥

षट् पञ्चके तु पश्चात् षष्ठे त्रिपदद्वयं च सप्तमके ।
अष्टमपदं च शून्यं ज्ञातव्यं कालसंविद्भिः ॥ ४७ ॥

रौद्रश्चे(ते ? तो) मित्रः सारभटः सवितृजश्च पञ्चैव ।
वैरोचनो जयः स्यादभिजिन्मध्याह्नवेलायाम् ॥ ४८ ॥

रावणबलवद्विजयानन्दीयमवारिराजभगदेवाः ।
सप्तापराह्णकाले तथैव रात्रौ च पञ्चदश ॥ ४९ ॥

[2]रौद्रो महातिघोरः सारभटश्चैव घोररूपतमः ।
अभिजिद् भयदः साक्षान्मृत्युकरो रावणः प्रोक्तः ॥ ५० ॥

रौद्रो दिवाकरोऽयं सारभटोऽङ्गारको मुहूर्तोऽयम् ।
सन्ध्यान्तरेषु बलवाञ् शनैश्चरो रावणः प्रोक्तः ॥ ५१ ॥

क्रू[3]रांस्त्यजेन्मुहूर्तानक्रूरा[4]श्चेत्तु तत्र गृह्णीयात् ।
क्रूरोऽपि रौद्रकार्ये क्रूर[5]कैरः शान्तिकृत् सौम्यः ॥ ५२ ॥

राशिस्थमुष्णकिरणं स्फुटं च कुर्यात् प्रयत्नतो देवम् ।
उद्यन्ते तस्य वशान्मू[6]र्ता नागग्रहाया[7]श्च ॥ ५३ ॥

---

१. 'विहिता' ख. पाठः. २. 'रात्रौ म', ३. 'रा' ख. ग. पाठः. ४. 'रास्ते सदा प्रगृ' ग. पाठः. ५. 'ह' ख. पाठः. ६. 'न्मुहूर्तना' क. ग. पाठः. ७. 'च' ग. पाठः.

यस्मिन् मासे राशौ निष्ठति भगवान् दिवाकरः सम्यक्[1] ।
पूर्वमुदेति स राशिः शेषाः पश्चात् समुद्यन्ते ॥ ५४ ॥

उदयरसातलपतनव्योमस्था राशयो निगदिताश्च ।
एते चतुष्प्रकारा मेषाद्या मीनपर्यन्ताः ॥ ५५ ॥

उदयतुलाघटकन्या मिथुना हिबुके कराळमीनौ च ।
कीटाळी द्वेऽस्तमये[2] सिंहाजधनुर्वृषा गगने ॥ ५६ ॥

सांशचतुर्घटिकाः स्युर्मेषान्तिमयोर्वृषाययोरुभयोः ।
पौ[3]दोनपञ्चनाड्यः सपादपञ्चैव युग्म[4]मृगयोश्च ॥ ५७ ॥

नवमचतुर्थकराश्यो[5]र्द्विपादपञ्चात्र साङ्घ्रिपञ्चैव ।
हरिवृश्चिकयोर्नाड्यः कन्यातुलयोश्च पञ्चैव ॥ ५८ ॥

उदये[6] सुरगुरुसौम्यौ हिबुके शशिभार्गवौ च पतनस्थौ ।
यमभुजगौ दृढसं[7]स्त्वावुच्चस्थौ भास्करोर्वीजौ ॥ ५९ ॥

अजवृषवनिताहयाद्यभागः शशिभमृगालिझषान्तिके वराहः ।
हरिघटयमतौलिमध्यगृध्रौ[9] विषं[10]मशने[11] तु रुजो मृतिः क्रमेण ॥

इति सङ्ग्रामविजयोदये तृतीयोऽध्यायः ॥

१. ‘सौम्यः ।’, २ ‘ने’ ख. पाठः. ३. ‘एकोन’ क. ख पाठः. ४. ‘ग्मझषेः ॥’ ख. ग. पाठः. ५. ‘श्यौ’, ६. ‘[illegible] बुधगु’ ख. पाठः. ७. ‘सङ्खौ भा’ ख., ‘सश्चौ भान्तःस्थौ भा’ ग पाठः. ८. ‘ना’ क. ग. पाठः. ९. ‘ध्रो’ क. पाठः. १०. ‘श’ ख पाठः. ११. ‘स’ ग. पाठः.

अथ चतुर्थोऽध्यायः ।

अथ पञ्चस्वरभुक्तिस्थानबलाधीशकालवारर्क्षम् ।
संक्षेपाद् वक्ष्येऽहं समरजयं शाम्भवात् सारम् ॥ १ ॥
पञ्च स्वरास्तु जगतामुदयस्थितिनाशहेतवो नित्याः ।
पञ्चब्रह्मोपेताः पञ्चप्राणान्विताः सकलाः ॥ २ ॥
कचटतपपञ्चवर्गैस्वांशेशाः सप्तपञ्चतन्मात्राः ।
षट्त्रिंशद्वर्णकलाः समन्विताः पञ्चतत्त्वकलाः ॥ ३ ॥
बिन्द्वादिसमोपेतास्ते च निवृत्त्यादिभिः समोपेताः ।
पीतसितरक्तकर्बुरविवर्णयुक्ताश्च नाडीशाः ॥ ४ ॥
ओङ्कारादेकारः सञ्जातोऽस्मादुकार एवास्मात् ।
सोऽयमिकारस्तस्मादकार एवात्र सञ्जातः ॥ ५ ॥
अवनिजलदहनपवनव्योमाधीशाः स्वरा भवन्ति सदा ।
सकलकलाक्षरताराराशिग्रहकालजीवाश्च ॥ ६ ॥
पञ्चस्वराधिपतयः श्येननिशाचरकृष्णशिखिशिखिनः ।
प्राच्यादिब्रह्मान्तं स्थिता धराजादिभिर्युक्ताः ॥ ७ ॥
चैत्रादेः प्रथमतिथौ प्रारभ्य महेन्द्रदिक्स्थितः श्येनः ।
द्वादश दिनानि भुङ्क्ते भौमेनालङ्कृतः पूर्वम् ॥ ८ ॥
पश्चात् तथैव पक्षी ततः शिखी द्वादशैव कनकाक्षी ।
तस्मात् सरसिभवः स्यात् ततस्तु भोगी खगः श्येनः ॥

१. 'र्गाः' क. घ. पाठः. २. 'शास्ते स' ग. पाठः. ३. 'य', ४. 'का' क. घ. पाठः. ५. 'ति' क. ख. पाठः. ६. 'दौ' ग. पाठः. ७. 'वत्या त', ८. 'वनश्ये' ख. घ. पाठः.

मासद्वयेन भुक्त्वा पञ्च विहङ्गास्ततः क्रमेणैव ।
परिवर्तयन्ति सर्वे यावत्संवत्सरान्तं स्यात् ॥ १० ॥
नन्दा भद्रा विजया रिक्ता पूर्णेति पञ्चविहगानाम् ।
पक्षे त्रिपञ्चतिथयः सप्तसवाराः क्रमाज्ज्ञेयाः ॥ ११ ॥
एकादशी च षष्ठी प्रथमा श्येनस्य कीर्तितास्तिथयः ।
पिङ्गलिकायास्तिथयो द्विसप्तमी त्रिष्णुजास्तिस्रः ॥ १२ ॥
ज्ञेया तथा तृतीया त्रयोदशी चाष्टमी खगेशस्य ।
सारसतिथयस्तिस्रश्चतुर्थनवभूतजाः क्रमशः ॥ १३ ॥
शिखिनस्तिथयस्तिस्रः प्रपूर्णिमापञ्चमीदशम्यश्च ।
पञ्चखगानां ज्ञेयास्तिथिभुक्तिनयास्तिथीशानाम् ॥ १४ ॥
तिथिमध्ये तिथिनाथः षण्णाडीभुक् खगः प्रपूर्वं स्यात् ।
शेषाः षड्घटिकान्त्ये भोक्तारः पक्षिणः सर्वे ॥ १५ ॥
यो भुङ्क्ते बालोऽसौ ततो द्वितीयः खगः कुमारोऽसौ ।
राजा भवेत् तृतीयो वृद्धो मृत्युश्चतुर्थोऽन्त्यैः ॥ १६ ॥
बालस्ततः कुमारो राजा वृद्धो मृतः सदा ज्ञेयः ।
आत्मस्थानात् सर्वं जयार्थिनाप्यत्र सङ्गण्य ॥ १७ ॥
आत्मा प्रथमैः प्रोक्तो भैटो द्वितीयो हितस्तृतीयः स्यात् ।
स चतुर्थ उदासीनो भवति ततः पञ्चमः कालः ॥ १८ ॥
युद्धेऽरिबालवृद्धान् दूरे परिवर्जयेत् सदैव ज्ञः ।
राजा बलवांस्तेषां कुमारबालौ समौ भवतः ॥ १९ ॥

१. 'य', २. 'न्ये', ३. 'मं', ४. 'क' ख. पाठः. ५. 'यः युद्धव् तृती' क. पाठः. ६. 'लो भवेत् समत.॥' ख. पाठः.

पाषाणनिचितदेशे पर्वतशिखरे विहङ्गमृगयूथे ।
अत्युच्चभूमिभागे पूर्वाह्णे वीर्यवाञ् श्येनः ॥ २० ॥
नाना[1]वृक्षविकीर्णे देवस्थाने वने तटाके च ।
समभूमित[2]ले रम्ये सन्ध्यायां पिङ्गलो बलवान् ॥ २१ ॥
अटवीग[3]ह[4]नैश्छन्ने वल्मीकस्थाणुदे[5]वभूमितले ।
पक्षी बलवान् दुर्गे प्राकाराट्टालकेष्व[6]ह्नि ॥ २२ ॥
उद्यानपुलिनदेशे तटाकसर[7]सीजलाश्रयस्थाने ।
द्वीपान्तरप्रदेशे महाबलः सारसः प्रोक्तः ॥ २३ ॥
नगरपुरहर्म्यशिखरद्रुमवनपुष्पोपशोभितस्थाने ।
बलवान् भवेन्मयूरस्तृतीययामे[8] सभास्थाने ॥ २४ ॥
आद्ययमाग्निजकमलजसौम्यार्द्राः षड् भवन्त्यकारस्य ।
पुष्यपुनर्वसुफ[9]णिपितृभगार्यमाङ्घ्रिर्द्वितीयस्य ॥ २५ ॥
उत्तरपादत्रयरविचित्रानिलशक्रवह्निमित्रार्धम् ।
साक्षादुकारभो[10]ज्यं ज्ञातव्यं[11] शास्त्रतः क्रमशः ॥ २६ ॥
मित्रार्धशक्रराक्षसजलविश्वहरित्रिपादभागश्च ।
एकारस्य तु भोग्यः शेषास्ताः पञ्चमस्यैवं[12] ॥ २७ ॥
उ[13]द्यन्तेऽहोरात्रे दिवसग्रहवर्णभानि सर्वाणि ।
पक्षद्वयं च तेषां विनाडिभिस्तैः स्वै[14]रैः सार्धम् ॥ २८ ॥

---

१. 'नाविशीर्णदेशे दे', २. 'ब', ३. 'ग' ख. पाठः. ४. 'नस्थाने व' ग. पाठः. ५. 'दै' ख. ग. पाठः. ६. 'भ्रिः ॥', ७. 'सीसरसिज', ८. 'रयामे ह', ९. 'णिमित्रभ' क. ग. पाठः. १०. 'ज्यो', ११. 'ख्यः', १२. 'वम् ॥', १३. 'द' ख. पाठः. १४. 'स्ते' ग. पाठः.

अङ्गारकवारेऽस्मिन् प्रतिपत्तिथिरग्निजा च यदि दुःखम् ।
भौमे मखा च षष्ठी यदि मृत्युः स्यादकारस्य ॥ २९ ॥

एकादशी च सार्द्रा भौमदिने मृत्युरुग्रमस्यैव ।
यदि कण्टकविद्धः[1] स्यादस्मिन् वारे ततो हानिः ॥ ३० ॥

सौम्ये मखा द्वितीया दुःखं चार्द्रा ससप्तमी[2] मृत्युः ।
बुधवैष्णवी च भरणी हानिं गच्छेदिकारोऽयम् ॥ ३१ ॥

प्राक् फल्गुनी[3] तृतीया गुरौ हतः[4] साष्टमी धनिष्ठा च ।
हानिरुकारस्याशु त्रयोदशी मृत्युराश्लेषा ॥ ३२ ॥

प्राग् भद्रा च चतुर्थी सिते क्षतं ह्यमर्थनवमी च ।
एकारस्वरमृत्युः सकृत्तिका भूततिथियुक्ते[5] ॥ ३३ ॥

मन्दे मखा च हानिः सपञ्चमी[6] चेत् सरौद्रदशमी च ।
ओकारस्वरमृत्युः पञ्चदशी याम्ययुक्ता च ॥ ३४ ॥

ह्रस्वानां निशि कृष्णे दीर्घाणामह्नि शुक्लपक्षे च ।
मृत्युर्भवेत् स्वराणां वर्णानां[7] कृष्णशुक्लानाम् ॥ ३५ ॥

वृषणान्तरहृद्ग्रीवा[8]कुहरान्तरतालुमूर्धरन्ध्रेषु ।
उद्यन्ते प्रणवाद्याः स्वराश्च पञ्च क्रमाद् देहे ॥ ३६ ॥

---

१. 'द्धं' ग. पाठः. २. 'मे' ख. पाठः. ३. 'फा' ग. पाठः. ४. 'रः' क. पाठः. ५. 'क्तैः' ग. पाठः. ६. 'मी शेषरौ' ख. पाठः. ७. 'नां शुक्लकृष्णानाम्' क. पाठः. ८. 'वोरुभरा' ख., 'वोकुहकारुहूरान्त' क. पाठः.

ऊर्ध्वं तेजो वायुस्तिर्यगधस्तोयमम्बरं मध्ये ।
मध्यपुटे पृथिवीतलमुद्यन्ते पञ्चभूतानि ॥ ३७ ॥

शुक्रगुरुचन्द्रसौम्याश्चरन्ति वामस्य रन्ध्रभागे च ।
भृगुरनलः सोमोऽम्भो जीवो वायुर्बुधः पृथिवी ॥ ३८ ॥

दक्षिणपुटे कुजोऽग्निर्दिनकृत् पृथिवी शनैश्चरस्तोयम् ।
राहुर्वायुः प्रोक्तः क्रूरास्ते सर्वकार्येषु ॥ ३९ ॥

सव्ये शनैश्चरोऽर्धं भौमो[1]ऽप्यर्धं तथाच तस्यार्धम् ।
तस्यार्धं च तदर्धं राहुः सन्दर्शयेत् कालम् ॥ ४० ॥

ज्ञात्वोदयं सुमन्त्री कुर्यात् सम्यक् शुभाशुभं तस्य ।
कुरुतेऽन्यथा तु कार्यं मुक्त्वा[2] पथपञ्चकं चारात् ॥ ४१ ॥

दीर्घो ह्रस्वं याति च ह्रस्वो दीर्घत्वमत्र संयाति ।
दीर्घो वनिता प्रोक्ता ह्रस्वः पुरुषः स्वरो ज्ञेयः ॥ ४२ ॥

नव ताराः कालाख्यास्तिथिवारसमन्विताः क्रमात् क्रूराः ।
अग्निपितृरुद्रयमफणिवसुयोनिजलैकपादश्च ॥ ४३ ॥

दीर्घस्वरेण हन्याद्भ्रस्वो वीर्याक्षराणि तेनैव ।
आदौ मात्रा[3] महती यन्नाम्नस्तस्य विजयः स्यात् ॥ ४४ ॥

मात्राहीनं यस्य प्रथमान्तिकमध्यमेषु यन्नाम्नः ।
तस्य जयो नास्ति रणे यदि चण्डाधिकबलस्यापि ॥ ४५ ॥

---

१. 'मे', २. 'क्त्वाथ' ग. पाठः. ३. 'या' ख. पाठः.

आदौ मात्रारूढं नाम गुरुस्पर्[1]शवर्णसंयुक्तम् ।
विजयेच्छत्रुमवश्यं स कालवे[2]लान्वितः समरे ॥ ४६ ॥
स्थानपुरराजसेवास्त्रीबान्धवपुत्रमित्रै[3]र्मन्त्राद्याः ।
विज्ञातव्यं सर्वं क्रमेण पञ्चस्वरैर्नित्यम् ॥ ४७ ॥

बालधाम धनधान्यसुतस्त्री-
वर्धनं भवति वश्यमे[4]शेषम् ।
स्वांशवर्णसहितं पृथुभोग्यं
मिश्रमूनफलदं स्वरधाम ॥ ४८ ॥
स्थविरमरणधाम वर्जनीयं
पुरनगरालयकामिनीनृपाणाम् ।
द्विरदतुरगमित्रदेवतानां
भवति फलाय कुमारराजधाम ॥ ४९ ॥

इति सङ्ग्रामविजयोदये पञ्चस्वरमुक्तिविधिर्नाम
चतुर्थोऽध्यायः ॥

अथ पञ्चमोऽध्यायः ।

अथ तिथयः पञ्चदश स्वरपञ्चदशाधिदेवताः प्रोक्ताः ।
क्षयवृद्धिकलोपेताः कृष्णे शुक्ले सवर्णास्ताः ॥ १ ॥
कादिदकारान्तोऽयं हीनत्रयवर्जितो भवेच्छुक्लः ।
धादि[5]हंकारान्तोऽयं कृष्णेऽहनि सूर्यजः पक्षः ॥ २ ॥

---

१. 'न्द' ख. पाठः. २. 'ब', ३. 'त्ररन्त्राद्याः' ग. पाठः. ४. 'मवश्यम्' ग., 'मदोषा' क. घ. पाठः. ५. 'ळ' ग. पाठः.

ताः षष्टिनाड्युपेता द्वे द्वे घटिके प्रभुञ्जते तिथयः ।
सकलतिथीनां सन्धौ चरत्यमा सर्वगा नित्या ॥ ३ ॥

दीर्घकलाभिः शुक्लः कृष्णः सौरः सलाघवः पक्षः ।
शैत्यस्थितिसृष्टिकरः संहारकरो भवेदौष्णः ॥ ४ ॥

नित्यं शुभा द्वितीया त्रयोदशी पञ्चमी शुभा ज्ञेया ।
एकादशी च षष्ठी दशमी च द्वादशी नोग्रा ॥ ५ ॥

सप्ताष्टनवमतिथयः क्रूराः प्रतिपच्चतुर्दशी ज्ञेया ।
रौद्री सदा तृतीया चतुर्थ्यमापूर्णिमास्तीक्ष्णाः ॥ ६ ॥

दिवसकरो हिमरश्मेः कलां पिबेच्चन्द्रमाश्च सूर्यकलाम् ।
रेचकपूरकहेतोः शुक्ले कृष्णे क्रमात् पक्षे ॥ ७ ॥

आकारश्चन्द्रमसः स पूरकः सृष्टिकृद् दिनेशस्य ।
अङ्गारः संहारः[1] स रेचको दक्षिणावर्तः ॥ ८ ॥

आत्मप्राणारूढास्ताराग्रहराशिभूतसंयुक्ताः ।
तिथयश्चरन्ति देहे शुभाशुभोद्दीपिकाः[2] पुंसः ॥ ९ ॥

यस्यां तिथौ स जातस्तस्यां[3] मृत्युः स्थितः समुद्दिष्टः ।
यस्यांशकला भार्या सा वश्या[4] कामदा सेव्या[5] ॥ १० ॥

गुरुषष्ठी यमनवमी सितेऽष्टमी द्वादशी रवौ दूष्याः[6] ।
एकादशी शशाङ्के[7] बुधे द्वितीयाथ पञ्चमी भौमे ॥ ११ ॥

---

१. 'सहकारः' ख. पाठः. २. 'पिताः पुं' ग. पाठः. ३. 'स्या मृत्युस्थितं समुद्दिष्टंम् ।' क. पाठः. ४. 'न्या' ग. पाठः. ५. 'ज्ञेया ॥' ख. पाठः. ६. 'ष्याः' ग. पाठः. ७. 'ङ्के द्वितिथिज्ञे प' ख. ग. पाठः.

पुनरन्यं वक्ष्येऽहं दग्धतिथिप्राप्तमुष्णकिरणेन ।
द्वादशमासेषु ततः समस्तकार्यापहं रौद्रम् ॥ १२ ॥
वृषकुम्भयोश्चतुर्थी कन्यामिथुनाष्टमी धनुर्झषयोः ।
दग्धा तिथिर्द्वितीया कर्[1]कटकेऽजे भवेत् षष्ठी ॥ १३ ॥
दशमी हरिवृश्चिकयोस्तुलामकरयोश्च वैष्णवी दग्धा ।
[2]एते तिथयो ज्ञेयाः संवर्ज्याः शास्त्रसंविद्भिः ॥ १४ ॥
ब्रह्मप्र[3]जेशहरियमहिमांशुशि[4]खिवाहनेन्द्रवसुफणिनः ।
धर्मह[5]रसूर्यमनसिजशङ्करविश्वे [6]च तिथिपतयः ॥ १५ ॥
पितरोऽमावास्यायां [7]पतयस्तस्यां [8]च पूजनाधीशाः ।
[9]उद्यन्ते तिथिसहिताः शशिचक्रे कालरूपाभाः ॥ १६ ॥

इति सङ्ग्रामविजयोदये तिथिकल्पनं नाम
पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः ।

अथ कथयामि समासात् स्त्रीपुरुषनपुंसकात्मनक्षत्रम् ।
विंशत्यक्षरजातं पञ्चस्वरभेदितं स्पष्टम् ॥ १ ॥
शतकोष्ठं संलिख्य प्रागाद्यं नातिविस्तरं पश्चात् ।
अ[10]वकहड[11]ाद्यान् न्यस्त्वा विंशतिवर्णांश्च पूर्वाद्यम् ॥ २ ॥
एकैकं प्रत्येकं वि[12]भेदयेत् पञ्चभिः स्वरैः क्रमशः ।
ऋक्षं सचतुष्पादं राशिं नवपादसंयुक्तम् ॥ ३ ॥

---

१. 'काजौ भ' ग., 'केऽजे हि भ' ख. पाठः. २. 'तास्तिथय सर्वाः वर्ज्याः स्युः शा' क. घ., 'ते शुभति' ख. पाठ . ३. 'जापतिह' ४. 'व' ख. पाठः. ५. 'रि', ६. 'श' ग. पाठः. ७. 'पितरस्त' क. पाठः. ८. 'त', ९. 'च्य' ग. पाठः. १०. 'प' ख. पाठः. ११. 'धा' क. पाठः. १२. 'भजेत् तान् प' घ. पाठः.

आग्नेयादियमान्तास्तारास्ताश्चाष्टविंशतिः प्रोक्ताः ।
अक्षरसंस्थाः सर्वास्ताभ्यस्ते राशयो जाताः ॥ ४ ॥

एकांशकाश्चतस्रस्तारास्ताः स्तम्भभाश्च नामाख्याः ।
आर्द्राहस्ताषाढोत्तरभद्राणि नाम्ना स्युः (?) ॥ ५ ॥

आधानजन्मनाम्नां त्रिराशयः सर्वलोकविख्याताः ।
तेषु प्रधानभूतो रणागमे नाम[1]भूतराशिश्च ॥ ६ ॥

यद् यस्य सुप्रसिद्धं लोके नाम प्रगीयते बहुभिः ।
तन्नाम ग्रहीतव्यं नतु [2]गुप्तं नाप्रसिद्धं च ॥ ७ ॥

कथनीयं नामर्क्षं यन्नामाद्यक्षरेण सङ्गण्य ।
अवकहडवर्णराशिन्यायोपायेन तत् तस्य ॥ ८ ॥

नामाद्यक्षरतारा ज्ञात्वा सम्यक् शुभाशुभं ब्रूयात् ।
कोष्ठनवत्रिकमध्ये जन्मर्क्षं यस्य सङ्गण्य ॥ ९ ॥

जन्म प्रथमं सम्पद् द्वितीयमृक्षं विपत् तृतीयं स्यात् ।
क्षेमकरं च चतुर्थं प्रत्यरमपि पञ्चमं ज्ञेयम् ॥ १० ॥

षष्ठं साधकमेतत् सप्तमभं नैधनं ततो मैत्रम् ।
नवमं च परममैत्रं पुनरपि नव भेदतो गणयेत् ॥ ११ ॥

राज्ञो[3] स्वजन्मजातो मध्यमफलदः प्रियः स सन्मानः ।
सम्पत्तारोद्भूतः[4] समस्तसम्पत्प्रदो नित्यम् ॥ १२ ॥

विपदि तु जातो राजा निष्फलदोऽन्ते च मृत्युदो ज्ञेयः ।
क्षेमकरजातकोऽथ स्नेहकरः प्रत्यरे तथा शत्रुः ॥ १३ ॥

---

१. 'मरा' ग. पाठः. २. 'यन्नामाप्र' क. ख. पाठः. ३. 'जन्य', ४. 'तिः' ख. पाठः.

धनदः साधकजातः प्राणहरस्तस्य नैधनोद्भूतः ।
सन्मानदानफलदः स्वनैत्रजः परममैत्रजातश्च ॥ १४ ॥

सम्पत्प्रदः सुफलदस्त्रिपञ्चसप्तर्क्षजातको विफलः ।
वैनाशिकसंजातो विनाशकृत् तस्य विज्ञेयः ॥ १५ ॥

ऋक्षं सैकमदशमं गर्भाधानं च विंशतिः प्रोक्तम् ।
द्वाविंश नक्षत्रं वैनाशिकमाहुराचार्याः ॥ १६ ॥

अश्वियमानलविधिशशिरुद्रादितिगुरुभुजङ्गपितृयोन्यः ।
अर्यमभगदिनकृत्त्वष्टानिलशक्राग्निमित्रेन्द्राः ॥ १७ ॥

निर्ऋतिजलविश्वहरिवसुवरुणाजकपादहिर्बुध्न्याः ।
अश्विन्याद्यधिपतयो भवन्ति पूषा तु रेवत्याः ॥ १८ ॥

मूलविशाखाज्येष्ठामखाधनिष्ठाग्निवरुणदैवानि ।
चित्रा च राक्षसांशास्ताराः क्रूरास्तु विज्ञेयाः ॥ १९ ॥

पुष्यपुनर्वसुहस्तस्वात्यनुराधाश्विनीमृगश्रवणाः ।
रेवत्या नव ताराः प्रोक्ता विबुधांशकाः सौम्याः ॥ २० ॥

प्रोष्ठपदं भाद्रपदं भरणी रौद्रं च रोहिणी विश्वम् ।
अर्यमभगाम्बुजाताः प्रोक्तास्तारा मनुष्यांशाः ॥ २१ ॥

प्रीतिकराः स्युः स्वगणा मानुषदेवांशयोश्च मित्रत्वम् ।
वैरं सुरराक्षसयो राक्षसवध्यो मनुष्यांशः ॥ २२ ॥

पुष्यानिलयोश्छागो योनिः स्यात् सौम्यरोहिणी सर्पः ।
मूलार्द्रयोर्मृगारिर्मखाधनिष्ठाखुराख्यातः ॥ २३ ॥

---

१. 'त्रश्च' ख. ग. घ. पाठः. २. 'सम्पदद', ३. 'क्ता:', ४. 'ध्न्यः' ख. ग. पाठः. ५. 'सर्पानि' ग. पाठः. ६. 'नि' ख. पाठः.

आश्लेषपुनर्वस्वोर्मार्जारो दुर्जयो महाक्रूरः ।
त्वाष्ट्रेन्द्राग्न्योर्व्याघ्रः पशुर्भवेदम्बुभगयोश्च ॥ २४ ॥
मैत्रेन्द्रयोर्मृगाख्यो हस्तरवाती तुरङ्गवैरी स्यात् ।
वरुणाश्विनी तुरङ्गः कपिः श्रवणवैश्वदेवयोर्जातः ॥ २५ ॥
भरणीपौष्णद्विरदौ भाद्रपदार्यममृगाधिपो ज्ञेयः ।
अभिजित् प्राग्भाद्रपदं प्रभवो बभ्रुः समाख्यातः ॥२६ ॥
छागः फणी मृगारिः पलितविलालश्च पुण्डरीकश्च ।
पशुवृषमहिषतुरङ्गमकपिगजकेसरिबभ्रवः प्रोक्ताः ॥ २७ ॥
नक्षत्रबलं प्रोक्तं चतुर्दशविधं स्फुटं समासेन ।
यो यस्मादधिकबलं तं तेनैव प्रयुञ्जीत ॥ २८ ॥
गोव्याघ्रयोर्विरुद्धं नकुलेन फणी द्विपारिणा हस्ती ।
छागेन ग्राममृगः कृतो विलालेन पलिताख्यः ॥ २९ ॥
मृगमर्कटयोर्युद्धं विवर्जयेदाहवे ततो नित्यम् ।
महिषतुरङ्गमकलहः प्रदूषितो युद्धशास्त्रज्ञैः ॥ ३० ॥
द्वादश ताः कुलताराः स्थायिन्यो मासनामसम्भूताः ।
यायिन्यो द्वादश ताश्चरस्थिराख्याश्चतस्रश्च ॥ ३१ ॥

चित्रा विशाखा श्रवणं च शाक्रं
पुष्यं मखाभद्रपदाभिजातम् ।
सौम्याश्विनी विश्वजफाल्गुनाख्यं
कुलानि च द्वादशमासजानि ॥ ३२ ॥
हस्तानुराधायमजैकपादं
स्वात्यम्बुजं फाल्गुनवारुणाख्यम् ।

१. 'हान् क्रू' क. ख. पाठः २., ३. 'फ' ग. पाठः.

ब्राह्मं सनागादितिजं सपौष्णं
द्विषत्प्रभेदान्यकुलानि भानि ॥ ३३ ॥
निर्ऋतिवसुजरौद्रराक्षसानि
स्थितचरितानि कुलाकुलानि भानि ।
प्रथममपि कुलाङ्कुभिः प्रवेश-
स्तदकुलभे रणभूतलं च पश्चात् ॥ ३४ ॥

इति सङ्ग्रामविजयोदये नक्षत्रविधानो नाम
षष्ठोऽध्यायः ॥

अथ सप्तमोऽध्यायः ।

अमृतान्यक्षरमरणव्याधिक्षयदिव्यसिद्धिवैराणाम् ।
विषनागपुष्कराणां विचित्रयोगांश्च वक्ष्यामि ॥ १ ॥
आदित्यमूलं श्रवणं शशाङ्के
धरासुते भाद्रपदो बुधेऽग्निजम् ।
मन्दे मरुद्भं भृगुभाग्ययुक्तं
पुनर्वसू मन्त्रिणि दिव्ययोगाः ॥ २ ॥
सावित्रमर्के शशिसौम्ययुक्ते
कुजाश्विनी चेन्दुसुतानुराधा ।
पुष्यं गुरौ भार्गवपौष्णयुक्तं
स्यात् सिद्धयोगा रविजेन्दुपत्नी ॥ ३ ॥
कुलर्क्षसंस्थः कलहं शशाङ्कः
करोति तत्स्वामिजयप्रदः स्यात् ।

---

१. 'दस्य कु' ख. पाठः. २. 'मा' ग. पाठः. ३. 'दं' ख. पा[ठः.]
४. 'ते' ग. पाठः. ५. 'हं मृगाङ्कः' ग., 'हं महाङ्कं क' ख. पाठः.

कुलाकुलस्थो हिमगुश्च सिद्धिं
कुलेतरस्थो यदि यायिसिद्धिम् । ४ ॥
सूर्यानुराधा शशिविश्वभाख्यं
भौमे शताख्यं च बुधेऽश्विनी स्यात् ।
देवाप्तसौम्यो भृगुजाहिभं च
संहारयोगो रविपुत्रहस्तः ॥ ५ ॥
भानोर्विशाखा शशिवारिभं च
भौमे धनिष्ठा बुधपौष्णयोगः ।
शुक्रे च पुष्यं गुरुरोहिणी स्या-
न्मन्दोत्तरा च क्षतयोग एवम् ॥ ६ ॥
ज्येष्ठा दिनेशे त्वभिजिच्छशाङ्के
भौमे[1]ऽजपादेव बुधे च याम्यम् ।
आर्द्रा गुरौ शुक्रमखा समेता
चित्रासिते स्याद् यदि नाशयोगः ॥ ७ ॥
रवौ मखा शीतकरे विशाखा धरासुतार्द्रा[2] बुधराक्षसे च ।
गुरौ शताख्या भृगुरोहिणी च स मृत्युयोगो यमवैश्वदेवः ॥
सूर्येऽग्नियाम्ये गुरुभं शशाङ्के
मखोरगौ भूमिसुते बुधे च ।
चित्रा विशाखा गुरुसौम्ययुक्ते
शुक्रे गुरुभं कमलोद्भवर्क्षम् ॥ ९ ॥
मन्दे शताख्यं श्रवणेन युक्तं
शुभे विनिन्द्यो यमखण्डयोगः ।

---

१. 'मो' क. पाठः. २. 'द्रान्बु च राक्ष' ख. पाठः.

शत्रुक्षयं व्याधिहरं च कुर्यात्
तत्कालवेलापरिबोधितं च ॥ १० ॥

गुर्वाक्यंशकतारके सुरगुरोर्वारेऽथवार्के दिने
• तस्मिंस्तद्दिनपांशके तदुदये रिक्तान्विते च[1] क्षितौ ।
कुर्याद् रुग्रणवैरिणां च महतीं नाशाय तत्तत्क्रियां
तेषां भेषज[3]हेमदानदहनच्छेदादिभिर्मानवः ॥ ११ ॥

आदित्यानलपञ्चमी रविसुते पौष्णाष्टमीसंयुते
प्राग्ज्येष्ठा च गुरौ सिते श्रवणकं षष्ठ्या समालिङ्गितम् ।
सप्तम्यां भरणी बुधे हिमकरे चित्रा द्वितीयान्विता
भौमे ब्रह्मपौर्णिमा प्रहनने योगो विपस्य ध्रुवः ॥ १२॥

ऐन्द्राग्निहस्तश्रवणानुराधायमर्क्षपादान्तिमके धरायाः[4] ।
धनुःकुली[5]रालिषु यन्मृ[6]दं चेद् गृह्णाति शत्रून्न वदेद् विवादे ॥

रिक्तायां विषविष्ट्यो[7]ः (पर्व)णि सूर्यात्मजस्य वारेऽस्मिन् ।
वापीकूपतटाकसरसां मलदाहनं कुर्यात् ॥ १४ ॥
मै[8]त्र्यंशकयोगे मैत्रमुहूर्ते च चन्द्रवेलायाम् ।
[9]रणदानाद् वा दानाद् रिपुरपि च तदा भवेन्मित्रम् ॥
अनिलानलवरुणफणिहरर्क्षरक्षोऽसपौष्णाचित्रायाम् ।
यद्येवं रविकुजयोर्वैरयोगो नन्दया युक्तः ॥ १६ ॥

---

१. 'वीक्षिते ।' क. घ. पाठः. २. 'तः', ३. 'हो', ४. 'याम्' ग. पाठः ५. 'भि' ख. पाठः ६. 'गं' क., 'तं' ग. पाठः. ७. ष्ट्योः (पौ)र्णे सू', ८. 'त्रे ध्यं' क., 'त्राग्न्यंश' ग. पाठः. ९. 'ऋणनाशोऽप्यल्पदानाद् रिपु' ग., 'ऋणनाशोऽल्प .... पु' ख. पाठः.

अन्त्येऽमावास्यायां त्रिनाडिकात्र्यंशके भुजङ्गर्क्षे ।
सार्पमुहूर्तसमेतः सनागकरणः स योगः स्यात् ॥ १७ ॥

शालीक्षुमाषयवातिलमुद्गश्रीपञ्चगव्यसहितानि ।
भूमौ धाम्नि खनित्वा क्षिपेत्[1] ससर्पे तु नागाख्ये ॥

इति सङ्ग्रामविजयोदये योगविधानो नाम
सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः ।

अथ पक्षिचक्रमेतद् वक्ष्यामि तदष्टवर्गसम्भूतम् ।
अष्टग्रहा[2]धिदैवं दिक्पालैरन्वितं सारम् ॥ १ ॥

अष्टोरगाष्टभैरवविष्टद्यष्टकदेवताष्टकोपेतम् ।
सुरयोन्यष्टकयुक्तं शुभाशुभो[3]द्दीपनं जगताम् ॥ २ ॥

गृध्रोलूकश्येना पिङ्गलिका कौशिकश्च सरसिभवः ।
विषभुग् गोवत्सोऽष्टौ पतत्रिणश्चाष्टवर्गेशाः ॥ ३ ॥

प्रागुत्तराग्निराक्षसयमवरुणसमीररुद्रनिलयस्थाः ।
रविचन्द्रभौमबुधगुरुशुक्रार्कजराहुभिर्युक्ताः ॥ ४ ॥

पिङ्गलिकायाः श्येनः श्येनाद् विषभुक् स कौशिकस्तस्मात् ।
कौशिकतः सरसिभवस्त[4]दुलूकस्तस्य गोवत्सः ॥ ५ ॥

काकारिः पिङ्गलिका माघे बलिनौ वसन्तसमयेऽपि ।
सारसशिखिनौ बलिनौ भाद्रपदे कौशिकश्येनौ ॥ ६ ॥

---

१. 'ज्ये', २. 'ष्ट' क. पाठः. ३. 'कं' ग. पाठः. ४. 'स्तलूक' ख. पाठः.

गोवत्सगृध्रविहगौ बलिनौ चैत्रेऽपि युद्धदुःसाध्यौ ।
इत्येवं मासबलं ज्ञात्वा तु [1]पतत्रिणां क्रमशः ॥ ७ ॥

निशि पिङ्गलिकोलूकौ दिनशेषे श्येनपक्षिणौ बलिनौ ।
प्रथमे सारसशिखिनौ मध्याह्ने कौशिकः कृष्णः ॥ ८ ॥

तत्तद्वेलायां च प्रबलाः सर्वे पतत्रिणः समरे ।
वेलाबलमाख्यातं सङ्ग्रामजयोदये सम्यक् ॥ ९ ॥

गृध्रो बलवान् ज्ञेयः प्रथमनवम्योश्च रुद्रहुङ्कारः ।
दशमीद्वितीययोरपि दुस्साध्यः सर्वजन्तूनाम् ॥ १० ॥

एकादश्यां श्येनस्तृतीयदिवसे महाबलोपेतः ।
वैष्णव्यां च चतुर्थ्यां स पिङ्गलो दुर्जयः प्रोक्तः ॥ ११ ॥

पञ्चम्यां मदनतिथौ सङ्ग्रामे कौशिकः खगो भुङ्क्ते ।
षष्ठ्यां च चतुर्दश्यां सरसिभवः शत्रुदुस्साध्यः ॥ १२ ॥

सप्तम्यां पूर्णतिथौ विषभुग्[2] बलवान् महारणे विजितः ।
अष्टम्यां गोवत्सः स जयेच्छत्रून् समस्तांश्च ॥ १३ ॥

एवं क्रमेण विहगाश्चरन्ति मासस्य[3] पक्षयोरुभयोः ।
सूर्यादिग्रहयुक्तास्तिथिवारैः स्वाश्रमासीनाः ॥ १४ ॥

यो भुङ्क्ते भवति बली यो मृतको युद्धभङ्गमाप्नोति ।
तेषां तिस्रो नाड्यस्त्रयश्च पादाः स्वतः काले ॥ १५ ॥

पुनरन्यममरचक्रं वक्ष्येऽहं युद्धशास्त्रतः सारम् ।
लाभालाभजयाजयै[4]जीवितमृतदीपनं सकलम् ॥ १६ ॥

---

१. 'पक्षिणां', २. 'भुक् प्रबलो र' ख. पाठः. ३. 'सेषु प' क. पाठः. ४. 'यमृतजीवितदी' ग. पाठः.

सुरदैत्यनागकिन्नरमुनिवररक्षःपिशाचमनुजास्ते ।
अकचटतपयशनाथाः पूर्वाद्याः पार्थिवे चक्रे ॥ १७ ॥

देवेभ्यो दैत्याः स्युर्दैत्येभ्यः पन्नगाश्च तद्बलिनः ।
गन्धर्वास्तेन्मुनयस्तेभ्यस्ते राक्षसा बलिनः ॥ १८ ॥

तेभ्यो दृढाः पिशाचास्तच्छ्रेष्ठा मानवाः समाख्याताः ।
उत्तममध्यममन्यत् सत्त्वगुणास्ते च पूर्वाद्याः ॥ १९ ॥

राक्षसपिशाचपन्नगदैत्याः सन्ध्यावसानसमये च ।
दिवसे च देवमुनयो मनुजाः सत्त्वाधिकाः समरे ॥२०॥

अथ वर्णचक्रमेतत् स्थानबलाधीशकालसंयुक्तम् ।
संक्षेपाद् वक्ष्येऽहं पुंसां सङ्ग्रामविजयाय ॥ २१ ॥

प्रथमादिर्ङकारान्ताः प्रथमांशे देवतालये बलिनः ।
चादिर्णकारान्तास्ते नृपोद्भवाः शत्रुसङ्कीर्णे ॥ २२ ॥

तादिमकारान्तास्ते नगरे बलिनो वणिक्समुद्भूताः ।
यादिहकारान्तास्ते शूद्रा गिरिगह्वरे बलिनः ॥ २३ ॥

अथ सकलचक्रसारं सकलेश्वरनिर्मितं परं पूर्वम् ।
यायिस्थायिबलाबलसन्दीपं सर्वलोकेषु ॥ २४ ॥

खगपतिविलाळसिंहग्राममृगव्याळमूषिकेभमृगाः ।
अकचटतपयशवर्गाः स्वांशाधीशाश्च पूर्वाद्याः ॥ २५ ॥

स्वस्थाने बलवन्तः परधाम्नि भवन्ति हीनवीर्यास्ते ।
परिघाक्रान्तस्थानात् पूर्वान्तास्ते म्रियन्ते च ॥ २६ ॥

---

१. 'स्युस्तदन्ये प', २. 'स्तु समुनय', ३. 'न्ध्योपासन्नसमये तु ।', 'द' ग. पाठः. ५. 'ङ', ६. 'म्नि न भ' ख. पाठः.

सर्पस्य खगः परिघो मार्जारो मूषिकस्य परिघोऽयम् ।
सिंहो गजस्य परिघो मेषस्य श्वा भवेत् परिघः ॥ २७ ॥

खगपोरगयोर्वैरं मूषिकमार्जारयोश्च शत्रुत्वम् ।
सिंहगजयोश्च वैरं मण्डलमृगयोर्महावैरम् ॥ २८ ॥

खगपतिविलाळसिंहग्राममृगाः शत्रुयायिनो बालिनः ।
सर्पाखुहस्तिहरिणाश्चत्वारः स्थायिनः समरे ॥ २९ ॥

स्थाननृपभृत्यवनितासहायगुरुबन्धुवाहनाद्याश्च ।
वश्याः स्ववर्गजाताः प्राणहराः शत्रुवर्गस्थाः ॥ ३० ॥

वश्यांशा ये च नराः स्नेहकरास्ते धनप्रदाश्चापि ।
वधकांशाः प्राणहराः स्त्रीनृपभृत्याः सहायाश्च ॥ ३१ ॥

गरुडाद् बली विलाळस्तस्मात् सिंहस्ततो नखी बलवान् ।
नखिनः फणी तदाखुर्बलवान् द्विरदस्ततो मेषः ॥ ३२ ॥

ये दीर्घकैलावन्तस्ते जयिनः स्थायिनोऽपि सङ्ग्रामे ।
ये ह्रस्वकलोपेता नहि जयिनो यायिनोऽपि नराः ॥ ३३ ॥

स्वांशेऽरिमित्रभेदं जानीयात् पञ्चभिः स्वरैस्तत्र ।
बालकुमारस्वामिस्थविरमृतानुक्रमेणैव ॥ ३४ ॥

अथ पुनरन्यं वक्ष्ये नामस्वरशत्रुमित्रवर्णनयम् ।
वर्गाष्टकसंयुक्तं स्वरान्वितं तज्जगत्ख्यातम् ॥ ३५ ॥

---

१. 'ण' ख. ग. पाठः. २. 'स' ग. पाठः. ३. 'डादपि च वि' ख. पाठः. ४. 'कालव', ५. 'का' ग. पाठः. ६. 'शो' ख. पाठः. ७. 'नि' क. घ. पाठः. ८. 'तं जग' ग. पाठः. ९. 'गदूव्याप्तम् ॥' क. घ. पाठः.

अकचटतपयशवर्गाः पूर्वाद्यास्ते भवन्ति तेऽष्टौ च ।
ते पञ्च स्वरभेदाः[1] क्रमेण नवकोष्ठके तत्र ॥ ३६ ॥
प्रथमः स्वरो द्वितीयः कचटतपयशो नवाक्षरो वर्गः ।
इद्वयखछठथफरषा द्वितीयवर्गः समुद्दिष्टः ॥ ३७ ॥
पञ्चकला षष्ठकला गजडदबलसौ[2]स्तृतीयवर्गोऽयम् ।
एऐघझढधभवहाश्चतुर्थवर्गः समाख्यातः ॥ ३८ ॥
ओ औ बिन्दुविसर्गौ ङञणनमाश्चैव पञ्चवर्गोऽयम् ।
इत्येवं पञ्चस्वरनवांशकोऽयं समाख्यातः ॥ ३९ ॥
अरिमित्रराजसेवाभार्यासम्बन्धि[3]मन्त्रिदेवानाम् ।
स्वांशाः[4] फलदाः[5] ज्ञेयाः[6] प्राणहराः[7] शत्रुवर्गांशाः[8] ॥ ४० ॥
नाम्नः पञ्चमवर्गः शत्रुर्लाभस्तृतीयवर्गोऽयम् ।
कौमारः स्वल्पफलः फलरहितोऽयं चतुर्थांशः[9] ॥ ४१ ॥
अथ कथयामि समासादायबलं सर्वकार्यसन्दीपम् ।
अकचटतपयशपतयः प्रागाद्यास्ते तदाष्टायाः ॥ ४२ ॥
ध्वजधूमसिंहमण्डलवृषभखरद्विरदवायसाश्चाष्टौ ।
प्रातिप(त्? दमा)रभ्य ततः प्रभुञ्जते तत्र पूर्वाद्याः ॥४३॥
ध्वजवृषभ[10]सिंहवारणतिथिषु नरैः[11] पूर्वमाहवं गच्छेत् ।
ध्वाङ्क्षखरधूममण्डलदिनतिथिकाले ततः पश्चात् ॥ ४४ ॥
ध्वाङ्क्षाद् ग्राममृगः शुनोऽधिकबलस्तस्मात् खरस्तद् वृष-
रतस्मान्मत्तगजो गजाद् द्विपरिपुस्तस्माद् ध्वजस्तद्ध्वजात् ।

---

१. 'दात् क' क. पाठः. २. 'स' क. ग. पाठः. ३. 'न्धितन्त्रदे' ख. पाठः. ४. 'शः' ग. पाठः. ५. दो', ६. 'यः', ७. 'रः', ८. 'शः' क. ग. पाठः. ९. 'र्थोंऽ' ग. पाठः. १०. 'भवारणासिंहति' क. घ. पाठः. ११. 'रः सर्वदा भयं ग' ख. पाठः.

धूमो वीर्यतमस्ततः परतरो नास्त्याथर्वृन्देन वा
वक्ष्यायस्य बलाबलोदयगतिं यो वेत्ति सोऽयं बुधः ॥४५॥

इति सङ्ग्रामविजयोदये पक्षिचक्रपरिज्ञानं नाम
अष्टमोऽध्यायः ।

अथ नवमोऽध्यायः ।

सकलजगदुदयहेतोः सवितुश्चारो निगद्यतेऽद्य मया ।
सकलफलाफलजीवितजयाजयोद्दीपनं पुंसाम् ॥ १ ॥
आदित्यवशाः सर्वे ग्रहस्वराशोर्डुवर्णराशिखगाः ।
उद्यन्तेऽत्र मुहूर्ताः फणिनो रुद्रांशकाः सततम् ॥ २ ॥
तस्मादादित्यबलं सर्वेषामुत्तमोत्तमं श्रेष्ठम् ।
तज्ज्ञातव्यं सम्यग् यत्नेन सुधीमतात्मविदा ॥ ३ ॥
दग्धं स्थितमभिलषितं विद्धं दृष्टं च यस्य सङ्क्रमितम् ।
ऋक्षं रविणा ग्रस्तं युद्धे तद् वर्जयेत् पुरुषः ॥ ४ ॥
सप्तशलाकाचक्रं पूर्वाद्यं सर्वकार्यसन्दीपम् ।
आग्नेयादियमान्तं समालिखेद् युद्धभूमितले ॥ ५ ॥
भुक्तं दग्धं रविणा स्थितं समालिङ्गितं च नक्षत्रम् ।
अभिलषितं तस्याग्रे स्थितं शलाकाहतं विद्धम् ॥ ६ ॥

---

१. 'मो', २. 'ण च विद्या य' ख. पाठः. ३. 'ध्या' ग. पाठः. ४. 'लोद' ख. पाठः. ५. 'लविजयापजयादिदीप' क. पाठः. ६. 'यापजयदीप' ख. पाठः. ७. 'ज्ञात्' क. ग. पाठः. ८. 'डुरा-शिवर्णकला:' ग. पाठः. ९. 'न्यक् तदनेन' क. घ. पाठः. १०. 'च स' ग. पाठः. ११. 'सप्तकाङ्क्स' क. पाठः.

यस्य रविणाभिदग्धं जन्मर्क्षं तस्य मृत्युराख्यातः ।
यस्यालिङ्गितमृक्षं नाम्नस्तस्याहवे[1] निधनम् ॥ ७ ॥
यद्धूमाकुलमृक्षं यस्यास्ते तस्य विग्रहे भङ्गः ।
यस्य शलाकाविद्धं कुलक्षयस्तस्य निर्दिष्टः ॥ ८ ॥
जन्मत्रयनाम[2]र्क्षं दग्धाश्लिष्टं प्रवि[3]द्धधूमहतम् ।
सवितुर्गाढं किरणैर्यस्यास्ते तस्य मरणं स्यात् ॥ ९ ॥
यस्याधार्नं(वि ? भ)विद्धं मरणं तस्यैव भानुना गाढम् ।
कर्मभविद्धो निस्स्वो जन्मभविद्धो भयं तस्य ॥ १० ॥
रेखाद्वयमालिख्य द्वाभ्यां तद् भेदयेत् पुनश्चापि ।
रेखाचतुष्कमासां कोणेषु च दाप[5]येन्मतिमान् ॥ ११ ॥
ईशस्थाने मेषं सिंहं प्राच्यां धनुः शिखिस्थाने ।
तत्पार्श्वगतो वृषभो याम्ये कन्या मृगः कोणे ॥ १२ ॥
तस्य समीपे मिथुनं तुला च वरुणे घटश्च वायव्ये[6] ।
कर्किस्तस्य समीपे सौम्ये कीटो झषश्चान्त्ये ॥ १३ ॥
द्वादशराशिसमेतं चक्रं संलक्षयेच्चतुष्कुम्भम् ।
राशित्रितयं कुम्भं रिक्तं पूर्णं रवेश्च वशात् ॥ १४ ॥
यस्मिन् कुम्भे सूर्यः स्थितो भवेद् रिक्तकुम्भमशुभंकरम् ।
पूर्णं तदग्रकुम्भं जयप्रदं सर्वसिद्धिकरम् ॥ १५ ॥
यन्मासे यत्र रविर्दिग्राशौ तिष्ठति [7]त्रिशूलाख्ये ।
सा दिग् विवर्जनीया शुभेषु रविसञ्चारी नित्यम् ॥ १६ ॥

---

१. 'वे भवेन्निध' ख. पाठः. २. 'भ', ३. 'सि' घ. पाठः. ४. 'नं विद्धं' ग. पाठः. ५. 'येत् तानि ।' क. ख. पाठः. ६. 'घटश्चा' ख. पाठः. ७. 'स' ग. पाठः.

न कृषिं न च वाणिज्यं न स्थानं नाहवं न माङ्गल्यम् ।
न विवाहं न च यात्रां न वेशनं कारयेद् धीमान् ॥ १७ ॥

दिक्षु विदिक्षु च संस्थं सूर्यकवाटं समस्तदोषकरम् ।
आत्मार्थहरणमुग्रं तत् स्थानं वर्जयेन्मतिमान् ॥ १८ ॥

पुनरुदयादित्यबलं वक्ष्येऽहोरात्रमध्य[1]तः सारम् ।
प्राच्यां प्रथमप्रहरे मध्याह्ने चोत्तरे सवितुः ॥ १९ ॥

त्रिप्रहरे वायव्ये वारुण्यामस्तमे ततो दृष्टिः ।
निर्ऋतौ च निशायामे शङ्करनिलयेऽर्द्धरात्रेऽपि ॥ २० ॥

प्रहरत्रयेऽपि याम्ये निशान्तकालेऽग्निदिग्वि[2]शेषस्थः ।
अ[3]ग्रेस्थितस्य समरे दृष्टेर्घातं रविः कुरुते ॥ २१ ॥

पृष्ठे स्थितस्य विजयः साक्षात् तस्यैव निर्दिष्टः ।
इत्थंप्रकारविदितं ज्ञातव्यं तद्बलं विदुषा ॥ २२ ॥

अथ रविचक्रं वक्ष्ये समस्तहोरागमोत्तमं तथ्यम् ।
जीवितमरणजयाजयलाभालाभप्रदीपं च ॥ २३ ॥

यदधस्त्रिशूलमूर्ध्वं त्रिदण्डनवशृङ्गसंयुतं चक्रम् ।
पावकमरुद्द्विरेखं याम्योत्तरभिन्नषड्रेखम् ॥ २४ ॥

संलिख्य भूप्रदेशे समस्ततारा: क्रमेण तच्चक्रे ।
विन्यस्य च सं[4]गणयेत् प्रारभ्याधस्त्रिशूलाग्रात् ॥ २५ ॥

ऋक्षत्रयं त्रिशूले त्रिदण्डनवशृङ्गमध्यनवताराः ।
मरुदनलयोश्चतुष्कं दक्षिणसौम्ये द्विषट्कं च ॥ २६ ॥

---

१. 'स्य तत्सारम् ।' क. घ. पाठः. २. 'देशस्थः' क. ग. पाठः. ३. 'ग्नि' ग. पाठः. ४. 'तं' ख. पाठः.

पूर्वं त्रिशूलमध्ये दिनकरसंस्थं च विन्यसेदृक्षम् ।
पश्चात् क्रमेण शेषं संगण्य जयाजयं ब्रूयात् ॥ २७ ॥
दग्धं श्लिष्टं धूपितमनेन पूर्वं त्रिशूलसंस्थं च ।
तज्जन्मर्क्षं यस्य हि मरणं तस्याहवे प्राहुः ॥ २८ ॥
नवशृङ्गस्थितताराः कष्टाश्चत्वारि पुण्यरूपाणि ।
त्रीणि क्रूराणि सदा द्वादशकाः सौम्यरूपिण्यः ॥ २९ ॥
आग्नेयवायुसंस्थाः सदा चतस्रो जयप्रदायिन्यः ।
द्वादश शूलाग्रस्थाः समरे मृत्युप्रदाः प्रोक्ताः ॥ ३० ॥
रविचक्रबलं कथितं होराशास्त्रार्णवात् समुद्धृत्य ।
पुनरन्यद् वक्ष्येऽहं लाभालाभस्वरूपं च ॥ ३१ ॥
रविकुजगुरुसौराणामग्रे रविगुणरसाष्टमास्ताराः ।
शशिबुधसितोरगाणां पृष्ठे द्विमुनीषुनवसंख्याः ॥ ३२ ॥
उल्का दशमं सवितुर्भूकम्पः सप्तमं च नक्षत्रम् ।
मोघं त्रिसप्तमर्क्षं त्रिपञ्चमं ब्रह्मदण्डोऽयम् ॥ ३३ ॥
उद्वेगदहनमुल्का कुरुते मोघं भयं महामृत्युम् ।
सर्वविनाशं दण्डः स्थानभ्रंशं क्षणात् कम्पः ॥ ३४ ॥
यात्राविवाहमङ्गलसङ्ग्रामारम्भवेश्मवेशेषु ।
विद्यार्थार्जनसस्यप्रारम्भे वर्जयेत् तानि ॥ ३५ ॥
सङ्क्रान्तिचक्रमन्यत् फलाफलोद्दीपमत्र कथयामि ।
शूलार्पितत्रिकोणे त्रिषट्कबिन्दुं त्रिदिक्षु गतम् ॥ ३६ ॥

---

१. 'बलाबलं ब्रू' क. ख. घ. पाठः. २. 'शि' ख. पाठः. ३. 'दूषित' क. ख. पाठः. ४. 'द्वाविंशसु', ५. 'खं', 'क्षं' ग. पाठः. ६. 'कं' ख. पाठः.

आलिख्य सूर्यसंस्थं नक्षत्रं शूलमध्यगं न्यस्त्वा ।
ब्रूयात् संगण्य फलं सर्वेषां प्राणिनां नियमम् ॥ ३७ ॥
द्रव्यक्षयमर्थाप्तिं स्थानवियोगं क्रमात् स्थितिप्राप्तिम् ।
भूपारिभयविरोधं नृपसत्कारं रविः कुरुते ॥ ३८ ॥
अथ संक्रान्तिनयानयपूर्वं कथितानि यानि पौलस्त्यात् ।
सप्तविधा सङ्क्रान्तिः फलाफलोद्दीपिनी ज्ञेया ॥ ३९ ॥
ध्वाङ्क्षी महोदरीयं घोरा[2] मन्दाकिनी सुमन्दा च ।
मिश्रकला नक्तचरी विज्ञेयाः सूर्यवाराद्याः ॥ ४० ॥
ध्वाङ्क्षी वैश्यहिता स्यान्महोदरी म्लेच्छचोरशबरहिता ।
घोरा[4] चतुर्थसुखदा[5] नृपतिषु मन्दाकिनी शस्ता ॥ ४१ ॥
ब्रह्मप्रिया च *मन्दा गोमृगसुखदा च †मिश्रका ज्ञेया ।
नक्तचरी नटकाप्ता विज्ञेयाः सप्त संक्रान्त्यः ॥ ४२ ॥
नृपपीडां पूर्वाह्णे मध्याह्ने ब्रह्मजातिसन्तापम् ।
अपराह्णे वणिगार्तिं चास्तमये शूद्रपीडां च ॥ ४३ ॥
सान्ध्ये चतुष्पदार्तिं नटनर्तकदुःखमर्धरात्रे तु ।
त्रिप्रहरे स्वामिवधं पीडां सल्लिङ्गिनामुषसि ॥ ४४ ॥
ऊर्ध्वमुखी रविमुक्ता होरा सर्वार्थदायिनी प्रोक्ता ।
साधोमुखी च न शुभा तदग्रगा तिर्यगर्थहरा ॥ ४५ ॥

---

१. 'ल' घ. पाठः. २. 'हो' क. पाठः. ३. 'सप्त सङ्क्रान्त्यः ॥' ग. पाठः. ४. 'हो' क. पाठः. ५. 'शुभदा' ख. पाठः. ६. 'सन्ध्या च' ग. पाठः. ७. 'सङ्क्रान्तिर्लिङ्गि' क. ख. घ. पाठः.

---

* 'सुमन्दे'ति पूर्वं पठिता । † 'मिश्रकले'ति पूर्वमुक्तम् ।

मूर्ध्नि त्रीणि मुखैकमक्षियुगले द्वे[1] चाष्ट हस्तद्वये
चाष्टौ पादयुगे च पञ्च हृदये भानि[2] क्रमाद् विन्यसेत् ।
राज्यं मस्तकभे बुधो वदनभे भोगी भवेन्नेत्रभे
दस्युर्बाहुगभे[3] धनी हृदयभे हीनायुरङ्घ्रिद्वये ॥ ४६ ॥
बालकस्य तु शुभाशुभमादौ सूर्यचन्द्रैनयतः[4] परिगण्य ।
पण्डितो वदतु वेधविवेधात्[5] कालमृत्युमपमृत्युममोघम् ॥ ४७ ॥

इति सङ्ग्रामविजयोदये रविचारचक्रचङ्क्रमणो नाम
नवमोऽध्यायः ॥

अथ दशमोऽध्यायः ।

अथ चन्द्रचारचेष्टास्वभावगुणचित्तवृत्तिसत्त्वबलम् ।
ब्राह्मीयाद् वक्ष्येऽहं तद्राज्ञःशत्रुविजयाय ॥ १ ॥
आत्मविदाममृतोऽयं विधेर्मनःशक्तिरीश्वरस्यैव ।
अपां[6] भर्ता[7] सृष्टिः सर्वेषां चन्द्रमाश्च भवेत् ॥ २ ॥
तिथिरेकगुणोपेता[8] नक्षत्रं तच्चतुर्गुणं प्रोक्तम् ।
वारोऽष्टगुणः साक्षाच्चन्द्रो[9]ऽयं शतगुणः प्रोक्तः ॥ ३ ॥
वर्णायस्वरहोरानक्षत्रग्रहमुहूर्तसंस्थश्च ।
चन्द्रः सप्तविधोऽयं ज्ञातव्यः शास्त्रसंविद्भिः ॥ ४ ॥
अर्धेन्दुसदशमाद्यं चतुस्त्रिशूलान्वितं समालिख्य[10] ।
संस्थितशूलाग्रान्तः[11] पञ्चस्वरबिन्दुशूलं[12] च ॥ ५ ॥

---

१. 'द्वेऽष्टौ च ह' क. घ. पाठः. २. 'ता' घ. पाठः. ३. 'ते' क. ख. घ. पाठः. ४. 'क्रनयन' क. ख. पाठः. ५. 'न्' ग. पाठः. ६. 'आ' क. ङ. पाठः. ७. 'ह' ख. पाठः. ८. 'ता यन्नक्षत्रं चतु' ख. ग. पाठः. ९. 'क्षात् स चन्द्रमाः श' क., 'क्षाचन्द्रमाः श' ग. पाठः. १०. 'ख्यातम् ।', ११. 'ग्रस्थं प' ख. पाठः. १२. 'शूलमूलं' ग. पाठः.

शूलस्याग्रे द्वादश नक्षत्राणीह मध्यदेशे तु ।
द्वादश भानि क्रमशो बाह्ये चत्वारि विन्यस्य ॥ ६ ॥
आद्योऽधः शृङ्गस्थे सौम्ये शृङ्गे स्वरो द्वितीय(श्च ? श्व) ।
यमशृङ्गगस्तृतीयः प्रणवो ग्रन्थौ चतुर्मध्ये[1] ॥ ७ ॥
भौमोऽर्धः शृङ्गगतो दक्षिणशृङ्गे च[2] गुरुबुधौ वामे ।
शुक्रो मध्यमशृङ्गे मन्दो ग्रन्थौ समाख्यातः ॥ ८ ॥
यन्मासे प्रथमतिथौ चन्द्रेणाधिष्ठितं च नक्षत्रम् ।
तदधःशूलविमध्ये न्यस्त्वा मेषादि सङ्गण्य ॥ ९ ॥
शूलचतुष्के मृत्युर्विजयो मध्यद्विषट्कसंस्थे च ।
बाह्यचतुष्के च भयं विज्ञेयं चन्द्रतः सर्वम्[3] ॥ १० ॥
अर्धशशाङ्काकारं याम्योत्तरमध्यभागनवशृङ्गम् ।
संलिख्य चन्द्रशूलं समस्ततारागणोपेतम् ॥ ११ ॥
याम्यत्रिशूलमध्यमशृङ्गे चन्द्रस्थितं च नक्षत्रम् ।
न्यस्त्वा क्रमेण शेषं सङ्गण्य जयाजयं ब्रूयात् ॥ १२ ॥
नवशूलस्थे मरणं युधि विजयोऽन्तर्द्विपट्कसंस्थे च ।
बाह्ये भयं च षट्के जन्मर्क्षे तस्य निर्दिष्टम् ॥ १३ ॥
दक्षिणवामर्क्षाणां वक्ष्यामि फलं पृथक् पृथक् सारम् ।
समपादे समभेऽस्मिन् विजयः स्याद् वामकुक्षिगते ॥१४॥
एकचरणे त्रिशूले व्याधिर्भङ्गो द्विपादनक्षत्रे ।
त्रिपदे त्रिपादयुक्ते विजयस्तस्याभिनिर्दिष्टः ॥ १५ ॥

---

१. 'घ्रश्च' क. घ. पाठः. २. 'श्च' ग. पाठः. ३. 'ब'

[1]भङ्गस्त्रिपा[2]दयुक्ते दक्षिणशृङ्गे समेऽथ रोगभयम् ।
सव्येतरपार्श्वे द्वे सिद्धिकरे दक्षिणे सन्धिः ॥ १६ ॥

जन्मनि कर्मणि गर्भे नक्षत्रे वाथ चन्द्रमारूढे ।
अष्टमराशौ लग्ने यस्य प्राप्तेऽपि तन्मरणम् ॥ १७ ॥

पूर्वं यन्नक्षत्रं प्रगण्यते यत्र संस्थितश्चन्द्रः ।
ताडयतु षष्टिभि(स्तैश्च ? स्तच्च)न्द्रावस्थां समुद्दिश्य ॥ १८ ॥

तत्पिण्डे संयुक्ता नक्षत्रस्यैव नाडिकास्तत्र ।
पश्चाद् दिनघटिका[3]यां व्युत्क्रान्तायां [4]क्षिपेद् राशिम् ॥

तत् सन्ताड्य चतु[5]र्भिर्भोगं कुर्यात् सपञ्चतारेण ।
[6]तल्लब्धं च गृहीत्वा द्वादशभि[7]र्भज्यते तत्र ॥ २० ॥

[8]शेषावस्था ज्ञेया लब्धा भुक्तिः प्रकीर्तिता सद्भिः ।
दिनराशिविभागैस्ताः शेषा नाड्यः समाख्याताः ॥ २१ ॥

चरितः स्वस्थो मृतवान् हसितो जातो ज्वरी सु(मर ? रम)-
[णश्च ।
नष्ट उपोषित इन्दुः क्रीडितसुप्तः प्रभुक्तश्च ॥ २२ ॥

चरितः करोति भङ्गं स्वस्थः स्वास्थ्यं मृतश्च मरणभयम् ।
हसितस्तुष्टिं जातो लाभं ज्वरितो ज्वरं चन्द्रः ॥ २३ ॥

रमितो रागोद्दीपं नष्टो नष्टं ह्युपोषितः कलहम् ।
क्रीडी विजयं सुप्तः सुखं प्रभुक्तः शुभं नित्यम् ॥ २४ ॥

---

१. 'रोगं त्रिपा' क. घ. पाठः. २. 'भागयु', ३. 'भ्यां' ग. पाठः. ४. 'भवेद् राशिः ॥' क. ख. घ. ङ. पाठः. ५. 'र्भ्राहं कु' ख. पाठः. ६. 'य' क. पाठः. ७. 'र्भु' ग. पाठः. ८. 'ए' ख. पाठः.

द्वादश शशिनोऽवस्थाः कथिताः सम्यक् समासतस्तस्य ।
ज्ञात(व्या ? व्यो ऽ)नेन ततो जयाजयौ[१] युद्धकाङ्[२]क्षाणाम्
[॥ २५ ॥

ताराचक्रमपूर्वं कथयामि शुभाशुभाभिसन्दीपम् ।
ऊर्ध्वं नवरेखाभिर्विलिखेत् तिर्यक् त्रिरेखाभिः ॥ २६ ॥

आग्नेयादियमान्तं न्यस्त्वा भकुलं त्रिरन्ध्रकूटेषु ।
यस्मिन् क्रूरस्तिष्ठति तस्मिन् वेधः समुद्दिष्टः ॥ २७ ॥

आधानजन्मकर्म[३]विपन्निधनकर्मसहजानि विद्धानि ।
यस्यैव सन्ति मरणं तेभ्यस्तस्यैव निर्दिष्टम् ॥ २८ ॥

यदि सौम्यग्रहविद्धं नहि मरणं तस्य जन्मनामर्क्षम् ।
क्रूराक्रूरविविद्धं क्षतं भयं वाथ सङ्ग्रामे ॥ २९ ॥

अथ सूर्यात्मजचारं सर्वेषां प्राणिनां शुभाशुभदम् ।
संक्षेपाद् वक्ष्येऽहं होराशास्त्रार्णवात् सारम् ॥ ३० ॥

आब्रह्मस्तम्बान्तं भूतग्रामं चतुर्विधं प्रोक्तम् ।
यः संहरेत् समस्तं शनैश्चरः स्यात् स कालाख्यः ॥ ३१ ॥

तद्भुक्तगू[६]ढविद्धस्थितानि चत्वारि भानि घोराणि ।
तानि त्यजेन्नयज्ञो जयाभिकाङ्क्षी नरः समरे ॥ ३२ ॥

यद् भुक्तं तद्दग्धं तेनाश्लिष्टं स्थितं तदग्रस्थम् ।
यद्धूमं तद्विद्धं सप्तशलाकास्थि[८]तं चर्क्ष[९]म् ॥ ३३ ॥

---

१. 'यौ' ख. पाठः. २. 'काङ्क्षिणा ताराः ॥ अथ च' ग. पाठः. ३. 'णि धनसहजभानुरर्धानि ।', ४. 'यं' ख. पाठः. ५. 'समुद्धृत्य ॥' ग. पाठः. ६. 'दृष्टवि' क. ख. घ. पाठः. ७. 'च नक्षत्रम् ॥', ८. 'न्वितं च नक्षत्रम्' ग. पाठः. ९. 'क्रम् ॥' क. घ. पाठः.

तस्यैव भुक्तिवेलादृष्टिस्थानं च वक्ष्यतेऽद्य मया ।
प्रथमं दिवसाधिपतिः समुदेति ततो ग्रहाः शेषाः ॥ ३४ ।
षोडशभागैर्भक्तं दिनरात्र्योर्यच्छनैश्चरस्यात्र ।
सा भुक्तिर्मृत्युमुखी समरे[1] नहि सङ्ग्रहीतव्या ॥ ३५ ॥
भौमार्कयोस्तु भागौ परिस्मृतौ भङ्गरोगदौ विशुभौ ।
भागौ हिमकरबुधयोः शुभप्रदौ भोगदौ भवतः ॥ ३६ ॥
सुरगुरुभार्गवभागौ शुभदावायुःप्रदौ च सङ्ग्रामे ।
दिनकरसुतस्य भागः संहारो मृत्युदो भवति ॥ ३७ ॥
यात्राविवाहमङ्गलसेवाराजेष्टदर्शनं सर्वम् ।
नाशयति तस्य वेला दृष्टं नष्टं मृतं चैव ॥ ३८ ॥
वाराधिपतिर्भुङ्क्ते पूर्वान्तिमयोर्दिनस्य रात्रेश्च ।
पश्चात् तत्र क्रमशः प्रभुञ्जते[2]ऽपि ग्रहाः शेषाः ॥ ३९ ॥
वक्त्रकराङ्घ्रिद्वयकटिकुक्षिशिरोनेत्रयुग्मगुह्येषु ।
चन्द्रयुगानल[3]गुणयुगभूताग्नि[4]कराङ्घ्रयो न्यस्ताः ॥ ४० ॥
दुःखार्थलाभदेशभ्रमणक्षतभोगराज्यतुष्टिवधाः ।
वक्त्रार्पितसौरिस्थितनक्षत्रादिक्रमात् प्रोक्ताः ॥ ४१ ॥
अथ गुळिकः क्रूरतमः[5] शनैश्चरस्यात्मजः खलः पापः ।
सर्पाकृतिरत्युग्रो निगद्यते सर्वसत्त्वहरः[6] ॥ ४२ ॥
नीलाञ्जनसङ्काशो रक्ताक्षो विषमभीषणो दीर्घः ।
पञ्चास्यः पृथुदंष्ट्रो भयङ्करः सर्वहा गुळिकः ॥ ४३ ॥

---

१. 'तस्मिन् मरणं न सं' ग. पाठः २. 'द्वि' क. ख. पाठः. ३. 'नि' क. घ. पाठः. ४. 'ङ्घ्रि', ५. 'रः' क. ग. पाठः. ६. 'भङ्करः' ग. पाठः.

यात्राविवाहमङ्गलविद्याद्रव्यार्जनादि[1]सेवायाम् ।
भोजनजलावगाहनशय्यादिषु वर्जयेद् गुळिकम् ॥ ४४ ॥

गुळिकं वदन्ति केचित् समरतसन्धिस्थमैन्द्रशास्त्रज्ञाः ।
केचिच्छनैश्चरगतं शुक्रगतं केचिदाचार्याः ॥ ४५ ॥

तद्भुक्तिं वक्ष्येऽहं समकाले सर्ववारवेलायाम् ।
अर्धप्रहारयुक्तां[2] भयङ्करीं[3] सर्वसत्त्वानाम् ॥ ४६ ॥

भू[4]तार्तिकरो ज्ञेयो ध्रुवश्च गुळिकस्य सर्वलोकेषु ।
तद् दिनपेन च गुणितं षष्ट्या विभजेत् ततो लब्धाः ॥

नाड्यः शेषविनाड्यः समस्तभूतात्मनाशकारिण्यः ।
ब्रह्माच्युतवृषभध्वजरूपिण्यः सर्वकालेषु ॥ ४८ ॥

सूर्या[5]दीनां प्राप्तिः षट्शरयुगवह्निनेत्रचन्द्रहताः ।
तुरगरसबाणयुगगुणकरेन्दुभिस्तस्य मोक्षोऽयम् ॥ ४९ ॥

तद्वारादियमान्तं त्रिंशद्गुणितं प्रमाणपरिहीणम् ।
वसुहृतेना(ड्य ? डि)विनाड्यः प्रोक्तास्तात्कालिको गु-
[ळिकः ॥ ५० ॥

कस्या[6]मुदेति कालो गुळिकस्यार्धः स कालहोरायाम् ।
शुभकार्येषु निषिद्धो[7] विशुभेष्वथ सङ्ग्रहीतव्यः ॥ ५१ ॥

अथ विषमकालगुळिकं वक्ष्येऽहं पूर्वशास्त्रतः सारम् ।
वसुभिर्दिनं च भक्तं लब्धं षष्ट्या हृतं पश्चात् ॥ ५२ ॥

---

१. 'रि' ग. पाठः. २. 'क्ता', ३. 'री' ख. ग. पाठः.
४. 'क्षि' क. ग., 'भि' ख. घ. पाठः. ५. 'न्नाड्य' ख. ग. पाठः.
६. 'वस्य कां' क. ग. ङ. पाठः. ७. 'द्धा' क. ख. पाठः.

राश्युर्वारुकमेतत् षष्ट्यापहृतं फलानि तत्रैव ।
संस्थाप्य वसुविभक्तं लब्धं राशौ च सं(यु ? यो)ज्य ॥
दिनपेन गुणितराशिं समुद्धरेत् षष्टिभिस्तु तल्लब्धाः ।
नाड्यो ज्ञेयास्तस्मिन् फलानि शेषाणि चान्तानि ॥
विषमः कथितः साक्षाद् गुळिको लोके भुजङ्गरूपोऽयम् ।
तं वर्जयेत् प्रयत्नाद् यदि वाञ्छेद् दीर्घजीवित्वम् ॥ ५५ ॥
यामार्धपञ्चमेऽस्मिन् निहन्त्यसौ भानुमसमे साक्षात् ।
चन्द्रं चतुर्थषष्ठे कुजस्तृतीये दशार्धे च ॥ ५६ ॥
द्विचतुर्थयोश्च सौम्ये प्रथमे सूरिस्तृतीयके हन्ति ।
शुक्रे स सप्तमेऽस्मिन् द्वितीयके हन्ति तत्काले ॥ ५७ ॥
षष्ठे मन्दो हन्ता प्रथमो मृत्युः प्रकीर्तितो लोके ।
उदयः कालस्य ततो मया समासात् समुद्दिष्टः ॥ ५८ ॥
तस्य स्थानं वक्ष्ये प्राच्यामुदितं दिनाधिपं न्यस्त्वा ।
अपसव्यक्रमयोगात् संगण्य वदेत् ततो भ्राम्यन् ॥ ५९ ॥
यत्रास्ते सूर्यसुतस्तत्रासीत् कालचोदितो गुळिकः ।
सार्धप्रहरविभोक्ता ज्ञेयो भूचक्रतः सम्यक् ॥ ६० ॥

सूर्यादयोऽष्टौ सततं ग्रहास्ते
येऽनन्तपूर्वाः फणिनस्ततोऽष्टौ ।
यामार्धभोग्याः प्रचरन्ति साक्षात्
समस्तवारेषु यथाक्रमेण ॥ ६१ ॥

१. 'राशिर्वा' ख., 'शान्त्युर्वा' घ. पाठः २. 'कं च' क. पाठः. ३. 'ह' ख. पाठः. ४. 'मे' ख. ग. पाठः. ५. 'म्यः ।' क. ग. पाठः. ६. 'भक्तो ज्ञे', ७. 'भ्रान्त' क. पाठः.

वाराधिनाथो दिवसस्य रात्रे-
राद्यन्तभोगीह ततस्तु शेषाः ।
विभुञ्जते षट् क्रमशो ग्रहास्ते
रात्रौ दिवा वा बलवान् दिनेशः ॥ ६२ ॥

इति सङ्ग्रामविजयोदये चन्द्रशनिचारगुलिकविधानो नाम
दशमोऽध्यायः ॥

अथैकादशोऽध्यायः ।

अथ राहुचाररूपं देवासुरयक्षदैत्यदुर्लङ्घ्यम् ।
समरे जयाय राज्ञां ग्रहाधिकं तत् प्रवक्ष्यामि ॥ १ ॥

यो रविचन्द्रौ[1] ग्रसते यस्माद् विलयः समस्तभूतानाम् ।
दिक्फणिनो यस्यांशाः स कालरूपो महान्[2] राहुः ॥ २ ॥

संवत्सरमासतिथिप्रहरदिशाराशिभांशनाड्या(द्याः ? द्यैः)।
सोऽप्यष्टधा विभिन्नश्चरति सदा कालरूपेण ॥ ३ ॥

संवत्सरराहुरसौ प्रथमो दिनरात्रिषष्टिनाड्यशनः ।
षष्टिर्नाड्यश्च तयोर्दिनरात्र्योर्वत्सराः प्रोक्ताः ॥ ४ ॥

प्राक् प्रभवादिवृषान्तं याम्ये चित्रादिदुर्मुखान्तं च ।
अहिमाद्यविरोधान्तं वरुणे धात्रिक्षयान्तं च ॥ ५ ॥

एवं विचरेद् राहुः कालः संवत्सरेषु सर्वेषु ।
तदधिष्ठितनक्षत्रं ज्ञातव्यं चानुपूर्व्येण ॥ ६ ॥

अपसव्यक्रमयोगाद् राशिषु सर्वेषु भेषु वर्षाख्यः ।
एकस्यां होरायां सोऽष्टादशमासभुग् राहुः ॥ ७ ॥

---

१. 'न्द्रग्रसनो य' क. ख. पाठः. २. 'हारा' क. ग. पाठः.

तं ज्ञात्वा भुजगेन्द्रं तारांशकराशिदिग्विभागगतम् ।
पश्चात् सांवत्सरिको जयाय दद्याद् बलं[1] तथ्यम् ॥ ८ ॥

अथ मासराहुमुग्रं सङ्क्रान्तिवशाच्चरन्तमर्केण ।
तं वक्ष्यामि समासाद् राशिस्थं शूलभेदेन ॥ ९ ॥

मेषद्विपारिधनुषः प्राच्यां वृषभः स्तनी मृगो याम्ये ।
वरुणे यमतौलिघटाः कर्कटकीटौ झषः सौम्ये ॥ १० ॥

यः सर्व[2]भूतदर्मनो मासं प्रति याति दिग्दि[3]शां क्रमशः ।
स हि मासभुक् प्रचण्डो यत्र रविस्तत्र राहुः स्यात् ॥११॥

अथ चण्डराहुरन्यो निगद्यते विष्टिभु[4]क्तिभागेशः ।
यत्र स्थिता च विष्टिस्तत्रास्ते चण्डराहुरयम् ॥ १२ ॥

कृष्णे त्रि[5]तिथौ प्राच्यां सप्तम्यामीशगोचरे चरति ।
कौबेर्याश्च दशम्यां वायव्यायां चतुर्दश्याम् ॥ १३ ॥

वरुणे सिते चतुर्थ्यामष्टम्यां राक्षसालये राहुः ।
एकादश्यां याम्ये हुताशने पौर्णमास्यां च ॥ १४ ॥

पुनरन्यं वक्ष्येऽहं घोरतरं प्रहरराहुमत्युग्रम् ।
आवे[6]ष्ट्य धराचक्रं रविणा समुदेति स प्रहरः ॥ १५ ॥

अग्रे संस्थः समरे म्रियते पुरुषः सुरेन्द्रतुल्योऽपि ।
पृष्ठे स्थितोऽत्र[7] विजयी पुच्छस्थो भङ्गमाप्नोति ॥ १६ ॥

---

१. 'लिं' क. ख. ग. घ. पाठः. २ 'ह्' ख. ङ. पाठः.
३. 'दिगधीशात् क', ४. 'ग्विभ' ग. पाठः. ५. 'तृतीये प्रा',
६. 'कृष्य ध' ख. पाठः. ७. 'पि' ग. पाठः.

वाराधिनाथो दिवसस्य रात्रे-
राद्यन्तभोगीह ततस्तु शेषाः ।
विभुञ्जते षट् क्रमशो ग्रहास्ते
रात्रौ दिवा वा बलवान् दिनेशः ॥ ६२ ॥

इति सङ्ग्रामविजयोदये चन्द्रशनिचारगुलिकविधानो नाम
दशमोऽध्यायः ॥

अथैकादशोऽध्यायः ।

अथ राहुचाररूपं देवासुरयक्षदैत्यदुर्लङ्घ्यम् ।
समरे जयाय राज्ञां ग्रहाधिकं तत् प्रवक्ष्यामि ॥ १ ॥

यो रविचन्द्रौ[1] ग्रसते यस्माद् विलयः समस्तभूतानाम् ।
दिक्फणिनो यस्यांशाः स कालरूपो महान्[2] राहुः ॥ २ ॥

संवत्सरमासतिथिप्रहरदिशाराशिभांशनाड्या(द्याः ? द्यैः)।
सोऽप्यष्टधा विभिन्नश्चरति सदा कालरूपेण ॥ ३ ॥

संवत्सरराहुरसौ प्रथमो दिनरात्रिषष्टिनाड्यशनः ।
षष्टिर्नाड्यश्च तयोर्दिनरात्र्योर्वत्सराः प्रोक्ताः ॥ ४ ॥

प्राक् प्रभवादिवृषान्तं याम्ये चित्रादिदुर्मुखान्तं च ।
अहिमाद्यविरोधान्तं वरुणे धात्रिक्षयान्तं च ॥ ५ ॥

एवं विचरेद् राहुः कालः संवत्सरेषु सर्वेषु ।
तदधिष्ठितनक्षत्रं ज्ञातव्यं चानुपूर्व्येण ॥ ६ ॥

अपसव्यक्रमयोगाद् राशिषु सर्वेषु भेषु वर्षाख्यः ।
एकस्यां होरायां सोऽष्टादशमासभुग् राहुः ॥ ७ ॥

---

१. 'न्द्रग्रसनोय' क. ख. पाठः. २. 'हारा' क. ग. पाठः.

तं ज्ञात्वा भुजगेन्द्रं तारांशकराशिदिग्विभागगतम् ।
पश्चात् सांवत्सरिको जयाय दद्याद् बलिं[1] तथ्यम् ॥ ८ ॥
अथ मासराहुमुग्रं सङ्क्रान्तिवशाच्चरन्तमर्केण ।
तं वक्ष्यामि समासाद् राशिस्थं शूलभेदेन ॥ ९ ॥
मेषद्विपारिधनुषः प्राच्यां वृषभः स्तनी मृगो याम्ये ।
वरुणे यमतौलिघटाः कर्कटकीटौ झषः सौम्ये ॥ १० ॥
यः सर्वभूतदमनो[2] मासं प्रति याति दिग्दिशां[3] क्रमशः ।
स हि मासभुक् प्रचण्डो यत्र रविस्तत्र राहुः स्यात् ॥११॥
अथ चण्डराहुरन्यो निगद्यते विष्टिभुक्तिभागेशः[4] ।
यत्र स्थिता च विष्टिस्तत्रास्ते चण्डराहुरयम् ॥ १२ ॥
कृष्णे त्रितिथौ[5] प्राच्यां सप्तम्यामीशगोचरे चरति ।
कौबेर्याञ्च दशम्यां वायव्यायां चतुर्दश्याम् ॥ १३ ॥
वरुणे सिते चतुर्थ्यामष्टम्यां राक्षसालये राहुः ।
एकादश्यां याम्ये हुताशने पौर्णमास्यां च ॥ १४ ॥
पुनरन्यं वक्ष्येऽहं घोरतरं प्रहरराहुमत्युग्रम् ।
आवेष्ट्य[6] धराचक्रं रविणा समुदेति स प्रहरः ॥ १५ ॥
अग्रे संस्थः समरे म्रियते पुरुषः सुरेन्द्रतुल्योऽपि ।
पृष्ठे स्थितोऽत्र[7] विजयी पुच्छस्थो भङ्गमाप्नोति ॥ १६ ॥

---

१. 'लिं' क. ख. ग. घ. पाठः. २ 'हृ' ख. ङ. पाठः.
३. 'दिगधीशात् क', ४. 'ग्विभ' ग. पाठः. ५. 'तृतीये प्रा',
६. 'कृष्य ध' ख. पाठः. ७. 'पि' ग. पाठः.

अथ पक्षराहुमन्यं वक्ष्येऽहं शाम्भवात् सं[१]मुद्धृत्य ।
उभ[२]योश्च सितासितयोश्चरन् फणी पक्षयोस्तिथिभिः ॥१७॥
रेखाः प्राक्पश्चिमयोर्लिखितव्याः सप्त दक्षिणोत्तरयोः ।
पुनरपि च सप्त रेखास्तिर्यग्भूताः स्थिताश्चक्रे ॥ १८ ॥
वायव्याग्नेयान्ताः संस्था रेखाः समस्तपरिघा[३]भाः ।
संलिख्य कलाजालं न्यस्येत् सितकृष्णभेदेन ॥ १९ ॥
अग्निदिशा रेखाग्रे स्वरो विसर्गस्त्रिपञ्चमो ह्रस्वः ।
पवनानलरेखा[४]यां न्यस्तव्ये[५]श्चानुपूर्व्येण ॥ २० ॥
दीर्घकलाभिः शुक्लो वारुण्यां दक्षिणे स्थितः पक्षः ।
ह्रस्वस्वरैः स कृष्णः प्राच्यां सौ[६]म्ये स्वरैर्नित्यम् ॥ २१ ॥
त्रिंशद्वर्णान् न्यस्येद् रेखाग्रेषु क्रमेण चक्रस्य ।
वरुणादारभ्य ततो यावत् पवनाश्रमस्तावत् ॥ २२ ॥
कादिदकारान्तोऽयं शुक्लः पक्षः स याम्यपश्चिमयोः ।
धादिहकारान्तोऽयं कृष्णः प्राक् सौम्ययोः पक्षः ॥ २३ ॥
राहुरमावास्यायां वायव्ये संस्थितो महान् क्रूरः ।
आग्नेय्यां यः साक्षात् स पौर्णमासीस्थितश्चण्डः ॥ २४ ॥
यत्[७]स्वैरवर्णारूढो राहुर्यस्यां तिथौ च तद्भङ्गः ।
यस्य कलाक्षरविद्धं तेन भयं तस्य तद्दिवसे ॥ २५ ॥
अथ वक्ष्येऽन्यं राहुं घटिकाख्यं कालरूपिणं घोरम् ।
रविभौमसूरिबुधासितमन्देन्दुतमोग्रहेषु चरः ॥ २६ ॥

---

१. 'सारम् ।', २. 'योः श्वेता' ख. ग. पाठः. ३. 'खा' ग. पाठः ४. 'या' ख. पाठः. ५. 'व्या' क. ग. पाठः. ६. 'म्यैश्चरेन्नित्यम् ।' क. घ., 'म्येश्वरे नित्य' ख. ग. पाठः. ७. 'स्व' ख. पाठः.

इन्द्रसमीरणपितृहरवरुणाग्निकुबेरराक्षसेन्द्रगनः ।
पादोनचतुर्घटिकाभोक्ता राहुर्भ्रमत्युदयात् ॥ २७ ॥
रात्रौ तद्वद्राहुर्दिक्षु विदिक्षु भ्रमेत् स घटिकाख्यः ।
ईर्मिुरिति[1] विख्यातो भयङ्करः सर्वसत्त्वानाम् ॥ २८ ॥
वदनशिरोगलपुच्छस्थानेषु भुजङ्गमस्य नहि तिष्ठेत् ।
न ग्रहमध्यस्थानं न लङ्घयेद् ब्रह्मदण्डं च ॥ २९ ॥
दृष्टिस्थानपरिभ्रमपुच्छशिरोवक्रवंशकटिदेशान् ।
जानीयात् तद्राहौ विजयार्थी युद्धभूचक्रे ॥ ३० ॥
अत ऊर्ध्वमृक्षराहुं वक्ष्ये सर्वग्रहोत्तमं क्रूरम् ।
स्त्रीमित्रराजदासप्रीत्यर्थात्मप्रदीपं च ॥ ३१ ॥
अश्विन्यादि क्रमशो रेवत्यन्तं युतं त्रिनाडीभिः ।
पदपङ्क्तिक्रमयुक्तं परिविलिखेद् भुजगसन्निभं राहुम् ॥३२॥
रविभौ[2]मराहुरविसुतनाडीविद्धं च यस्य नक्षत्रम् ।
स म्रियते सङ्ग्रामे यदीन्द्रतुल्यो न सन्देहः ॥ ३३ ॥
वेश्याभ्रातृसहायाः प्रीत्या धनदास्तदेकनाडीस्थाः ।
कन्याविवाहकाले परित्यजेदेकनाडीस्थाः ॥ ३४ ॥
यच्छत्रुभङ्गचक्रं तद्वक्ष्येऽन्यत् समस्तलोकमयम् ।
भुजगेन्द्ररूपमुद्यत्सचतुर्नाडि[3] त्रिदण्डयुतम् ॥ ३५ ॥
मृगशिरसि पूर्वदण्डे रविराहुविलक्षिते तु जीवस्थे ।
पूर्वे[4]च्छत्रनिपाते पूर्वनृपस्यैव मृत्युश्च ॥ ३६ ॥

---

१. 'मुनिभिरिति' ङ. पाठः. २. 'सो' ख. पाठः. ३. 'डी' क. ख. घ. ङ. पाठः. ४. 'र्वं शत्रुनि' ख., 'र्वच्छत्रुनि' क. पाठः.

चित्रां[१] च मध्यदण्डे यदि कुजमन्दान्विता ससौम्या च ।
दुर्भिक्षं तद्देशे स (तु?) म्रियते मध्यदेशेशः ॥ ३७ ॥
दक्षिणदण्डधनिष्ठां भौमोरगभानुकेतुभानुसुताः ।
यदि पश्यन्ति समक्षं[२] दक्षिणदेशाधिपोपरतिः[३] ॥ ३८ ॥
अथ तारोरगमुग्रं वक्ष्यामि समासतः खलं क्रूरम् ।
आलिख्य राहुरूपं त्रिदण्डतारामयं कुटिलम् ॥ ३९ ॥
वक्रे वक्षसि जठरे कट्यां पुच्छे पुनर्गले स्कन्धे ।
नाभौ च स्फिग्देशे त्रीणि त्रीणि न्यसेद् भानि ॥ ४० ॥
वक्रे[४] दिननक्षत्रं न्यस्त्वा पूर्वक्रमेण पुच्छान्तम् ।
सङ्गण्य सर्वताराः पश्चाद् ब्रूयाद् बलं विबलम् ॥ ४१ ॥
वदने कट्यां वक्षसि जठरे पुच्छे स्थितं च यस्यर्क्षम् ।
पापग्रहसंविद्धं मृत्युस्तस्यैव निर्दिष्टः ॥ ४२ ॥
नाभौ कण्ठे संस्थं यस्यर्क्षं तस्य कीर्तितो विजयः ।
स्कन्धे सन्धिः प्रोक्तः स्फिग्देशे तस्य भङ्गः स्यात् ॥ ४३ ॥
रविराहुभौममन्दैर्विद्धं तारात्रयं च यस्यैव ।
तन्मृत्युर्न विदूरात् सङ्ग्रामे व्याधितो वापि ॥ ४४ ॥
एकस्यां रविशुक्रौ नाड्यां संस्थौ शरीरनाशकरौ ।
बुधमन्दौ व्याधिकरौ गुरुभुजगौ भङ्गदौ ज्ञेयौ ॥ ४५ ॥
पुनरन्यं वक्ष्येऽहं फणिराहुं क्रूररूपिणं कुटिलम् ।
लाभालाभजयाजयसन्दीपं सर्वतः सारम् ॥ ४६ ॥

---

१. 'त्रामध्यमद' ग. पाठः. २. 'स्तं' ख. ग., 'स्तद' घ. ङ.
३. 'तः', ४. 'इ' क. घ. पाठः.

अष्टाविंशतिबिन्दूनालिख्य पुनस्त्रिभिस्त्रिभिर्भक्त्वा[1] ।
चत्वारि भानि बाह्ये समालिखेत् सर्परूपाभम्[2] ॥ ४७ ॥
यस्मिन्स्थितो भुजङ्गस्तच्चर्क्षं[3] भुजगमूर्ध्नि विन्यस्य ।
शेषास्ताराः क्रमशो न्यस्त्वा ब्रूयाज्जयापजयम् ॥ ४८ ॥
मुखसप्तमनक्षत्रं यस्याधानं[4] स मृत्युमाप्नोति ।
स्कन्धगतसप्तमर्क्षं नामर्क्षं यस्य तद्भङ्गः ॥ ४९ ॥
उदरस्थं जन्मर्क्षं यस्यास्ते तस्य शत्रुविजयः स्यात् ।
यस्य कटीगतमृक्षं तस्यापजयः समुद्दिष्टः ॥ ५० ॥
रविराहुमन्दभूमिजदृष्टं विद्धं च यस्य जन्मर्क्षम् ।
तस्य न दूरान्मृत्युः स्वस्थस्य च किं पुनर्युद्धे ॥ ५१ ॥
अथ वक्ष्ये संक्षेपाद्धोराशास्त्रार्णवात् समुद्धृत्य ।
सन्तानचक्रमेतद् राज्ञां राज्यप्रदं स्वपितुः[5] ॥ ५२ ॥
आलिख्य सर्परूपं भूमौ नाडीत्रयान्वितं स्पष्टम् ।
बाह्ये षड् विन्यस्येत् त्रिसप्ततारास्तनोऽस्याग्रे[6] ॥ ५३ ॥
पितृनक्षत्रं न्यस्त्वा भुजगाधिपमूर्धभागदेशे[7] तु ।
गणयतु सुतनक्षत्रं यावत् सममण्डलं तावत् ॥ ५४ ॥
तन्नाडीगतमृक्षं यस्यास्ते तस्य राज्यमुद्दिष्टम् ।
बाह्यर्क्षं यस्यास्ते विदेशगमनं च तथैव ॥ ५५ ॥
मध्यमनाडीतारा यस्य सुतास्ते चिराद् भवेत् तस्य ।
यस्य हि यदन्तनाडीनक्षत्रं तस्य न च राज्यम् ॥ ५६ ॥

---

१. 'ङ्क्त्वा' क. घ. पाठः. २. 'पिणं राहुम्' ख. पाठः. ३. 'जगपस्त' क. घ. पाठः. ४. 'स्य स्थानं' ख. पाठः. ५. 'सावितुः' क. ख. ग. घ. पाठः. ६. 'ङ्के' क. ङ. पाठः. ७. 'र्ध्नि देशभागे तु' ख. ग. ङ. पाठः.

पितृसन्तानं लभते तन्नाडीभं च यस्य नक्षत्रम् ।
एकांशं यत्सूनोस्तत्प्रीतिः सर्वदा तस्य ॥ ५७ ॥
नामाक्षरराशिबलं वर्गांशकयोनिपक्षिकालबलम् ।
वेलाबलमिन्दुबलं ज्ञात्वा दद्याज्जयाय बलम् ॥ ५८ ॥
दिक्तारांशकराशिद्रेक्काणस्थं फणीश्वरं ज्ञात्वा ।
सङ्ग्रामभूमिभागे योद्धुं[२] संस्थापयेत् सम्यक् ॥ ५९ ॥
राशिस्थमुष्णकिरणं स्फुटं च कृत्वा जयाय दातव्यम् ।
तस्येच्छया च सवितुः सर्वे देवाः समुद्यन्ति ॥ ६० ॥
यन्मासे यत्र रविः स्थितः स राशिस्ततश्च समुदेति ।
तस्मिन्नुदेति राहुर्भास्करचारक्रमेणैव ॥ ६१ ॥
आदाय राहुवेषं कालः साक्षादुदेति पापरतः ।
घोरो मुहूर्तयुक्तो यदा च राहुः समुद्दिष्टः ॥ ६२ ॥
अथ किं बहुभिर्वचनैः पुनःपुनर्वर्ण्यते भुजङ्गेशः ।
तद्रूपचारवेलां यो जानीयात् स दैवज्ञः ॥ ६३ ॥

सकलभुवनजन्मस्थानसंहारहेतु-
भुजगपतिरभेद्यः सर्वगोऽनन्तवीर्यः ।
अखिलविबुधवन्द्यो राहुराशः स्वयं च
प्रभुरणुरनवद्यः कीर्तितः सर्वविद्भिः ॥ ६४ ॥

इति सङ्ग्रामविजयोदये राहुप्रचारसन्तानचक्र(कूप ?)विधिर्नाम
एकादशोऽध्यायः ।

---

१. 'शकप्रसूतास्त' ङ. पाठः. २. 'द्धा' क. पाठः. ३. 'सु' ख. पाठः. ४. 'न्द्यः' ख. पाठः. ५. 'स' क. ख. पाठः.

अथ द्वादशोऽध्यायः ।

अथ विष्टिचक्रमेतन्निगद्यते युद्धशास्त्रतोऽस्माभिः ।
आयोधनावनीश्वरजयापजयबोधनोद्दीपम् ॥ १ ॥
निबिडारुणोर्ध्वकेशी खेटकशूलासिधारिणी [1]व्युग्रा ।
दक्षाध्वरनाशार्थं सृष्टा त्रिपुरारिणा विष्टिः ॥ २ ॥
साप्यष्टधा विभिन्ना प्रलयानलसदृशरूपिणी भीमा ।
दिक्षु विदिक्षु च विष्टिर्भ्रमति [2]दृढं पक्षयोरुभयोः ॥ ३ ॥
[3]ज्वालानना कराला घोरा रौद्री च या महाजिह्वा ।
बडवामुखी च मारी यमजिह्वा चाष्टधा ज्ञेया ॥ ४ ॥
अग्नीन्द्ररुद्रशशिमरुदम्बुपतिनिर्ऋतिकालदिक्षु गताः ।
स्वदिशापालकतुल्या ज्वालाद्यास्तास्ततो ज्ञेयाः ॥ ५ ॥
एकादशीचतुर्थ्योः सा निशि शुक्लेऽह्नि पूर्णिमाष्टम्योः ।
दशमीतृतीययोर्निशि कृष्णेऽहनि भूतसप्तम्योः ॥ ६ ॥
भूते प्राच्यां प्रथमे साष्टम्यां पावके द्वियामेऽह्नि ।
यमसप्तमीतृतीये देवतिथौ राक्षसेऽन्त्ये च ॥ ७ ॥
[4]प्रागुदिशि वरुणचतुर्थ्यां वायौ षष्ठे स्थिता[5] दशम्यां च ।
सौम्येशातिथौ सप्तप्रहरेऽष्टेंऽशे तृतीयान्ते ॥ ८ ॥
विष्टिरहोरात्रान्तात् त्रिंशद्घटिकानुभोगिनीत्यन्ये ।
सा[6] प्रहरभोगिनीति प्राहुर्गर्गादयो मुनयः ॥ ९ ॥

---

१. 'व्य' क घ. ङ. पाठः. २. 'भृशं प' ख. पाठः. ३. 'का' क. पाठः. ४. 'प्राङ् निशि' ख. ग. पाठः. ५. 'ता तृतीयायाम् । एकादश्यां सौम्ये मुनियामे शाङ्करे दशम्येऽन्त्ये ॥ वि' ङ. पाठः. ६. 'स्यात् प्र' ख. पाठः.

ये तिष्ठन्ति तदग्रे सङ्ग्रामे युद्धकाङ्क्षिणः पुरुषाः ।
सा हन्ति तांश्च सर्वान् हस्त्यश्वरथादिभिर्युक्तान् ॥ १० ॥
सङ्ग्रामे यात्रायां विवाहमङ्गलगृहप्रवेशेषु ।
विद्यारम्भे विद्वान् विष्टिमुखं वर्जयेन्नित्यम् ॥ ११ ॥
नाश्वारोहणकार्यं न कृषि[1]र्न च भोजनं न वाणिज्यम् ।
नच गृहवास्त्वारम्भो[2] न चौलकार्यं च विष्ट्युदये[3] ॥ १२ ॥
ज्वरदाहाद्यं कार्यं ज्वालायोगे न साधकः कुर्यात् ।
द्वाःस्तम्भकीलकाद्यं दृढं करालोदये नोक्तम् ॥ १३ ॥
घोरोदये च घोरं रौद्रीयोगे न शान्तिपुष्ट्याद्यम् ।
चलनादि महाजिह्वायोगे न जयाय कर्तव्यम् ॥ १४ ॥
बडवामुखीप्रयोगे विषापहरणादिकार्यमुद्दिष्टम् ।
विद्वेषाद्यं मार्यां यमजिह्वायां हि मारणाद्यं च ॥ १५ ॥
ईशयमपवनसुरपतिराक्षसशशिपावकाब्धिनिलयेषु ।
प्रथमं प्रतिपच्छुक्ले भ्रमति सदा नित्यविष्टिरियम् ॥ १६ ॥
शशिनिर्ऋतिसुरपमारुतयमहरवरुणाग्निदिक्षु कृष्णे च ।
प्रतिपत्पूर्वं क्रमशश्चरेत् सदा नित्यविष्टिरियम् ॥ १७ ॥
इत्येवमाहुरन्ये होराविदुषश्च नित्यविष्टिफलम् ।
तत्स्थानं विजयकरं तद्दृष्टिं वर्जयेत् समरे[4] ॥ १८ ॥
अथ कालचक्रमेतद् वक्ष्येऽहं पूर्वशास्त्रतः सारम् ।
एकाशीतिपदान्वितमुत्कृष्टं सर्वतोभद्रम् ॥ १९ ॥

---

१. 'षिं नच' ग. पाठः. २. 'म्भं' क. ख. ङ. पाठः. ३. 'ये । न ज्वरदाहं का' ग. पाठः. ४. 'रे ॥ इति सङ्ग्रामविजयोदये विष्टिचक्रविधिर्नाम द्वादशोऽध्यायः' ङ. पाठः.

भूमितले मृदुशुद्धे निम्नोन्नतवर्जिते मनोरम्ये ।
एकान्ते विगतजने तदालिखेच्चक्रमैन्द्र्याद्यम् ॥ २० ॥

कोणेषु कला न्यस्त्वा प्राग्दक्षिणपश्चिमोत्तराशासु ।
आग्नेयादियमान्तास्ताराः सम्यङ् न्यसेत् पश्चात् ॥ २१ ॥

अवकहडपञ्चवर्णान् विन्यस्येत् पूर्वपञ्चकोष्ठेषु ।
मटपरतान् याम्यायाः कोष्ठेषु च पञ्च वर्णास्तान् ॥ २२ ॥

नयबशजान् वारुण्यां गदसचलान् सोमधामकोष्ठेषु ।
अजहरिधनुषः पूर्वे वृषमृगकन्याश्च याम्यायाम् ॥ २३ ॥

मिथुनतुलाकुम्भाख्या वारुण्यां सौम्यगोचरे शेषाः ।
नन्दाभद्राविजयारिक्तापूर्णा[1]श्च पूर्वाद्याः ॥ २४ ॥

यस्मिन् स्थितवान् क्रूरस्तस्माद् रेखां विकर्ण[2]गामृज्वीम् ।
यावत् कोष्ठान्तगतां[3] तावत् सितधातुना च नयेत् ॥ २५ ॥

तत्पुच्छमुखविदेशादानीतैः[4] कोष्ठवर्णराशिकलाः ।
क्रमशः सम्भेद्य ततः पश्चाद् ब्रूयात् फलावफलम् ॥ २६ ॥

नामस्वरवर्णकला जन्मत्रयराशयश्च यस्यैव ।
क्रूरग्रहदृग्विद्धा मृत्युस्तस्यैव निर्दिष्टः ॥ २७ ॥

शुभविद्धाः पञ्चैते स्वरवर्णकलोडुराशयो यस्य ।
नहि मृत्युः सङ्ग्रामे न व्याधिस्तस्य नार्थहरः ॥ २८ ॥

क्रूराक्रूरविविद्धा रोगो द्रव्यक्षयो वियोगश्च ।
आधानत्रयविद्धं यस्य क्रूरैः स मृत्युगतः ॥ २९ ॥

---

१. 'र्णेति पञ्च विहगाद्याः' ख. पाठः. २. 'र्णयुगमृ' क घ. पाठः. ३. 'तास्ताव' क. घ., 'तां' ख. पाठः. ४. 'त्या' क. ग. घ पाठः.

जन्मभविद्धा व्याधिः कर्मभविद्धाश्च[1] कर्महानिः[2] स्यात् ।
मरणं स्वगर्भताराविद्धाः क्रूरैर्ध्रुवं तस्य ॥ ३० ॥
रविवेधाद् राजभयं शत्रुभयं विग्रहश्च कुजवेधात् ।
रविसुतवेधाद् रोगो निश्शून्यं राहुवेधाच्च ॥ ३१ ॥
गुरुवेधाद् धनलब्धिर्भार्गववेधाद् वराङ्गनासङ्गः ।
शशिसुतवेधात् स्थितिरिह मृत्युः स्यात् केतुवेधेन ॥ ३२ ॥
नामभवर्णकलास्वरराशिषु तिष्ठन्ति यस्य पापाश्चेत् ।
कलहक्षतरुक्पीडाभयप्रदाः स्युर्ग्रहास्तस्य ॥ ३३ ॥
जन्म प्रधानभूतं केचित् प्राहुर्मनीषिणः सम्यक् ।
नामभमस्मिंस्तन्त्रे श्रेष्ठं तस्मात् समुद्दिष्टम् ॥ ३४ ॥
उभयं प्रधानभूतं प्रसूतिनामोद्भवं च नक्षत्रम् ।
इत्याहुर्गर्गोशनसाङ्गिरसाद्याः सदा सन्तः ॥ ३५ ॥
शतपदचक्रमिदानीं समस्तताराशकादिसम्भूतम् ।
विंशत्यक्षरजातं पञ्चस्वरभेदितं वक्ष्ये ॥ ३६ ॥
एकादशरेखाभिः समालिखेत् तिर्यगूर्ध्वगाभिरलम् ।
प्रागाद्यं शतकोष्ठं विकर्णसन्धिक्रमोपेतम्[3] ॥ ३७ ॥
ईशादिपञ्चकोष्ठेष्ववकहडान् विन्यसेत् क्रमाद् वर्णान् ।
आग्नेयादिषु पञ्चसु मटपरतान् याम्यकोष्ठेषु ॥ ३८ ॥
नैरृत्यादिषु वर्णान् नयभशजान्[4] पञ्चधामकोष्ठेषु ।
गदसचलान् कौबेर्यां पवनादिषु पञ्चकोष्ठेषु ॥ ३९ ॥

---

१. 'च्च' क. ख. घ. ङ. पाठः. २. 'हीनः स्यात्' ग. ङ. पाठः. ३. 'न्धिक्र' ग. पाठः. ४. 'ग्रहोपे' ख. पाठः. ५. 'भजघान्' ख. ग. पाठः.

पञ्चस्वरैर्विभेद्यं प्रत्येकं सर्वकोष्ठवर्णं च ।
यस्मिन्नंशे क्रूरस्तस्मादानीयतां सूत्रम् ॥ ४० ॥
नामाक्षरांशविद्धं यस्य क्रूरग्रहेण सुबलेन ।
न जयस्तस्यास्ति रणे भङ्गो वा मृत्युरुद्दिष्टः ॥ ४१ ॥
बहुभिः पापैर्विद्धो यस्यांशस्तस्य मृत्युराख्यातः ।
क्रूराक्रूरविविद्धो व्याधिस्तस्यैव निर्दिष्टः ॥ ४२ ॥
क्रूरग्रहेण विद्धो लग्नांशो यस्य तत्र तन्मृत्युः ।
शुभविद्धः सौख्यकरो यस्यांशो जन्मनस्तस्य ॥ ४३ ॥
पुनरन्यद् वक्ष्येऽहं ताराचक्रं समस्तसन्दीपम् ।
ऊर्ध्वं नवरेखाभिर्विलिखेत् तिर्यक् त्रिरेखाभिः ॥ ४४ ॥
आग्नेयादियमान्तं भकुलं न्यस्येत् क्रमेण तच्चक्रे ।
पश्चात् प्रवदेत् प्रष्टुर्लाभालाभं जयापजयम् ॥ ४५ ॥
उरगरविकेतुरविसुतधरणीसुतविद्धनामतारात्मा ।
म्रियते स नरः समरे यदीन्द्रतुल्यो न सन्देहः ॥ ४६ ॥
जन्मत्रयसंविद्धं यस्य क्रूरैर्नरस्य बलवद्भिः ।
स विनश्यति सङ्ग्रामे सुरक्षितः शार्ङ्गिणा वापि ॥ ४७ ॥
यस्य विपत्करनैधनपञ्चमताराश्च पापसंविद्धाः ।
तस्यैव भवेद् भङ्गो मृत्युर्वा तस्य निर्दिष्टः ॥ ४८ ॥
शुभविद्धं विजयकरं यस्याधानं नरस्य सङ्ग्रामे ।
तस्य शुभाशुभविद्धं ग्रहतः कथितं स्फुटं युद्धे ॥ ४९ ॥

---

१. 'द्यं' क. घ. पाठः. २. 'न्वं', ३. 'वेधात् सौ' ख. पाठः.
४. 'तरं य' क. ग. पाठः. ५. 'णापि नरः', ६. 'वीथ मि' ख. पाठः

अथ नरचक्रं वक्ष्ये शस्त्राघातप्रबोधनाय[1] ततः ।
आलिख्य पुरुषरूपं नग्नं सर्वाङ्गसंयुक्तम् ॥ ५० ॥

मुखवामनेत्रमस्तकदक्षिणदृक्कण्ठहस्तपादेषु ।
हृद्गलवामकराङ्घ्रिषु नरस्य रणकाङ्क्षिणस्तस्य ॥ ५१ ॥

शशिचन्द्रानलहिमकरशशियुगगुणभूतचन्द्रवेदगुणाः ।
न्यस्तव्यास्तारास्ताः सर्वास्तज्जन्मताराद्याः ॥ ५२ ॥

भौमशनैश्चरभास्करचन्द्रोरगकेतुसंस्थिताङ्गेषु ।
विद्याद् घातं भानौ[2] त्रिपञ्चताराश्रि[3]तस्थाने ॥ ५३ ॥

चन्द्रे प्रधानघातं भौमे रक्तं शनैश्चरे गूढम् ।
ऊर्ध्वं[4] घातं भानौ तिर्यग्घातं च राहुस्थम् ॥ ५४ ॥

यस्योपचयस्थाने सर्वे क्रूराः स्थितास्तु बलवन्तः ।
नहि घातं तस्यैव च शुभेक्षिते यस्य सङ्ग्रामे ॥ ५५ ॥

एकांशगते क्रूरे क्षतमल्पं द्व्यंशके जघन्यं च ।
त्र्यंशगते दृढघातं चतुरंशगते महाविद्धम् ॥ ५६ ॥

त्रिषडेकादशदशमे पापश्चेद् यस्य तस्य नाघातम् ।
यस्याङ्गे[5] यदि चन्द्रस्तस्यांशे निश्चयं घातम् ॥ ५७ ॥

सप्तशलाकाचक्रे ग्रहविद्धं यत्र यस्य नक्षत्रम् ।
यदि तिष्ठति तद्घातं प्राहुः केचित् सदाचार्याः[6] ॥ ५८ ॥

---

१. 'योजना' क. पाठः. २. 'नोम्लिप' ग. पाठः. ३. 'रास्थितिः शिरस्थाने ॥' क. पाठः. ४. 'अ र्धघा' ख. पाठः. ५. 'स्यांशे य' क. ख. ग. पाठः. ६. 'र्याः ॥ इति सङ्ग्रामविजयोदये कालचक्रविधिर्नाम त्रयोदशोऽध्यायः । अथ' ङ. पाठः.

अथ कूर्म[1]चक्रमेतत् समस्तभूलोकसंस्थितं सारम् ।
लाभालाभजयाजयसुभिक्षदुर्भिक्षसन्दीपम् ॥ ५९ ॥
सप्तोदधिपर्यन्ता सशैलवनकानना मही येन ।
सन्धारिता च हरिणा गाढं पृथुकूर्मरूपेण ॥ ६० ॥
कूर्मस्य तस्य मानं य[2]द्वेद् भूमिप्रमाणमन्येऽपि ।
कोटिसहस्रं योजनमाहुर्ब्रह्मागमे विदुषः ॥ ६१ ॥
पूर्वमुखश्चतुरङ्घ्रिः स्थितो द्विपक्षो द्विदङ् महापुच्छः ।
आलि[3]ङ्ग्य भूमिचक्रं प्रभुः स देवो हरिः कूर्मः ॥ ६२ ॥
पृष्ठेऽस्य मुखे पादे पक्षे चरणे च वालधौ पादे ।
पक्षे चरणे भानि त्रीणि त्रीणि न्यसेत् क्रमशः ॥ ६३ ॥
आग्नेयं ब्राह्मीयं सौम्यं तत्पृष्ठवक्त्रमध्येषु ।
एवं क्रमेण पूर्वं न्यस्त्वा शेषं न्यसेत् पश्चात् ॥ ६४ ॥
यस्मिन् देशे सौरिः स्थितः स देशो विनश्यति प्रकटम् ।
य[4]ः पश्यति यं देशं रेखासंस्थः स निर्दग्धः ॥ ६५ ॥
दुर्भिक्षं रुक्पीडा परचक्रभयं स्वराष्ट्रराजभयम् ।
अतिवृष्टिरनावृष्टिः पतङ्गशुकमूषिकाः सन्ति ॥ ६६ ॥
यं देशं गुरुशुक्रौ समदृष्ट्या पश्यतश्च तद्देशे ।
धान्यविवृद्धिर्वृष्टिर्निरुजो न च शत्रुराजभयम् ॥ ६७ ॥
यस्मिन् देशे बलिनः पापास्तिष्ठन्ति शत्रुवर्गस्थाः ।
तद्देशे दुर्भिक्षं राजभयं व्याधयो बहवः ॥ ६८ ॥
देशपुरनगरपत्तननिगमग्रामाश्रमाश्रयाः सर्वे ।
क्रूराक्रूरविभागै[5]र्ज्ञातव्याश्चानुपूर्व्येण ॥ ६९ ॥

---

१. 'कूरच' घ. पाठः. २. 'द्य', ३. 'ल्य' क. पाठः. ४. 'यं' ग. पाठः. ५. 'गे ज्ञात' ख., 'गो ज्ञात' ङ. पाठः.

अथ पुनरन्यं वक्ष्ये द्वादशकोष्ठे बलाबलव्यक्तम्[1] ।
षड् रेखास्तिर्यक्स्थाः पुनर्लिखेत् तास्त्रयोदशकाः ॥ ७० ॥

षष्टिः कोष्ठाः प्रोक्तास्तन्मध्ये कारणं च संलिख्य ।
अवकहडार्णान्[2] प्रागादिग(धः ? तान्) परिकल्पयेत्
[क्रमशः ॥ ७१ ॥

दिग्ग्रह[3]तुरङ्गभास्कर[4]ऋत्विजहरपक्षमूर्च्छनास्मृतयः ।
जलनिधिभंकालहोरा न्यस्तव्याश्चानुपूर्व्येण ॥ ७२ ॥

नामाक्षरवृन्दाङ्कं विभजेन्मुनिभिः क्रमेण तच्छेषम् ।
आदित्यभौमसौरा बलिनः शेषा ग्रहा विबलाः ॥ ७३ ॥

उभयोर्ग्रहो बुधो यं पश्येद् यदि सन्धिमाहवे स्थितयोः ।
अधिकग्रहनामात्मा विवर्जयेच्छत्रुहीनांशः ॥ ७४ ॥

अधुना कथयामि ततः संक्षेपात् सर्वशास्त्र[5]सारांशम् ।
विदितार्थमायचक्रं[6] जयापजयदीपनं पुंसाम् ॥ ७५ ॥

पूर्वं द्वादशरेखाः *प्रोक्ताश्च[7] ततश्च षड् वक्राः श्लिष्टाः(?) ।
पश्चात् तत्कोष्ठेषु च मन्वाद्याः संलिखेद् व्यक्तम् ॥ ७६ ॥

---

१. 'व्ज्य' ग., 'स्त' ङ. पाठः. २. 'दिदिग' ख., 'दिदिगथ पं' ङ. पाठः. ३. 'ग्भूतर', ग., 'ग्ग्रहतुङ्ग' ङ. पाठः. ४. 'र+त्विश्शरह' ग. पाठः. ५. 'रौर्विभ' ङ., 'द्धा' ख. पाठः. ६. 'स्त्राम्यचम्' ग. घ पाठः. ७. 'प्रोद्धृत्य ततश्च षड् वक्राः श्लिष्टाः' क. ख., 'प्रोद्धृत्य ततश्च षड् वक्राः शिष्टाः' घ., 'प्रोद्धृत्य षड्विधाः शिष्टाः' ङ. पाठः.

मनुर्भानुसूर्यतिथिरसयुग[2]नगतलाविष्टनागरन्ध्राणि ।
आलिख्य मन्वधस्ता[3]दखडबवर्णास्ततश्चतुरः ॥ ७७ ॥

कृतनामाक्षरपिण्डं विभजेद् वसुभिः पुनश्च तच्छेषम् ।
विद्यार्द्धिकं विबलं तयोर्द्वयोः पुरुषयोर्व्यत्क्रमम् ॥ ७८ ॥

वायसमण्डलखरवृषकुञ्जरसिंहध्वजामयः क्रमशः ।
सम्यक् तदुत्तरोत्तरबलाधिकास्ते भवन्ति सदा ॥ ७९ ॥

विबलायो विगतजयो बलाधिकायो बलान्वितः समरे ।
सन्धेयः स समायो विषमायः सर्वदा विजयी ॥ ८० ॥

स्त्रीमित्रराजसेवाग्रामपुरस्थानदेशमन्त्राद्याः ।
आयबलेनैव ततो ज्ञातव्याः शत्रुमित्राणि ॥ ८१ ॥

मात्राभेदं वक्ष्ये जयापजयमित्रशत्रुसन्दीपम् ।
नामाष्टवर्गमानं विख्यातं सर्वलोकेषु ॥ ८२ ॥

ए[7]कोऽयं षोडशकः स पञ्चपञ्चाक्षरान्वि[8]तो वर्गः ।
चतुरक्षरसंयुक्तो द्वि[9]को भवेद् वर्णसङ्ख्या[10]याम् ॥ ८३ ॥

तन्मध्यस्थितनाम ज्ञात्वा सङ्गुण्य तद्बलं ब्रूयात् ।
यो यत्र स्थितवर्गः सा संख्या [12]गीयते तत्र ॥ ८४ ॥

नामप्राप्तं रा[13]शिं द्विगुणं कृत्वा नगोद्धृतो राशिः ।
सममात्रा बलदेयं विषमा जयिनी समाख्याता ॥ ८५ ॥

---

१. 'भाष्यासू' ख., 'भाषितसू' ग. पाठः. २. 'नतधा षष्टिना' ख. 'नगतयावि' क. पाठः ३. 'दकारवर्णा' ख., 'दवकहडवर्णाश्च' ग. पाठः ४. 'दा' क. ख. पाठः. ५. 'क्तः', ६. 'मात्राद्याः' ख. पाठः. ७. 'को यः' क. ग. पाठः. ८. 'ते', ९. 'जो', १०. 'याः', ११. 'मानं ज्ञा' ख. पाठः. १२. 'नी' क. पाठः. १३. 'शि' क. ख. पाठः.

मात्राहीने मृत्युः सेवास्त्रीस्थानमित्रभृत्येषु ।
मात्रामहाधिके सति यन्नाम्नस्तस्यं विजयः स्यात् ॥ ८६ ॥
सेवाचक्रं वक्ष्ये लाभालाभप्रदं च सर्वेषाम् ।
पूर्वं नाम विदित्वा भृत्येश्वरवर्णसंख्याभिः ॥ ८७ ॥
कादिहकारान्तं च प्रोद्धृत्यैकै(व ? क)मत्रं मात्राश्च ।
स्वां संज्ञां प्रक्षेप्य च नाम्नो मध्ये तु विंशतिभिः ॥ ८८ ॥
उक्त्वा सें हरेच्छेषं (?) विलक्षयेन्नामवर्णजीवानाम् ।
तत्फलमुभयोर्मध्ये धनमृणमेतत्क्रमेणैव ॥ ८९ ॥
ऋणमिह मात्राहीनं धनञ्च मात्राधिकं ततो ज्ञेयम् ।
फलदो धनेन राजा निष्फलदः स्यादृणेनैव ॥ ९० ॥
पुनरन्यद् वक्ष्येऽहं सेवाचक्रं विशेषतः सारम् ।
लाभालाभजयाजयमित्रामित्रार्थसन्दीपम् ॥ ९१ ॥
न्यस्योर्ध्वं षड्रेखास्तिर्यक्संस्थास्ततोऽष्टरेखाश्च ।
पञ्चत्रिंशत्कोष्ठे पञ्चस्वरकादिहान्तं च ॥ ९२ ॥
संस्थाप्य ततो गण्यात् सिद्धं साध्यं सुसिद्धमरिमरणम् ।
एतेषां यन्नाम प्रयत्नतो लक्षयित्वा तु ॥ ९३ ॥
स्वांशोऽर्थदो द्वितीयः प्रेष्यो धनदस्तृतीयवर्णांशः ।
प्रीत्यर्थहृच्चतुर्थः स मृत्युदः पञ्चमो ज्ञेयः ॥ ९४ ॥
ग्रामपुरनगरखेटकपत्तनतीर्थाश्रमेषु रम्येषु ।
पञ्चांशेषु वसन्ति हि तेषु म्रियन्ते नरास्तेऽपि ॥ ९५ ॥

---

१. 'त्र' ग. पाठः. २. 'त्यैश्वर्यव', ३. 'न्त्र', ४. 'सं', ५. 'ष्या सि', ६. 'प्रियं ततो' ख. पाठः. ७. 'शा' घ. पाठः. ८. 'पोष्यो' क, ख. ग. पाठः. ९. 'श्चाश्रेषु' ख. पाठः.

स्वामिमित्रपितृभृत्यदारिकाः स्वांशकाः सुफलदायिकाः स्थिरम्।[1][2]
स्नेहिताश्च सतताभिसेविता मृत्युदाः स्युरपि पञ्चमांशकाः
[॥ १६ ॥

इति सङ्ग्रामविजयोदये[3]
द्वादशोऽध्यायः ॥

अथ त्रयोदशोऽध्यायः ।

ताराप्रवेशनिर्गमचक्रं वक्ष्यामि शाम्भवात् सारम् ।
समरुचिरभूप्रदेशे समालिखेत् तत्र चतुरश्रम् ॥ १ ॥

अष्टाविंशतिबिन्दून् समालिखेत् तान् महेन्द्रदिक्क्रमशः।
आग्नेयादियमान्तं नक्षत्रौघं न्यसेत् क्रमशः ॥ २ ॥

शक्रयमवरुणशशधरनिलयगतास्ताः प्रवेशताराः स्युः ।
शिखिनिर्ऋतिपवनशङ्करदिक्स्थाः स्युर्निर्गमास्ताराः ॥३ ॥[4]

अष्टाविंशतितारास्त्रिवलयसंस्थाः प्रवेशगमनाहिताः ।
अभ्यन्तरे चतस्रः सन्ध्यासनसंश्रयाभिहिताः ॥ ४ ॥

निर्गमनैर्निर्गमनं नक्षत्रैश्च प्रवेशनं वेशैः ।
स्तम्भैश्चतुर्भिरासनमक्रूरैरन्वितैर्गूढम् ॥ ५ ॥[5]

प्राकारगोपुरार्गलकवाटपरिघाम्बुभेदनं द्विषताम् ।
स्तम्भैरघटाघातं प्रवेशभैराहवारम्भम् ॥ ६ ॥

लभते प्रवेशनक्षैर्द्रव्यं नष्टं नचात्र निर्गमभैः ।[6]
अन्तर्भेषु न नष्टं दूरगतं बाह्यमण्डलभे ॥ ७ ॥[7]

---

१. 'स्व' ख. पाठः. २. 'राः ।' क. ग. पाठः. ३. 'ये कूर्माय सेवाचक्रविधिर्नाम चतुर्दशोऽध्यायः' ङ. पाठः. ४. 'ता' ख. ङ. पाठः. ५. 'तैर्गाढम्' क. ख. घ., 'तं गाढम्' ग. पाठः. ६. 'ष्टं च नात्र' क. पाठः. ७. 'भैः' ख. पाठः.

उडुरिक्तपूर्णचक्रं प्रागाद्यं यत्तदष्टकुम्भगतम् ।
जीवितमरणोद्दीपं जयलाभं वक्ष्यतेऽद्य मया ॥ ८ ॥
सप्तशलाकाचक्रं संलिख्याग्नेयकादियाम्यान्तम् ।
तस्य शलाकाग्रेषु न्यस्त्वा भकुलं क्रमेणैव ॥ ९ ॥
ऋक्षैस्त्रिभिस्त्रिभिस्तैर्विभज्य कुम्भाष्टकं ततः स्तम्भैः ।
बिन्दुचतुष्कं सद्भिः प्रागाद्यं तल्लिखेच्चक्रम् ॥ १० ॥
रविणारूढं रिक्तं पूर्णं तस्याग्रसंस्थितं कुम्भम् ।
रिक्तं भयदोषकरं पूर्णं कुम्भं जयं तस्य ॥ ११ ॥
अथ गरुडचक्रमन्यत् तारामयमद्य साधु वक्ष्यामि ।
आदित्यनयोपेतं जयापजयदीपनं त्वारम् ॥ १२ ॥
मुखकुक्षिवामपक्षप्रदक्षिणपक्षाङ्घ्रिशीर्षनेत्रेषु ।
शशिबाणवेदजलनिधियुगयुगगुणपावकान् न्यस्त्वा ॥
दुःखतरं वक्त्रस्थं जठरस्थं भोगदं द्विपक्षस्थम् ।
धनहरणं पादस्थं करोति मृत्युं च सूर्यवशात् ॥ १४ ॥
आदित्यस्थितमृक्षं वक्त्रे प्रस्थाप्य वैनतेयस्य ।
संगण्य वदेत् क्रमशः फलाफलं जन्मिनामुभयोः[1] ॥ १५ ॥
तदनु ग्रहपीडाख्यं वक्ष्ये चक्रं महेश्वरागमतः ।
शिरसि रविश्चन्द्रोंऽसे वक्षसि भौमो बुधः कट्याम् ॥
गुरु(हृदये ? रुदरे) भृगुतनयः पृष्ठे जङ्घे शनैश्चरो राहुः ।
पादयुगे क्षतपीडां करोति रोगं यदा तत्रस्थः ॥ १७ ॥
यन्नामस्वरपिण्डं सप्तस्थाने निधाय तत् पिण्डम् ।
प्रक्षिप्याद्यक्रमशो भगणत्रिशुद्धेपु[2] निलयेषु ॥ १८ ॥

---

१. 'न्मनामु' क. ख. ग. घ. पाठः. २. 'पु सप्त निखिलेषु' ङ. पाठः.

तद्वद् राज्ञो[1] नाम्नस्तस्मिन् पिण्डेऽक्षरं[2] (स्य ? ञ्च) संयुज्य ।
सर्वत्र समे लाभो नृपतेर्विषमे च मृत्युश्च ॥ १९ ॥
यद्यस्मिंस्तत्समके स्थाने प्रीतिर्द्वितीयके लाभः ।
असमे मरणं ज्ञेयं भृत्यनिरूपादुपास्ये चं[3] ॥ २० ॥
अथ राहुचक्रमाद्यं जयापजयदीपनं ततो वक्ष्ये ।
पञ्चदशर्क्षशरीरं प्रदक्षिणं सञ्चरं च लिखेत् ॥ २१ ॥
शिरसि द्वे स्कन्धे द्वे जठरे वंशे द्विकं च पुच्छे द्वे ।
द्वे तारे तद्बाह्यादधस्त्रयं द्वे तदूर्ध्वस्थे ॥ २२ ॥
उरगालिङ्गिततारास्त्रिपञ्चकास्तत्र दूषिताः शेषाः ।
द्वादश ताराः शुभदाः सर्पस्यालिङ्गदूरस्थाः ॥ २३ ॥
विजयकरमुपरि युगळं कण्ठोदरपुच्छकं त्रयं वधकम् ।
शेषं भयभङ्गकरं दशकं राहोः शरीरस्थम् ॥ २४ ॥
कण्ठगतं पञ्चर्क्षे[4] यदि मृत्युस्तस्य निश्चयो युद्धे ।
कुक्षिगतं पुच्छगतं यस्यर्क्षं तद्वधः समरे ॥ २५ ॥
यद्राहुस्थितमृक्षं शिरसि न्यस्त्वा क्रमेण संगण्य ।
ब्रूयात् तस्य बलाबलमाहवविजयाजयं तत्र ॥ २६ ॥
शिरसि त्रिभानि जठरे चत्वारि हि पृष्ठकेऽपि चत्वारि ।
चत्वारि पुच्छभागे राहुं न्यस्त्वा फलं[5] ब्रूयात् ॥ २७ ॥
प्रविहृतचक्षुस्ताराः सकेकराश्चिपिटलोचनास्ताराः ।
दृढनेत्राश्च चतुर्था ज्ञातव्याः शास्त्रतः सम्यक् ॥ २८ ॥

---

१. 'ज्ञां', २. 'रस्य संयुक्तम् ।' क. ङ. पाठः. ३. 'यम् ।' ग. पाठः. ४. 'वर्ण्यर्क्षं', ५. 'ब' ख. ग. पाठः.

भरणीस्वातिविशाखापुष्याश्लेषाश्विनीमुरघ्नास्ताः ।
दृढनेत्राः सप्तै(ते ? ता) ज्ञातव्याः सर्वकार्यफलाः ॥ २९ ॥
चित्राषाढपुनर्वसुरेवत्यः केकराश्च निर्दिष्टाः ।
आहिर्बुध्न्याषाढाहस्तार्द्रास्तास्ततोऽन्धाः स्युः ॥ ३० ॥
आग्नेयसौम्यमूलज्येष्ठावसुरोहिणीमखाजपदः ।
आर्यमभगानुराधाः सवारुणाश्विपिटनेत्राश्च ॥ ३१ ॥
नाडीचक्रं वक्ष्ये स्वजन्मनः सप्तविंशतारोक्तम् ।
यच्च चतुर्लेखाभिर्लिखितं चोर्ध्वं त्रिबिन्दुयुतम् ॥ ३२ ॥
सौम्यत्वाष्ट्रधनिष्ठास्तिस्रस्तस्योर्ध्वबिन्दुसंसृष्टाः ।
अश्विन्यादिक्रमशश्चतुश्चतुःखण्डगणनीयम् ॥ ३३ ॥
यज्जन्मनाडिकायामेकांशगतौ प्रभाकरोर्वीजौ ।
यदि तद्द्रव्यविनाशो राजानलदस्युभयमचिरात् ॥ ३४ ॥
गुणनाडीचक्रमिदं यथा[२] त्रिरेखं लिखेद् भुजङ्गाभम् ।
ऊर्ध्वं बिन्दुचतुष्कं यदष्टखण्डं विचक्रं च ॥ ३५ ॥
गणयेत् सकृत्तिकाद्यं यावत् पौष्णं त्रिकं त्रिकं न्यस्त्वा ।
हरदिनकरजलजोत्तरभद्रचतुष्कं तदूर्ध्वस्थम् ॥ ३६ ॥
एकांशे बुधचन्द्रौ वस्त्रस्त्रीरत्न[३]तारनाशकरौ ।
गुरुमन्दावेकांशे[४] गतौ[५] च देशक्षयामयदौ ॥ ३७ ॥
राहुसितावेकांशे नाड्यां यदि तिष्ठतश्च बलवन्तौ ।
युद्धं महातिघोरं दुर्भिक्षं जायते राष्ट्रे[६] ॥ ३८ ॥

---

१. 'ध्ना' ख. पाठः. २. 'दा' ग. पाठः. ३. 'कारिना' ङ. पाठः. ४. 'शे भग' ग. पाठः. ५. 'तौ दे' क. ग. पाठः. ६. 'लोके ॥' क. घ. पाठः.

प्राक्पश्चिमनवलेखं दक्षिणसौम्यत्रिलेखमश्वोद्यम् ।
चक्रं त्रिकण्टकाख्यं जीवितमरणप्रदीपं च ॥ ३९ ॥

यद्येकांशे चन्द्रो विषमर्क्षे यस्य पावकस्तस्य ।
मरणं विकलं व्याधिं करोति निधनोद्यमे साक्षात् ॥ ४० ॥

[२]विपदि त्रिपञ्चनाड्यां प्रत्यर[३]म्भे सप्तमे भवेद् गणिते ।
एके च परममैत्रे मैत्रे वधकृत् तदंशस्थः ॥ ४१ ॥

प्रागपरसप्तलेखं याम्योत्तरदिक्चतुर्द्विरेखाग्रम् ।
एतत् साधनचक्रं साधु चतुष्कण्टकं नाम ॥ ४२ ॥

जन्मनि कर्मणि गर्भे षष्ठाष्ट[४]मयोर्यदीन्दुरास्थितवान् ।
स क्रूरो यस्यर्क्षे करोति मृत्युं क्षणाच्चन्द्र[५]ः ॥ ४३ ॥

अंशकचक्रमिदानीमष्टोत्तरशतमपूर्वमृक्षाणाम् ।
वक्ष्ये नष्टद्रव्यं प्रमुष्टिकं नाम चिन्तार्थम् ॥ ४४ ॥

आदित्यभौमभार्गवबुधगुरुशनिचन्द्रमूर्तयः कथिताः ।
अकचटतपयादीनां क्रमशस्ते सप्तवर्गाणाम् ॥ ४५ ॥

उदयाक्षरं च दस्योर्नाम्नः प्रथमाक्षरं तदुद्दिष्टम् ।
हिबुकभवर्णं तदनु द्वितीयवर्णं तृतीयं च ॥ ४६ ॥

जामित्रभवर्णोऽयं खराशिवर्णं चतुर्थवर्णं स्यात् ।
उदये प्रथमो वर्णो [६]यद्यस्तखकण्टकेष्वेवम् ॥ ४७ ॥

---

१. 'न्त्या' ग., 'ध्या' ङ. पाठः. २. 'द्वि' ग. पाठः. ३. 'वेरे स' क. ग. पाठः. ४. 'भ' क. ख. ग. पाठः. ५. 'न्द्रः ॥ इति सङ्ग्रामविजयोदये ताराप्रवेशनिर्गमादिचक्रविधिर्नाम पञ्चदशोऽध्यायः' ङ. पाठः. ६. 'हिबुकास्त' ग. पाठः.

एवं सङ्गण्य बुधस्तस्करनामाक्षरं स्फुटं ब्रूयात् ।
धनपुत्रलाभनिधनं[1] तदुद्गमे तत्र निर्दिष्टम् ॥ ४८ ॥

व्ययसहजषष्ठनवमभवेलायां नष्टवस्तुनामैवम् ।
नक्षत्रं च चतुर्भिर्वर्णैः प्रोक्ताक्षरैर्लग्नम् ॥ ४९ ॥

अष्टोत्तरशतवर्णं नक्षत्रगणं ततः प्रवक्ष्यामि[2] ।
कचटयं[3] अश्विनी अठशख भरणी स्यात् तं[4]पफध कृत्तिका
[॥ ५० ॥

गजहर रोहिणीति निर्दिष्टम् (?) ॥

अढझघ मृगशिरा दवं[5]भध शङ्करस्य नक्षत्रम् ।
[6]ऋञणप पुनर्वसु ईं[7]हचक पुष्या नर्पं[8]पतं[9] आश्लेषा ॥ ५१ ॥

[10]खंहठव मखा ईं[11]डगत पूर्वा फल्गुनी ज्ञेया ।
थ[12]बंभद उत्तरा घथं[13]पंश हस्त इत्युक्तः ॥ ५२ ॥

उ[14]डंञण चित्रा थं[15]भमन स्वातीनक्षत्रम् ।
कचशष विशाखा ऊं[16]ठछक भवेन्मैत्रम् ॥ ५३ ॥

---

१. 'नभसदुर्गमैत्रेत(?)नि' क. ग. पाठः. २. 'मि । अक', ३. 'त' ग. पाठः. ४. 'सफध' ख., 'पफकृ' ग., 'तपफथ' ङ. पाठः. ५. 'वभेदघ श' क. घ., 'भमध श' ङ. पाठः. ६. 'दन्तञलव पु' ग., 'ङञणल पु' ङ. पाठः. ७. 'ळळहक' घ., 'गुहच पु' ग. पाठः. ८. 'व' क. पाठः. ९. 'तम आ' ग. पाठः. १०. 'खजठं म' क. घ., 'खघठध म' ग. पाठः. ११. 'इदडगओ पू' क. घ., 'इघगओ पू' ग., 'ईडजगओ पू' ङ. पाठः. १२. 'बडभ' घ., 'बं' क. ग. पाठः. १३. 'फ' ग. पाठः. १४. 'ङज चि' क. ग. घ. पाठः. १५. 'घमपन' ङ. पाठः. १६. 'ऊठहखभ' ङ., 'औठ छख भ' ग. पाठः.

छडपठ[1] ज्येष्ठा जगदस[2] मूलमित्युक्तम् ।
गडबध[3] पूर्वाषाढा डबभध[4] उत्तराषाढम् ॥ ५४ ॥
भजणग[5] श्रावणमेतत् (ऐ?) तटचक धनिष्ठा स्यात् ।
नवपत[6] शतभिषक् खशरथ[7] पूर्वभद्रपदा ॥ ५५ ॥
ईडगज[8] उत्तरा भद्रपदा धफबद[9] रेवती ।
प्रश्नं वक्ष्यामि ततः कैवल्यं सारमत्र संक्षेपात् ॥ ५६ ॥
एकाक्षरा च मुष्टया द्वितीयवर्णं स्वसंख्यायाः[10] ।
नष्टे तृतीयवर्णं न[11]चाक्षरैर्जीवितस्य निर्दिष्टम् ॥ ५७ ॥
एवं क्रमेण नित्यं जानीयान्नष्टमुष्ट्याद्याः ॥

आरण्यभूग्रामपयोगिरीन्द्रग्रामा[12]पगाकूपवनाम्बुवारि ।
महार्णवः पूर्वदिशां क्रमेण भवन्त्यजादेर्निलयप्रदेशाः ॥५८॥

आदित्यस्य शिवालयं नवगृहं चन्द्रे कुजे दग्धकं
सौम्ये चित्रगृहं गुरौ सुरगृहं शुक्रेऽपि[13] चित्रान्वितम् ।
मन्दे शून्यगृहं विगेहमुरगे भग्नं गृहं निश्चयं
केतोः केन्द्रगृहादिषु प्रवरधी[14]र्ब्रूयात् [15]स्थलं शास्त्रतः ॥ ५९ ॥

---

१. 'फथर ज्ये' ख., 'छपठ ज्ये' ग., 'तफबथ ज्ये ङ. पाठः. २. 'जगदध मू' ग., 'शजदड मू' ङ. पाठः. ३. 'गडकश पू' क. घ., 'एढझघ पू' ङ. पाठः. ४. 'दमभध उ' ङ. पाठः. ५. 'ङञणह श्रा' ङ. पाठः. ६. 'पफत' ङ. पाठः. ७. 'खछठफ पू' क. ग. घ., 'खहठळ पू' ङ. पाठः. ८. 'जधनग उ' ग., 'ओडजग उ' ङ. पाठः. ९. 'थबभध रे' ङ. पाठः. १०. 'याम् ॥' क. ग. पाठः. ११. 'वा', १२. 'पणावटककू' ङ. पाठः. १३. 'वि' ग. ङ. पाठः. १४. 'बलधी' ग. पाठः. १५. 'फ' क. पाठः.

भानोः स्थलं शीतकरे जलं च
भौमेष्टका चन्द्रसुते वनानि ।
शुक्रे जलं देवहिते वनं च
मन्दे च रूक्षं वनमुग्रधाम ॥ ६० ॥

चन्द्रगतिचक्रमथ तद् वक्ष्येऽहं पूर्वशास्त्रतः सारम् ।
अष्टाविंशतिकोष्ठं ज्ञेयं तत् कृत्तिकाद्यं च ॥ ६१ ॥

यत्र स्थितः शशाङ्कस्तत्र द्रव्यं स्थितं विनिर्दिष्टम् ।
यस्मिन् ग्रहश्च तस्मिन् क्रूरः शल्यं विनिर्दिष्टम् ॥ ६२ ॥

पञ्चमनवमतृतीये शुभाः स्थिताश्चेद्विनिश्चितं द्रव्यम् ।
नान्यद् द्रव्यं ज्ञेयं तदंशकाच्छल्यमुद्दिष्टम् ॥ ६३ ॥

षष्ठे रजतं राशौ ताम्रं प्रोक्तं झषे तु हेम स्यात् ।
अष्टमचतुर्थयोरपि सौम्येषु च हेमताराङ्कम् ॥ ६४ ॥

तेष्वेव ताम्रलोहं पापतमैरेषु भेषु विज्ञेयम् ।
कार्मुककुळीरमृगझषतुलाधरेष्वेव नास्त्यपि च ॥ ६५ ॥

एवं क्रमेण शल्यैर्द्रव्यं भूमौ च तत्र विज्ञेयम् ।
पश्यन्त्यजहरिचापा वृषपतिकन्यामृगा याम्याम् ॥ ६६ ॥

अपरां यमकुम्भतुलाः कर्क्यलिमीनाः कुबेरदिग्भागे ।
जङ्घास्थकाळदेशे भार्यात्मजमृत्यवो (द्दि ? दि)ष्टाः ॥ ६७ ॥

जङ्घाप्रमाणघाते शल्यं तत्पूर्वभागकोष्ठस्थ ।
शल्यं तद्वुद्धतास्ते प्रमाणतो विद्यते तत्र ॥ ६८ ॥

---

१. 'ष्टिं', २. 'ल्यं', ३. 'द्धृ' क. पाठः. ४. 'त्र ॥ वक्रास्त्रिकोणन ःकरद' क., 'त्र ॥ वक्रास्तिकोणेन' ग. पाठः.

[[1]नरकरदण्ड[2]भयं स्याद् [3]ग्रहेऽस्य [4]कंट्यस्त्रकटिमाने ।
[5]अस्ति जकारे [6]हनी हयं याम्ये निर्ऋते[7]श्चँ स्मितकारे ॥६९॥
हस्ताद् भार्याविनाशः स्याद् बालार्स्तवरुणदेशे ।
य[9]तोन्तर[10]देशमादेशं मान्तरभवन्नागे गळनळकम् ॥ ७० ॥
[11]गळमाने भयं दण्ड[12]करे सपदे स्पर्शचक्रम् ।
[13]अंकजजतं [14]यदि संक्ष[15]भेवान्?] ॥ ७१ ॥
प्रागश्विन्या याम्ये मखाक्रमात् पश्चिमेऽनुराधायाः ।
उत्तरदेशे वसुभात् सङ्गणयेत्तमदं (?) समासात् ॥ ७२ ॥
मेषाद्यंशकचक्रं साष्टशतं कोष्ठवृन्दमुद्दिष्टम् ।
गोमूत्रमार्गलिखितं विन्यासं चारवित् क्रमशः ॥ ७३ ॥
राहोरुत्तरफलं सर्वं नाशयेत् तु निशाकरः ।
शुक्रश्चैव गुरुश्चैव तेषां दृष्टिर्युति[16]श्च वै ॥ ७४ ॥
पातेन्दुशुक्रा घटराशिलग्ने मेषे रवौ सौम्ययुते सभूजे ।
सिंहे गुरौ मन्दिरयोग एष कुर्याद् वृद्धिं श्रीसमास्था-
[पने तु(?) ॥ ७५ ॥

१. 'नरकद' क. ख. ग., 'न करद' घ. पाठः. २. 'यदस्य ग्रहेशस्य' ग. पाठः. ३. 'हेशस्य' क. पाठः. ४. 'कट्यस्तिकटिर्माने' क. घ., 'कुब्यस्त्रीकटिर्माने' ग. पाठः. ५. 'हस्तज' ङ. पाठः. ६. 'तनीभयं' क., 'जस्तनीभयं' ग. पाठः. ७. 'चास्थित' क. घ. ङ., 'श्चास्थित' ग. पाठः. ८. 'ख्र' क. पाठः. ९. 'का' क. ग., 'कारान्तरभयं नाभौ गलनलकं कलमाने' ङ. पाठः. १०. 'दशमान्तः भयं नाभेगच्छेकम्' ग. पाठः. ११. 'गुणमाने', १२. 'रे वदेत् गदस्य' क. घ. ङ. पाठः. १३. 'अककज' क., 'अजढतं' ग., 'अर्कजजातं यदसत् क्षभं प्रा' ङ. पाठः. १४. 'दसं कुम्भं प्रा' क. पाठः. १५. 'भं प्रा' ग. पाठः. १६. 'श्च भवेत्' क. पाठः.

स्तम्भस्थापनराशेस्तु तृतीये यदि वै गुरुः ।
तस्य नाशं वदेद् विद्वान् राष्ट्रं चापि विनश्यति ॥ ७६ ॥

दधिभोजनमाग्नेये प्राजापत्ये तु तित्तिरीमांसम् ।
मृगमांसं मृगशीर्षे रौद्रे रक्तं पटोलमतः ॥ ७७ ॥

घृतपायसं च पुष्ये विहङ्गमांसं पयोऽथवाश्लेषे ।
शाल्योदनं मखायामपूपभक्ष्यं च फाल्गुन्याम् ॥ ७८ ॥

गुलमुत्तरफल्गुन्यां यावकभोज्यं च हस्तनक्षत्रे ।
चित्रान्नं चित्रायां स्वात्यामलकं समाख्यातम् ॥ ७९ ॥

इन्द्राग्नौ कुलभोज्यं कुलस्थभक्ष्यं च मित्रदैवत्ये ।
तिलशष्कुलिकं चैन्द्रे मूलर्क्षे मूलकं प्राश्येत् ॥ ८० ॥

[2]केणबीजपूरकमाप्ये[3] भे गोपञ्चकं च वैश्वदेवत्ये (?) ।
सक्तुं श्रवणे प्राश्येच्छाल्यन्नं तद्धनिष्ठायाम् ॥ ८१ ॥

[4]घृतशष्कुलिं वरुणभे प्रोष्ठपदे मधु पयश्च भाद्रपदे ।
पौष्णे मौद्गं क्षीरं प्राश्यं प्रथमे गुळं याम्ये ॥ ८२ ॥

आज्यतिलौदनमत्स्यक्षीरं प्राश्यं च तत्र पूर्वाद्यम्[1] ।
हस्तिरथाश्वनृवाहाः प्रागाद्या गच्छतो राज्ञः ॥ ८३ ॥

नरतुरगमेषकुक्कुटकपिञ्जलाड्डि[5]पनियुद्धधामबलम् ।
नक्षत्रग्रहहोरावाराख्यं तत् प्रवक्ष्यामि ॥ ८४ ॥

द्वन्द्वादीभघटान्तं पञ्चविधं युद्धमाहुरौशनसाः ।
सुरगुरुशिष्याः प्राहुश्चतुर्विधं त्र्यङ्गमन्येऽपि ॥ ८५ ॥

---

१. 'च पूर्वफा' क. पाठः. २. 'तौ पिण्डकपू' क., 'कौपिण्डिजपू' ग. पाठः. ३. 'प्येऽम्भःकोपं च' क. ख. ग. पाठः. ४. 'शष्कुलिकं वारु' ङ. पाठः. ५. 'पद्विपदयु' घ. ङ. पाठः.

प्रथमं च युद्धभूमौ बल्युपहारादि कर्म निर्वर्त्य ।
पश्चाद् प्रभातकाले योद्धव्यं स्थायिभिः पूर्वम् ॥ ८६ ॥

कुलनक्षत्रशुभग्रहहोरायबलैः प्रवेशयेत् स्थायी ।
पश्चादकुलैः पापैः प्रवेशयेद् युद्धभूमिं च ॥ ८७ ॥

शत्रोरष्टमराशौ शत्रुवधं तस्य षष्ठभे स्ववधम् ।
यदि रिपुजन्मविलग्नं चतुर्थकं वास्तकं विजयम् ॥ ८८ ॥

बुधगुरुशुक्रैः सुबलैः स्वात्महितैः पूर्वमाहवं गच्छेत् ।
क्षीणेन्दुभौमरविसुतकेतुभुजङ्गैस्ततः पश्चात् ॥ ८९ ॥

स्थानस्थं प्रति यायाद् याता यायिग्रहैर्दृढं सुबलैः ।
पौरैः स्थेयात् स्थायी स्थिरं नृपेन्द्रस्य देशे तु ॥ ९० ॥

नहि यायाद् रणभूमिं हिबुकास्तगते स्वजन्मराशौ वा ।
नहि तुहिनकिरणवाहे नागोग्रसमीरसञ्चारे ॥ ९१ ॥

न्यस्त्वात्मपृष्ठदेशे भुजगाधिपमुष्णरश्मिमग्रेन्दुम् ।
स जयेच्छत्रुमसाध्यं शक्रेण समं क्षणात् समरे ॥ ९२ ॥

विष्टचक्रे ब्रह्मास्त्रे ग्रहयुगमध्ये त्रिशूलवज्रेषु ।
परिघान्ताष्टमराश्योर्नहि तिष्ठेद् युद्धभूचक्रे ॥ ९३ ॥

चन्द्रं दक्षिणभागे वामे भानुं च पृष्ठगं राहुम् ।
न्यस्त्वा स जयेच्छत्रून् सङ्ग्रामे शार्ङ्गिणा सदृशम् ॥९४॥

राशिगतमुरगराजं तात्कालिकमात्मपृष्ठदेशे तु ।
तत्कालिकेन्दुमग्रे न्यस्त्वा स जयेत् रिपुं शीघ्रात् ॥९५॥

---

१. 'दृष्ट्वा स' ङ. पाठः.

स्तम्भस्थापनराशेस्तु तृतीये यदि वै गुरुः ।
तस्य नाशं वदेद् विद्वान् राष्ट्रं चापि विनश्यति ॥ ७६ ॥

दधिभोजनमाग्नेये प्राजापत्ये तु तित्तिरीमांसम् ।
मृगमांसं मृगशीर्षे रौद्रे रक्तं पटोलमतः ॥ ७७ ॥

घृतपायसं च पुष्ये विहङ्गमांसं पयोऽथवाश्लेषे ।
शाल्योदनं मखायामपूपभक्ष्यं च फाल्गुन्याम् ॥ ७८ ॥

गुलमुत्तरफल्गुन्यां यावकभोज्यं च हस्तनक्षत्रे ।
चित्रान्नं चित्रायां स्वात्यामलकं समाख्यातम् ॥ ७९ ॥

इन्द्राग्नौ कुलभोज्यं कुलस्थभक्ष्यं च मित्रदैवत्ये ।
तिलशष्कुलिकं चैन्द्रे मूलर्क्षे मूलकं प्राश्येत् ॥ ८० ॥

[2]कैणबीजपूरकमाप्ये[3] भे गोपञ्चकं च वैश्वदेवत्ये (?) ।
सक्तुं श्रवणे प्राश्येच्छाल्यन्नं तद्धनिष्ठायाम् ॥ ८१ ॥

[4]घृतशष्कुलिं वरुणभे प्रोष्ठपदे मधु पयश्च भाद्रपदे ।
पौष्णे मौद्गं क्षीरं प्राश्यं प्रथमे गुळं याम्ये ॥ ८२ ॥

आज्यतिलौदनमत्स्यक्षीरं प्राश्यं च तत्र [1]पूर्वाद्यम् ।
हस्तिरथाश्वनृवाह्याः प्रागाद्या गच्छतो राज्ञः ॥ ८३ ॥

नरतुरगमेषकुक्कुटकपिञ्जलद्वि[5]पनियुद्धधामबलम् ।
नक्षत्रग्रहहोरावाराख्यं तत् प्रवक्ष्यामि ॥ ८४ ॥

द्वन्द्वादीभघटान्तं पञ्चविधं युद्धमाहुरौशनसाः ।
सुरगुरुशिष्याः प्राहुश्चतुर्विधं त्र्यङ्गमन्येऽपि ॥ ८५ ॥

---

१. 'च पूर्वफा' क. पाठः. २. 'तौ पिण्डकपू' क., 'कौपिण्डिजपू' ग. पाठः. ३. 'प्येऽम्भःकोपं च' क. ख. ग. पाठः. ४. 'शष्कुलिकं वारु' ङ. पाठः. ५. 'पद्विपदयु' घ. ङ. पाठः.

प्रथमं च युद्धभूमौ बल्युपहारादि कर्म निर्वर्त्य ।
पश्चाद् प्रभातकाले योद्धव्यं स्थायिभिः पूर्वम् ॥ ८६ ॥

कुलनक्षत्रशुभग्रहहोरायबलैः प्रवेशयेत् स्थायी ।
पश्चादकुलैः पापैः प्रवेशयेद् युद्धभूमिं च ॥ ८७ ॥

शत्रोरष्टमराशौ शत्रुवधं तस्य षष्ठभे स्ववधम् ।
यदि रिपुजन्मविलग्नं चतुर्थकं वास्तकं विजयम् ॥ ८८ ॥

बुधगुरुशुक्रैः सुबलैः स्वात्महितैः पूर्वमाहवं गच्छेत् ।
क्षीणेन्दुभौमरविसुतकेतुभुजङ्गैस्ततः पश्चात् ॥ ८९ ॥

स्थानस्थं प्रति यायाद् याता यायिग्रहैर्दृढं सुबलैः ।
पौरैः स्थेयात् स्थायी स्थिरं नृपेन्द्रस्य देशे तु ॥ ९० ॥

नहि यायाद् रणभूमिं हिबुकास्तगते स्वजन्मराशौ वा ।
नहि तुहिनकिरणवाहे नागोग्रसमीरसञ्चारे ॥ ९१ ॥

न्यस्त्वात्मपृष्ठदेशे भुजगाधिपमुष्णरश्मिमग्रेन्दुम् ।
स जयेच्छत्रुमसाध्यं शक्रेण समं क्षणात् समरे ॥ ९२ ॥

विष्टचग्रे ब्रह्मास्त्रे ग्रहयुगमध्ये त्रिशूलवज्रेषु ।
परिघान्ताष्टमराश्योर्नहि तिष्ठेद् युद्धभूचक्रे ॥ ९३ ॥

चन्द्रं दक्षिणभागे वामे भानुं च पृष्ठगं राहुम् ।
न्यस्त्वा स जयेच्छत्रून् सङ्ग्रामे शार्ङ्गिणा सदृशम् ॥९४॥

राशिगतमुरगराजं तात्कालिकमात्मपृष्ठदेशे तु ।
तत्कालिकेन्दुमग्रे न्यस्त्वा स जयेत् रिपुं शीघ्रात् ॥९५॥

---

१. 'दृष्ट्वा स' ङ. पाठः.

परिघालङ्घनमुर्व्यां नहि कुर्यात् स्थानचन्द्रमस्पृष्ठा ।
न्यस्त्वात्मपृष्ठमर्कं सद्यः शत्रुं जयेत् समरे ॥ ९६ ॥

पृष्ठेऽथ वामभागे न्यस्त्वा सर्वज्ञचारमनुकूलम् ।
चतुरङ्गबलोपेतं स जयेच्छीघ्रं ततः शत्रुम् ॥ ९७ ॥

परिघा सितपक्षेऽह्नि वायव्याग्नेयमध्यमे सुस्था ।
ईशाननिर्ऋतिमध्ये स्थिता च रात्रौ तमः[1]पक्षे ॥ ९८ ॥

परिघामुल्लङ्घ्य हठाद् ये[2] गच्छन्ति प्रहर्तुमधिकबलाः ।
परसैन्यं रणभूमौ ते यान्ति यमालयं सद्यः ॥ ९९ ॥

दूरे वाथ समीपे स्वस्य पदस्यैव धाम्नि तन्मध्ये ।
परिघेति समाख्याता न लङ्घनीया ततो नित्यम् ॥ १००॥

सद्यः प्रविष्टपादं स्वपं च निर्वर्त्य युद्धभूभागे ।
हन्याद् रिपुसङ्घातं गरुड इव व्यालसङ्घातम् ॥ १०१॥

भास्करविष्टिशनैश्चरभूमिजभुजगेन्द्रकेतुगुळिकांश्च ।
न्यस्त्वात्मपृष्ठदेशे चन्द्रं वामेतरे न्यस्त्वा ॥ १०२॥

एकेन पञ्च पुरुषा हन्यन्ते पञ्चभिश्च[3] विंशनराः ।
विंशतिभिः शतपुरुषाः शतैर्नरैस्ते[4] सहस्राश्च ॥ १०३ ॥

दीपध्वान्तस्थानं ज्ञात्वा तिष्ठेज्जयाय भूभागे ।
यस्मिञ् शशी स दीपो यत्र भुजङ्गोऽस्ति तद् ध्वान्तम्
[॥ १०४॥

तत्कालोदितराशिं प्राच्यां वामे द्वितीयराशिं च ।
वरुणे तृतीयराशिं सौम्ये च चतुर्थराशिं च ॥ १०५ ॥

---

१. 'तः' ङ. पाठः. २. 'भटा ये' ग. पाठः. ३. 'श्चतुर्विंश',
४. 'स्तैः स' क. ग. घ. पाठः.

कोणेषु द्वौ द्वौ च न्यस्त्वा [1]सम्यक् क्रमेण भूचक्रे ।
यत्र फणी तत्र जयो यत्रेन्दुस्तत्र मृत्युः स्यात् ॥१०६॥
घटिकाराहुपरिभ्रममुन्निद्रफणीन्द्रधामसंरूढम् ।
परिहृत्य राहुवदनं प्रहरेच्छत्रुं परिभ्रमणे ॥ १०७ ॥
एकनाम नरयोर्द्वयोः [2]सदिक् केचिदाहुरनिशं मनीषिणः ।
वामभानुमुडुपं [3]स्वदक्षिणे न्यस्य पृष्ठभुजगं जयेत् पुमान् ॥

यस्मिन् प्रदेशे समुपैति देव-
स्तस्मिन् प्रदेशे बलमस्ति सम्यक् ।
तत्र स्थिरं तिष्ठतु युद्धकाङ्क्षी
स शत्रुसैन्यं विजयेदमोघम् ॥ १०९ ॥

पृष्ठे यस्य भुजङ्गविष्टिगुळिकाश्चन्द्रः पुरस्संस्थितो
वामे भूमिसुतार्कपुत्रदिनकृच्छुक्राङ्गिरा दक्षिणे ।
स्थानं कर्तरिवज्र[4]कण्टपरिघादिक्शक्तिदृग्व[5]र्जितं
सङ्ग्रामे स जयेद् [6]द्विषं च सबलं हस्त्यादिभिः संयुतम्
॥ ११० ॥

इति सङ्ग्रामविजयोदये[7]
त्रयोदशोऽध्यायः ॥

अथ चतुर्दशोऽध्यायः ।

चन्द्रशनैश्चरभास्करभौमोरगविष्टिकेतुगुळिकेभ्यः ।
अधिकबलमुत्तमोत्तममुदयबलं योगिनीनां च ॥ १ ॥

---

१. 'सौम्यं क्र', २. 'सरिं के', ३. 'स' ग. पाठः. ४. 'मष्टप' क., 'मण्डप' ग., 'दण्डप' ङ. पाठः. ५. 'र्ति' ग. पाठः. ६. 'षड्बलमलं' क. पाठः. ७. 'ये अंशकचक्रयुद्धलक्षणं नाम षोडशोऽध्यायः ॥' ङ. पाठः.

स्वरराशिग्रहराहितं जयप्रदं शत्रुसैन्यविध्वंसम् ।
दुर्विज्ञा[1]नममोघं स्वसैन्यसंरक्षणं वक्ष्ये ॥ २ ॥

ब्राह्मी वृषभपताका कौमारी वैष्णवी च वाराही ।
इन्द्राणी चामुण्डी योगिन्यै[2]श्चाष्टमी महालक्ष्मीः ॥ ३ ॥

पीतधवळासितारुणनीलश्यामाञ्जनाग्निवर्णाभाः ।
प्रागुत्तराग्निराक्षसयमाब्धिपवनेशधामस्थाः ॥ ४ ॥

पातालगगनमण्डलसमुद्रबडवाग्निमध्यदेशेषु ।
स्वरतिथिनक्षत्रग्रहराशिद्रेक्काणभागेषु ॥ ५ ॥

गिरिजलवनगहनाश्रमनगरपुरक्षेत्रपुष्पवृक्षेषु ।
[3]मार्गचतुष्पथसन्धिषु योगिन्यः सञ्चरन्ति सदा ॥ ६ ॥

उद्यन्ते योगिन्यस्तिथिभिः सार्धं समस्तवारेषु ।
प्रागाद्यास्ताः क्रमशो द्विपक्षयोः कालरूपेण ॥ ७ ॥

ब्राह्मी पू[4]र्वदिशायां प्रतिपन्नवमीद्वयेऽपि समुदेति ।
वरुणस्थितसमदृष्टी राक्षसपवनेऽर्द्धदृष्टिश्च ॥ ८ ॥

यो दृष्ट्य[5]ग्रे संस्थस्तस्याः समरे महाबलोपेतः ।
स पतेदैन्द्रशिरस्को ब्राह्मीपादद्व[6]ये प्रहतः ॥ ९ ॥

दशमीद्वितीययोरिह भुङ्क्ते माहेश्वरी च कौबेर्याम् ।
याम्यार्पिता[7]र्धदृष्टिः समस्तदृष्टिर्निर्ऋतिपावकयोः ॥ १० ॥

अवलोकितर्या दृष्ट्या तस्याः स पतेदुदक्शिराः पुरुषः ।
तस्माद् दृष्टिस्थानं विवर्जयेद् दीर्घजीवी चेत् ॥ ११ ॥

---

१. 'त', २. 'न्योऽष्टौ म' क. पाठः. ३. 'क्षेत्रच' ङ. पाठः. ४. 'नि' ग. पाठः. ५. 'घैं', ६. 'य' क. पाठः. ७. 'म' ग. पाठः. ८. 'यास्तस्याः' ङ. पाठः.

आग्नेयदिग्विरूढा वायुस्थानावलोकिनी नित्यम् ।
कौमारी प्रविभुङ्क्ते सैकादश्यां तृतीयायाम् ॥ १२ ॥

द्वादश्यां च चतुर्थ्यां नैर्ऋत्यां वैष्णवी ततो भुङ्क्ते ।
ईशानस्थानार्पितसमदृष्टिः क्रूरिणी युद्धे ॥ १३ ॥

चतुरङ्गबलोपेतस्तद्दृष्ट्या विद्धाम्नि यस्तिष्ठेत् ।
स हतः शत्रुभिरुग्रैः पादद्वन्द्वे पतेत् तस्याः ॥ १४ ॥

पञ्चम्यां मदनतिथौ वाराही याम्यसंस्थितोदेति ।
सौम्येशानसमीरणदिशार्पितसमार्ध[1]दृष्टिश्च ॥ १५ ॥

वारुण्यामिन्द्राणी भुङ्क्ते षष्ठ्यां स्फुटं चतुर्दश्याम् ।
दृष्टिस्तस्याः प्राच्यां रुद्राग्नेयार्धदृष्टिश्च ॥ १६ ॥

यस्तिष्ठेद् दृष्ट्यग्रे बलवांश्चतुरङ्गसंयुतः समरे ।
स पतेद् वरुणशिरस्को महेन्द्रपदद्वये प्रहतः ॥ १७ ॥

आग्नेयदिग्विदृष्टिश्चामुण्डी वायुगोचरे भुङ्क्ते[2] ।
कालेन चोदितायां सप्तम्यां पौर्णमास्यां च ॥ १८ ॥

अष्टम्यामेकतिथौ राक्षसधामावलोकिनी भुङ्क्ते ।
ईशानदिग्विसंस्था समस्तसंहारिणी लक्ष्मीः ॥ १९ ॥

यस्याः परमेश्वर्याः समदृष्टिः पुरस्थितश्च यो युद्धे ।
तस्याः पादद्वन्द्वे स पतेत् तद्रक्षणाय हतः ॥ २० ॥

ब्राह्मी प्रथमं भुङ्क्ते पश्चान्माहेश्वरी च कौमारी ।
चक्रधरी वाराही सैन्द्री चण्डी महालक्ष्मीः ॥ २१ ॥

---

१. 'ग्र' ङ. पाठः. २. 'चरति ।' क. ख. पाठः.

रविचन्द्रभौमबुधगुरुशुक्रार्कजराहुरूपवेषिण्यः ।
उद्यन्ते योगिन्यः पृथक्पृथक्स्तास्तिथिच्छेदे ॥ २२ ॥

एकैकस्याः शक्तेः समे त्रिपादत्रिनाडिका ज्ञेयाः[1] ।
विषमे विपरीताः स्युर्हीनाधिकनाडिकास्तस्याः ॥ २३ ॥

द्वौ प्राणौ दश नाड्यः पञ्चत्रिंशत्पलान्यहोरात्रे[2] ।
भुक्तिर्दिनाधिपायास्तस्यास्तत्रैवं[3] योगिन्याः ॥ २४ ॥

प्रत्येकं शेषाणां दिनरजनीमाननाडिकामध्ये ।
एकस्फोटप्राणद्वयं[4] च घटिकाः सप्तांसाम्[5] ॥ २५ ॥

ये तिष्ठन्ति तदग्रे सङ्ग्रामे युद्धकाङ्क्षिणः पुरुषाः ।
सा हन्ति तांश्च सर्वान्[6] हस्त्यश्वरथादिभिर्युक्तान् ॥ २६ ॥

सङ्ग्रामे यात्रायां विवाहमङ्गलगृहप्रवेशेषु ।
विद्यारम्भे विद्वान् दृष्टिगतं वर्जयेत्[6] स्थानम् ॥ २७ ॥

उदयेऽस्तमये निशावधौ प्रविभुङ्क्ते[7] दिवसाधिदेवता ।
दिवसे निशि शेषदेवताः क्रमशो द्विः परिभुञ्जतेऽपराः ॥ २८ ॥

चतुष्प्रभुङ्क्ते तिथिनायकी दृढं
दिवारजन्योर्भुवि योगिनी परा ।
ततस्तु शेषा द्विरिह[8] प्रभुञ्जते
इति प्रकारं प्रवदन्ति केचन ॥ २९ ॥

इति सङ्ग्रामविजयोदये[9]
चतुर्दशोऽध्यायः ॥

---

१. 'या ।', २. 'स्फ' क. ख. पाठः. ३. 'क' ख. पाठः.
४. 'प्रमाण' क. पाठः. ५. 'सांशाः' ङ. पाठः. ६. 'ने ।', ७. 'ति',
८. 'रहः', ९. 'ये योगिनीविधानं नाम सप्तदशोऽध्यायः॥' ङ. पाठः.

अथ पञ्चदशोऽध्यायः ।

अथ विजिगीषुपुरस्सररिपुमित्रामित्र[1]दृष्टिसंस्थानाम् ।
बलमिह वक्ष्ये प्रष्टुर्यायिस्थायिग्रहाणां च ॥ १ ॥
विजिगीषुरुष्णकिरणस्तत्सप्तमसंस्थितो रिपुः प्रोक्तः ।
भास्करपृष्ठे संस्थाः पार्ष्णिग्राहादयः सर्वे ॥ २ ॥
तत्पुरतो यातव्यास्तुहिनकरोऽयं भवेत् सदा [2]क्रान्तः ।
सन्धेयश्चन्द्रसुतस्तत्तुल्याः शत्रवस्तेऽपि ॥ ३ ॥
ये बलवन्तो वि[3]हगाः सौम्याः क्रूराः स्वजन्मलग्नभयोः ।
तद्विहितकार्यमरिभिः सन्ध्याद्यं वाथ सामाद्यम् ॥ ४ ॥
यायिग्रहैश्च यानं नृपैश्च बलिभिस्तदा च संयुद्धम् ।
अनुकूलैः क्रूरतरैः सौम्यैः सन्धिर्विरोधोऽन्यैः ॥ ५ ॥
साम्नो[4] भार्गवजीवौ दण्डाधिशौ धरात्मजोष्णकरौ ।
दानाधिपः शशाङ्को भेदाः फणिकेतुसौम्यार्क्यः ॥ ६ ॥
दिवसकरादाटविकं सौम्यान्मैत्रं [5]यमाद् भृतश्रेणी ।
कुजश[6]निजीवादरिभिर्द्रो[7]हुगतं देशमौल्यं च ॥ ७ ॥
राहुशनैश्चरभूसुतकेतुशशाङ्काश्च या[8]यिनो बाह्याः ।
पूर्वाह्णसूर्यभार्गवजीवबुधाः स्थायिनोऽन्तस्थाः ॥ ८ ॥

---

१. 'पृष्ठसंस्थानात्' ङ. पाठः. २. 'का' क., 'ता' ग. पाठः. ३. 'हिताः सौ' ख. पाठः. ४. 'म्नौ' क. ग. पाठः. ५. 'मया हृतश्रे' ख., 'यमाद्धृतं' ङ. पाठः. ६. 'शि' ख. पाठः. ७. 'र्द्रोहग' घ. ङ. पाठः. ८. 'नो विजयम् ।' ग. पाठः.

सौरीन्दुसूर्यजीवाः कुलवाराः शुक्रराहुभूमिसुताः ।
अपकुलवाराः प्रोक्ता बुधो भवेदुभयसञ्चारी ॥ ९ ॥
कुलवारे सकुलर्क्षे सङ्ग्रामे स्थायिनो जयं तस्य ।
अपकुलवारे साक्षादपकुलभे यायिनो विजयम् ॥ १० ॥
स्थाय्यागन्तुकयोरिह मूलधनिष्ठेश्वरान्विते सन्धिः ।
बलवति शशिसुतवारे स्तम्भचतुष्कान्विते वापि ॥ ११ ॥
सिंहः कन्या तौलिः कीटः कुम्भो झषश्च सूर्यस्य ।
कर्कटमिथुनौ वृषभो मेषो नक्रो धनुः शशिनः ॥ १२ ॥
दिनकरनिलये दिनकृत् तुहिनकरक्षेत्रगश्च तुहिनांशुः ।
यदि सन्धिर्नहि युद्धं तयोर्द्वयोः संस्थितागतयोः॥ १३ ॥
दिनकरनिलये हिमकृत् तिष्ठेच्चेत् स्थायिनो जयः समरे ।
हिमकरनिलये दिनकृत् संस्थो यदि यायिनो विजयः ॥
यदि दिनपतुहिनकिरणौ दिवसकरक्षेत्रगौ जयी स्थायी ।
शशिनिलये शशिसूर्यौ यदि संस्थौ यायिनो विजयः ॥
यदि रविधाम्नि शशाङ्को हिमकरनिलये दिवाकरस्तिष्ठेत् ।
युद्धं तयोश्च घोरं नहि सन्धिस्तद् द्वयोः प्रोक्तः॥ १६ ॥
मित्रोच्चनीचशत्रुस्वक्षेत्राद्यंशकालचेष्टानाम् ।
वीर्यावीर्यमवस्थां ज्ञात्वा ब्रूयाद् ग्रहाणां च ॥ १७॥
लग्ने[2]ऽम्बरेऽथ जीवो यदि प्रपश्येत् स्फुटं जयी स्थायी ।
बुधसितरवयो दशमे यदि संस्थाः स्थायिनो विजयः ॥

---

१. 'स्तयोर्द्वयोः' ख. पाठः. २. 'भे बलेऽथ' क. घ. पाठः.

देहादिपञ्चनवमे ते दृश्यन्ते ग्रहाश्च तत्रैव ।
आगन्तुकस्य विजयो भङ्गः स्यात् स्थायिनः समरे ॥१९॥
घटमिथुनतुलाकन्याराशिषु देहादिपञ्च[1]दशमेषु ।
यदि पापोऽस्ति हि बलवान् यायी विजयी भवेत् समरे ॥
उदये पौत्रे नवमे बुधस्त्रिदशमे गुरुश्च यदि तिष्ठेत् ।
यायी विजयी भवति स्थायी भङ्गं क्षणाद् याति ॥ २१ ॥
उदये शशाङ्कपुत्रो दशमस्थाने कुं[2]जो यदि स्पष्टम् ।
नहि यायिनोऽत्र विजयः स्थायी विजयी भवेच्छीघ्रम् ॥
भौमो दशमे सौम्यो लग्ने जीवश्चतुर्थसप्तमगः ।
ब्रूयात् प्रष्टुर्विजयं विपरीते भङ्गमाप्नोति ॥ २३ ॥
शत्रुक्षेत्रे जीवो लग्ने सौम्यः कुजोऽम्बरस्थाने ।
प्रष्टुर्न जयो युद्धे विजयः स्याद् यायिनस्तस्य ॥ २४ ॥
दशमे सूर्यशशाङ्कौ चतुर्थजामित्रलग्नगो जीवः ।
यदि पृच्छकस्य विजयः सङ्ग्रामे दारुणे तस्य ॥ २५ ॥
उदयादारूढर्क्षाद् व्योम्नश्चक्रोपरिस्थराशिनर्थ[3]म् ।
आलोक्य वदेत् प्रष्टुर्लाभालाभं जयापजयम् ॥ २६ ॥
उद्यद्राशेः पूर्वं मेषे संस्थाप्य राशिमुद्गणयेत् ।
वृषभेऽप्यपरं भागं तत्प्रत्यारूढकं पुरुषम् ॥ २७ ॥
चरराश्युदये युद्धं स्थिरोदये नास्ति यस्य सङ्ग्रामः ।
उभयोदयेऽपि कलहं न च युद्धं सन्धिराख्यातः ॥ २८ ॥

---

१. 'नवमे', २. 'गुरुश्च यदि तिष्ठत्' ङ. पाठः. ३. 'यः' ख. पाठः.

चरराशिगते चन्द्रे चरोदये शीघ्रमाहवं प्रोक्तम् ।
क्रूरोदयेऽपि निधनं शुभोदये जीवितं प्रोक्तम्[1] ॥ २९ ॥

अत ऊर्ध्वमात्मचारः[2] प्रवक्ष्यते मृत्युजीवितोद्दीपः ।
लाभालाभज्ञानप्रबोधनः सर्वदेहस्थः ॥ ३० ॥

नाभेर्मूले कन्दं स्थितं प्रवालाङ्कुराकृति स्पष्टम् ।
तस्माद्‍दुदेति जीवः शिवात्मसोमार्कवह्निमयः ॥ ३१ ॥

शक्तिव्यूहे संस्थो दशवायुसमन्वितः प[3]रः सूक्ष्मः ।
कालानलसंकाशः[4] स्फुरन् सकिरणोऽव्ययो नित्यः ॥ ३२ ॥

ऊर्ध्वाधस्सञ्चारो द्विधा प्रकारेण सोमसूर्यतया ।
यावदुदयास्तकालं तावद् द्वात्रिंशदङ्गुलकम् ॥ ३३ ॥

नाभिहृदयद्विमध्ये यावद् वायुश्चरेद् यदि स्पष्टम् ।
उच्चाटनादिकार्यं तावत् कुर्यात् समाधिस्थः ॥ ३४ ॥

हृत्कण्ठमध्यदेशे यावत् स चरेत् समीरणस्तावत् ।
ज्वरदाहशोषमारणकार्यं कुर्वीत चारज्ञः ॥ ३५ ॥

कण्ठभ्रूमध्येऽस्मिन् वहति यदा वायुरूर्जितो गाढम् ।
शान्तिं पुष्टिं वश्यं तदा प्रकुर्यात् पदस्थज्ञः[5] ॥ ३६ ॥

भ्रूनासान्तरदेशे समीरणो यावदुद्वहेत् स्पष्टम् ।
तावत् स्तम्भनकार्यं गन्धे लीनात्मकः कुर्यात् ॥ ३७ ॥

द्वात्रिंशन्मातृगणाश्चतुरष्टाम्भोजचक्रमध्यस्थाः ।
सृष्टिक्रमयोगेन स्थिताः पराः सर्वदायिन्यः ॥ ३८ ॥

---

१. 'म् । इति सङ्ग्रामविजयोदये प्रश्नकथनं नामाष्टादशोऽध्यायः । अत' ङ. पाठः. २. 'चक्रं प्र', ३. 'न' घ. पाठः. ४. 'शस्फुरत्करः सङ्कुलोऽव्य' क. ग. पाठः. ५. 'दार्थज्ञः ।' ग. पाठः.

हृत्पद्ममूर्ध्वनालं दशवायुसमन्वितं परं दीप्तम् ।
तन्मध्ये चिद्रूपं वहेत् सदा प्रज्वलं तेजः ॥ ३९ ॥
देवः परमेशानः सर्वगतः शाश्वतो विभुर्नित्यः ।
व्योमव्यापी सूक्ष्मो नादाख्यो मन्त्रको[1] हंसः ॥ ४० ॥
येन व्याप्तं सर्वं तस्य हि चिह्नानि वक्ष्यतेऽद्य मया ।
यदि वहति वामनाड्यामात्मा प्राणः स गन्धस्थः ॥४१॥
हस्त्यश्वरथपदातिध्वजाधिरोहणसुभोगवस्त्राद्यम् ।
आभरणसुगन्धाद्यं स चिन्तयेत् तत्प्रभुः स्थिरया ॥ ४२ ॥
पश्येदग्निज्वालां हेमद्युमणिप्रभां दिवा रात्रौ ।
दहनीशक्तिनियोगात् स पिङ्गलामाश्रितः पुरुषः ॥ ४३ ॥
जृम्भत्यपानयोगाद् रससंस्थः पुष्कलो दिवा रात्रौ ।
विकरोतीन्द्रियसंस्थः स्वप्नावस्थां सदा शक्त्या ॥ ४४ ॥
घोरश्मशानपीठक्षेत्राणि प्रेतयोगिनीव्रातम्[2] ।
यः पश्यति यमदूतान् स्वप्ने च सुषुम्नया मनसा ॥
रौद्रीशक्तिसमेतः समानवायोः समीरितश्चात्मा ।
चिन्तयति रौद्रकार्यं भयाकुलो यत्र वैरिभ्यः ॥ ४६ ॥
पृथुयुद्धमांसशोणितशववायसगृध्रखादनं पश्येत् ।
क्रूराशक्तिनियोगादुदानगौन्धारिकायु(क्ता ? क्तः) ॥ ४७ ॥
जलशङ्खशुक्तिकमलजमत्स्योपवनानि सम्पश्येत् ।
गजजिह्वावाहेन व्यान(स्था ? स्थः) सौम्यशक्तिवशात् ॥

---

१. 'हंसको मन्त्रः ॥' ङ. पाठः. २. 'तम् । पश्यति यमस्य दू' ख. ग. पाठः ३. 'गन्धतो यु' ङ. पाठः. ४. 'सर्वश' घ., 'सा' ङ. पाठः.

उत्पतनगगनभोगं देवचरत्वं रसायनं च रसम् ।
खेगमनसिद्धकन्यासमागमं देशसम्भ्रमणम् ॥ ४९ ॥
पूषानाडीयोगान्नागेन परिप्लुतो मनोवृत्त्या ।
स तु मुद्गलः शरीरे समी[1]हिते चेष्टितं पश्येत् ॥ ५० ॥
धनधान्यवाजिवारणपशुगृ[2]हसङ्ग्रहनिधानहर्म्याणि ।
चिन्तयति निशि दिवा[3]र्यां कृकरेणात्मा[4](घ?य)शोनाड्या ॥
गङ्गादितीर्थयानं श्रीशैलमहेन्द्रविन्ध्यसंसेवाम् ।
वैराग्यतपश्चरणं शिवभजनं मन्त्रसंश्रवणम् ॥ ५२ ॥
कुरुते चेष्टितमीदृक्पूषायामैश्वरीसमायोगात् ।
यदि तत्र देवद[5]त्तो जृम्भति हृदये ततः सम्यक् ॥ ५३ ॥
एवञ्च हृत्प्रदेशे या चेष्टा कीर्तितात्मसंविद्भिः ।
सा बाह्यगगनदेशे द्रष्टव्या तत्त्वशास्त्रज्ञैः ॥ ५४ ॥
[6]नक्षत्रकालहोरा दृष्टादृष्टार्थद[7]र्शिनी साक्षात् ।
सार्कोदयात् प्रगणयेत् क्रूराक्रूरस्थिताः सम्यक् ॥ ५५ ॥
होरा प्राग् गन्धाख्या रसान्विता या द्वितीयहोरा स्यात्
रूपोद्भवा तृतीया स्पर्शाख्या या चतुर्थीयम् ॥ ५६ ॥
गन्धरसाख्या चान्या गन्धाग्नेया च षष्ठहोरेयम् ।
गन्धस्पर्शवतीयं गन्धध्वनिसंयुता चान्या ॥ ५७ ॥

---

१. 'ह' क. ग. पाठः. २. 'मृगसङ्ग्रामनि' क. पाठः. ३ 'या याकृ' ङ. पाठः. ४. 'त्मन्यशो' क. घ., 'त्मयोगाच्च' ङ. पाठः ५. 'चो हृद्गतिहृदयोनतं स' क. घ. पाठः. ६. 'या तत्र' घ. ङ.' 'यदि तत्र' क. ग. पाठः. ७. 'साधनी' ङ. पाठः.

रसगन्धवती चान्या रसरूपयुता तथा रसस्पर्शा ।
रसशब्दवती होरा सरूपगन्धा ततश्चान्या ॥ ५८ ॥
रूपस्वरद्विहोरा रूपस्पर्शा सरूपशून्येयम् ।
पवनोद्भवगन्धवती स्पर्शरसान्या मरुद्रूपा ॥ ५९ ॥
चलशब्दवती चान्या ध्वनिगन्धाङ्गी रवाम्बुसंयुक्ता ।
अम्बररूपवतीयं व्योमस्पर्शान्विता चान्या ॥ ६० ॥
एवञ्च कालहोरा नासामार्गे ग्रहान्विताः सर्वाः ।
ज्ञातव्याश्चारज्ञैर्दृढं चतुर्विंशतिश्चारैः ॥ ६१ ॥
धातुर्मूलं जीवो नष्टो मुष्टिर्मृतिर्गतिर्व्याधिः ।
जातिर्लाभालाभौ ज्ञातव्याः कालहोराभिः ॥ ६२ ॥
चन्द्रासितगुरुभूमिजरविभृगुसौम्याश्च कालहोरेशाः ।
पूर्वं वाराधिपतिर्भुङ्क्ते क्रमशस्ततः षष्ठः ॥ ६३ ॥
दिनघटिकाः प्रक्रान्ताः कृत्वा द्विगुणं हरेत् स्वरैस्तं च ।
लब्धो ग्रहश्च तस्माद्ग्राह्यः शेषाः समाख्याताः ॥ ६४ ॥
गन्धोदयेऽपि मूलं रसोदये तत्र निश्चयो जीवः ।
रूपस्य धातुरुदये प्रभञ्जने धातुजीवाङ्गम् ॥ ६५ ॥
मिश्रोदयेऽपि मिश्रं धातुर्मूलञ्च जीवसम्बन्धम् ।
जीवो नागे प्रोक्तो मुद्गरचारेण चिन्तायाम् ॥ ६६ ॥
गन्धोदये विनष्टं लभते द्रव्यं न दूरधामगतम् ।
चोरः क्षत्रियजातिः स गौरवर्णो दृढः शूरः ॥ ६७ ॥

१., २. 'स्व' ख. घ. ङ. पाठः. ३. 'र्मै' ख. पाठः. ४. 'वो नागः प्रो' क., 'वेनाग्रे प्रो' घ. पाठः.

जीवो रसोदये न तु स लभ्यते तस्करो वणिक् श्यामः ।
रूपेण धातुरुक्तश्चोरो विप्रः स पिङ्गाक्षः ॥ ६८ ॥
स्पर्शौ[1] यज्जीवाङ्गः[2] शूद्रश्चोरः[3] स कृष्णवर्णोऽयम् ।
रसगन्धयोर्विमूलं[4] जीवेन समन्वितं द्रव्यम् ॥ ६९ ॥
चोरौ क्षत्रियवैश्यौ पार्थिवरूपोदयेन निर्दि(ष्टम्? ष्टौ) ।
मूलं धातुविमिश्रं चोरौ द्विजभूमिपालौ च ॥ ७० ॥
गन्धसमीरणकाले मूलं जीवांशसंयुतं प्रोक्तम् ।
विप्रचतुर्थौ चोरौ निर्दिष्टौ चारतत्त्वज्ञैः ॥ ७१ ॥
गन्धध्वनिसञ्चारे समूलधातु प्रकीर्तितं द्रव्यम् ।
चोरौ नृपान्त्यवर्णौ चिन्तायां चारतः कथितौ ॥ ७२ ॥
उद्यन्तेऽहनि रात्रौ देहे बाह्ये च कालहोरा याः ।
ताश्चार्धपञ्चनाडीभोगिन्यस्त्वष्ट सङ्ख्याताः ॥ ७३ ॥
सूर्यशनैश्चरभूमिजभुजङ्गमास्ते तु सव्यहोरास्ताः ।
हिमकरसितबुधजीवाः सव्येतरसंश्रितास्तेऽपि ॥ ७४ ॥
वामे होरामेकामाक्रम्य वहेद् यदा हि स श्वासः ।
यस्य परं तस्यायुर्निर्दिष्टं पञ्चविंशाब्दम् ॥ ७५ ॥
गन्धाश्रितो बुधोऽयं वहेद्[5] द्विहोराप्रमाणचारश्चेत् ।
विंशतिवर्षाणि ततः स हि जीवेन्निश्चयं पुरुषः ॥ ७६ ॥
रूपस्थो यदि जीवो वहेत् त्रिहोराप्रमाणसंयुक्तः ।
अष्टादशवर्षाणि च निर्दिष्टानीह तस्यैव ॥ ७७ ॥

---

१. 'र्शे' क. ख. घ. पाठः. २. 'ञ्जी', ३. 'र' क. ग. घ. पाठः. ४. 'नि' घ., 'नि' क. पाठः. ५. 'वहते हो' ग. पाठः.

होराचतुष्कमनिले स्थिते सितो यस्य चेद् वहेद् गाढम् ।
द्व्यष्टाब्दमानकालं स तु जीवेत् कर्मतो[1] देही ॥ ७८ ॥
चन्द्रेन्दुसुतौ वहतो रसगन्धस्थौ च यस्य नासायाम् ।
होराषट्कोपेतौ चतुर्दशाब्दानि तस्यैव ॥ ७९ ॥
शशिजीवौ रसरूपस्थितौ च वहतो यदीह (त ? य)स्यैव ।
होराष्टकसञ्चारौ तस्यायुर्[2]द्वादशाब्दं च ॥ ८० ॥
चन्द्रसितौ यदि वहतो दशहोराभिः स्थितौ यदि स्पर्शे[3] ।
अष्टौ वर्षाणि ततो विज्ञेयानीह चारज्ञैः ॥ ८१ ॥
बुधजीवौ यदि वहतो द्विसप्तहोराप्रमाणमनवरतम्[4] ।
तौ गन्धरूपसंस्थौ षड्वर्षाणीति जानीयात् ॥ ८२ ॥
बुधशुक्रौ गन्धमरुत्समाश्रितौ यस्य येन वहतश्चेत् ।
वर्षाणि त्रीण्येव हि सद्भिः प्रोक्तानि तस्यैव ॥ ८३ ॥
अष्टादशहोराभिर्गुरुशुक्रौ रूपवायुसंरूढौ ।
यस्य यदा विस्पष्टं तस्यायुर्वर्षमेकं स्यात् ॥ ८४ ॥
वामाचारः प्रोक्तो दक्षिणचारोऽद्य कथ्यते हि मया ।
काले पौष्णे प्राप्ते निरीक्षयेदात्मसञ्चारम् ॥ ८५ ॥
यदि रसहोरारूढो रविर्वहति पञ्चलिप्तमानं च ।
दक्षिणनाड्यां[5] यस्य हि दश मासास्तस्य विज्ञेयाः ॥ ८६ ॥
गन्धारूढो मन्दो दशनाडीभिर्वहेद् यदि स्पष्टम् ।
मासाष्टकमुद्दिष्टं तस्यायुः कर्मतः सद्भिः ॥ ८७ ॥

---

१. 'कालतो' क. पाठः. २. 'य' ख. पाठः. ३. 'र्शेत् ।' ग., 'र्शौ' ख. पाठः. ४. 'नुचरतः ।' ख. पाठः. ५. 'ड्यां' पाठः.

रूपस्थो भूमिसुतस्त्रिपञ्चनाडीप्रमाणमत्यन्तम् ।
यदि वहति यस्य सव्ये षण्मासास्तस्य निर्दिष्टाः ॥ ८८ ॥
विंशतिनाडीमानं स्पर्शस्थश्चेच्चरेद् भुजङ्गेशः ।
यस्य त्रिमासमायुः स तु जीवेद् व्याधिना ग्रस्तः ॥ ८९ ॥
रविमन्दौ रसगन्धे स्थितौ यदा पञ्चविंशमानेन ।
वहतो यस्याच्छिन्नं द्वौ मासौ तस्य विज्ञेयौ ॥ ९० ॥
रसरूपगौ कुजरवी त्रिंशन्नाडीप्रमाणसञ्चारौ ।
यदि यस्य सव्यनाड्यामेको मासोऽस्ति तस्यायुः ॥ ९१ ॥
यदि च रसस्पर्शस्थौ पञ्चत्रिंशत्प्रमाणमश्रान्तम् ।
वहतः सूर्यभुजङ्गौ जीवति पक्षं ततो देही ॥ ९२ ॥
चत्वारिंशन्नाडीर्मन्दकुजौ यस्य यत्र यदि वहतः ।
तौ गन्धरूपसंस्थौ दशरात्रं तस्य निर्दिष्टम् ॥ ९३ ॥
मन्दोरगौ च नित्यं गन्धमरुत्स्थौ च पञ्चतालेन ।
यदि वहतो दक्षिणतः पञ्च दिनानीह तस्यैव ॥ ९४ ॥
तेजःपवनारूढौ कुजसर्पौ यस्य यत्र वहतश्चेत् ।
पञ्चाशन्नाडीनां मानं त्रिदिनानि तस्यैव ॥ ९५ ॥
दक्षिणनाड्यां नित्यं वहति यदा यस्य पौष्णकालेऽस्मिन् ।
दिनरात्रिमानमनिलो दिनमेकं तस्य निर्दिष्टम् ॥ ९६ ॥
इष्टानिष्टं कुर्याल्लोके षट्कर्मणां स चारज्ञः ।
समयोगाद् यस्य रविः समं गतस्तस्य वक्ष्यामि ॥ ९७ ॥

---

१. 'का' ख. पाठः.

मन्दे गन्धारूढे स्तम्भं सूर्ये रसं गते तापम् ।
रूपारूढे भौमे मारणमुरगे मरुद्गते चाल्यम् ॥ ९८ ॥
कार्त्तिकमासे प्राप्ते भौमे भद्रान्विते तथाग्नेये ।
तज्जन्मोदयकाले मृत्युः स्यान्मेषजातस्य ॥ ९९ ॥
मासेऽथ मार्गशीर्षे प्राजापत्ये बुधे चतुर्थ्यां च ।
उन्मादकस्य दोषाद् वृषजातस्यान्तिको मृत्युः ॥ १०० ॥
पौषे मासे गुरुभे सौम्ये षष्ठ्यां च शस्त्रतो वाग्नेः ।
मृत्युरपराह्णकाले मिथुनोद्भूतस्य सम्भवति ॥ १०१ ॥
माघे मासेऽष्टम्यां भृगुवारे पूर्वकालतो व्याधेः ।
नक्षत्रे मृगशीर्षे कुलीरजो मृत्युमाप्नोति ॥ १०२ ॥
फाल्गुनमासि मघायां सिंहे मीनोदये दशम्यां च ।
रविसुतवारे मरणं वनान्तरे सिंहजातस्य ॥ १०३ ॥
चैत्रेऽथ द्वादश्यां रविवारे ब्रह्मभेऽस्त्रतो मृत्युः ।
गुल्मस्य मूलदेशे कन्याजातस्य कन्यायाम् ॥ १०४ ॥
वैशाखे भूतदिने मैत्रे भौमे तुलाजमरणं स्यात् ।
ज्येष्ठे मङ्गलवारे चित्रायां वृश्चिके ध्वंसः ॥ १०५ ॥
आषाढे चैव नवम्यां श्रवणे शुक्रान्विते धनुर्जातः ।
पापोदयोऽपि मृत्युं प्राप्नोत्युग्रायुधैर्युद्धे ॥ १०६ ॥
श्रावणमासे प्राप्ते सप्तम्यां सोमसंयुते पौष्णे ।
सिंहोदयेऽथ नक्रे निधनं समुपैति नक्रभवः ॥ १०७ ॥

---

१. 'समं गते सू' क. पाठः. २. 'बा' क., 'चाल्पम्' ग. पाठः. ३. 'दोषो वृ' क., 'रोषे वृ' ग. पाठः. ४. 'तु' क., 'थ' ग. पाठः. ५. 'यात् ॥' ख. पाठः.

भाद्रपदे ज्येष्ठायां कुम्भस्य विनाशनं त्रयोदश्याम् ।
आश्वयुजेऽष्टम्यन्ते रेवत्यां मीनजः प्रहृतः ॥ १०८ ॥

जन्मनि [1]यदि जीवे[2]न्दुस्तिष्ठति ष[3]ष्ठे तथाष्टमेंऽशे वा ।
यस्य [4]हि जन्मनि साक्षान्मृत्युस्तस्यैव निर्दिष्टः ॥ १०९ ॥

चन्द्रान्निधनं [5]लक्ष्यं लग्नादिन्दुस्ततोऽष्टमे संस्थः ।
यदि पापग्रहदृष्टः क्षिप्रं मरणं भवेत् तस्य ॥ ११० ॥

दशवर्षादपमृत्युस्त्रिंशद्वर्षात् स मेषजातस्य ।
यदि सौम्यग्रहदृष्टः शतमेकं जीवति स्पष्टम् ॥ १११ ॥

वृषजातकालमृत्युः सपञ्चपञ्चाब्दतः समाख्यातः ।
यदि शुभदृष्टः साक्षाद्दशीतिवर्षाणि जीवेत ॥ ११२ ॥

अष्टाविंशतिवर्षान्मिथुनभवस्यापमृत्युराख्यातः ।
सौम्यग्रहदृष्टश्चे[6]दशीतिसंवत्सरं जीवेत् ॥ ११३ ॥

अपमृत्युर्दुर्व्याधिस्त्रिंशद्वर्षात् कुळीरजातस्य ।
नवतिर्व[7]र्षाणि ततो यदि शुभदृष्टो दृढं तस्य ॥ ११४ ॥

यः सिंह(श ? रा)शिजातः स पञ्चविंशापमृत्युजित् पुरुषः ।
जीवति शतवर्षाणि स्थिरं नृपेन्द्राश्रितः सौख्यम् ॥ ११५ ॥

विंशतिवर्षे प्राप्ते शस्त्राघातापमृत्युमपनीय ।
शुभवीक्षितोऽपि जीवति कन्याजातः शताब्दानि ॥ ११६ ॥

---

१. 'कर्मणि जी' ख. ग. पाठः. २. 'दुत्तिष्ठ' ख. पाठः. ३. 'ष्ठमेऽष्टमेंऽशे' ख., 'ष्ठाष्टमे वा' ग. पाठः. ४. 'भ' ख. पाठः. ५. 'लग्नं ल' क. ख. पाठः. ६. 'राज्जीवे' ख. पाठः. ७. 'र्षं जीवेद्य' क. पाठः.

प्राप्ते विंशत्यब्दे व्याध्यपमृत्युं विजित्य शुभदृष्टः ।
पञ्चाशीतिसमानि स्थिरं स जीवेत् तुलाजातः ॥ ११७ ॥
द्वाविंशतिवर्षान्ते मृगापमृत्युं विजित्य जीवेत ।
एकाशीतिसमाश्च[1]च्छिन्नाङ्गो वृश्चिकोद्भूतः ॥ ११८ ॥
विगतापमृत्युरधिकः षोडशवर्षे तु जीवयेत् पुरुषः ।
नवसप्ततिवर्षाणि प्रभुर्धनुर्जातको धन्यः ॥ ११९ ॥
द्यष्टाब्दादपमृत्युं नीत्वा त्रिंशत्समास्ततो वापि ।
जीवेत् सप्तत्यब्दं शुभेक्षितो मकरसञ्जातः ॥ १२० ॥
विंशत्यब्दे प्राप्ते घटजातस्यापमृत्युरुद्दिष्टः ।
यदि सौम्यग्रहदृष्टः ससप्तसप्ततिसमास्तस्य ॥ १२१ ॥
जित्वापमृत्युमुग्रं सप्तदशाब्दे स मीनजातश्च ।
यदि शुभदृष्टः पुरुषो नवतिसमास्तत्र जीवेत ॥ १२२ ॥
जी(वति ? वित)मरण[2]ज्ञानं स्वस्थानां रोगिणां च वक्ष्येऽहम् ।
योद्धुमभिकाङ्क्षिणामिह पुंसां सङ्ग्र[3]हपरिच्छेदः ॥ १२३ ॥
आयुःपूर्वपरीक्षणमवलोक्य दृढं बलाबलं ब्रूयात् ।
आयुःक्षीणे पुंसामुडुग्रहाः किं करिष्यन्ति ॥ १२४ ॥
सुखदुःखमरणजीवितलाभालाभप्रया[4]तनिर्याताः ।
स्त्रीसंयोगवियोगाश्चाराश्चारेण बोद्धव्याः ॥ १२५ ॥
वामे वा सव्ये वा मध्ये प्राणो वहेद् यदि स्पष्टम् ।
तत्स्थाने यस्तिष्ठेत् सङ्ग्रामे तस्य विजयः स्यात् ॥ १२६ ॥

---

१. 'श्च च्छि', २. 'णे' क. ग. पाठः. ३. 'हः', ४. 'ण' ख. पाठः.

जीवी जीवे जीवेच्छून्ये शून्यं सजीवि[1]तो जी[2]वेत् ।
ना जीवेत् सङ्ग्रामे न जयी जीवेच्चिरञ्जीवी ॥ १२७ ॥

जीवाच्छून्यं गच्छेद् यद्यपि जित्वा म्रियेत तत्काले ।
शून्याज्जीवं गच्छेत् क्लेशेन नरो जयेच्छत्रुम् ॥ १२८ ॥

जीवे जीवी जीवं त्यक्त्वा युद्धे रिपुं च निर्जीवे ।
स जयेदहितं शीघ्रं शून्यस्थश्चेत् स्वयं शून्यः ॥ १२९ ॥

अग्रे पृष्ठे वाधः प्रश्नं पुरुषः करोति यदि सम्यक् ।
अग्रं दक्षिणसंज्ञं पृष्ठं वामं समाख्यातम् ॥ १३० ॥

संहारे सति मृत्युः सृष्ट्यां सत्यां सुजीवितं पुंसाम् ।
सृष्टिर्भवेत् प्रवेशः संहारोऽयं बहिश्चारः ॥ १३१ ॥

ऊर्ध्वं दक्षिणमेतद् यदधो वामं प्रकीर्तितं मुनिभिः ।
यस्मिन् यस्मिन् जी(वे ? वः) तत्स्थाने जीवितं प्रोक्तम्
[॥ १३२ ॥

व्योम्नि स्त्रीसंयोगे क्षणं वियोगोऽथ मृत्युरस्याश्च ।
योऽधश्चा[3]रे विजयस्तथोर्ध्वचा[4]रे मृतिस्तस्य ॥ १३३ ॥

उदये वे[5]श्या धनदा प्रथमे कालेऽनिलप्रवेशस्य ।
वामोदयेऽर्थं[6] मै[7]थुनमत्यन्तं श्रेष्ठदं खे च ॥ १३४ ॥

मध्योदयेऽपि कलहं मिश्रे मिश्रं फलं च तद्वाच्यम् ।
दिवसप्रर्या[8]मघटिकावेलाभिस्तस्य निर्दिष्टम् ॥ १३५ ॥

---

१. 'व' ग. पाठः. २. 'बः ।' ख. ग. पाठः. ३. 'श्चरेद् वि' ख. पाठः. ४. 'रो' क. पाठः. ५. 'प' ख. ग. पाठः. ६. 'पि' क. ग. पाठः. ७. 'मन्त्यस्तच्छ्रेष्ठदुःखे' ख. पाठः. ८. 'माणघं' क. पाठः.

उभयप्रवेशचरणे नागेन समाहवं नरो गच्छेत् ।
नहि कर्तव्यं यानं शून्याङ्घ्रिनलेन बुद्धिमता ॥ १३६ ॥

यस्यादावन्ते वा मात्राहीनं नरस्य यन्नाम ।
स हि भुवि मृत्युं गच्छेद् युद्धे वश्यं त्रिभङ्गं वा ॥ १३७ ॥

यस्यादिमं गुरु स्यान्मात्रारूढं बलाक्षरं नाम ।
स जयेत् समरे साक्षाज्जनार्दनं वापि शीघ्रतरम् ॥ १३८ ॥

समनाम वामचारे समाक्षरं यस्य नाम संप्रश्ने ।
स जयेच्छत्रुमसाध्यं राहुरविग्रसितः समरे ॥ १३९ ॥

यदि चेद् दक्षिणचारे [2]दृष्टं विषमाक्षरस्य योधस्य ।
सो[3]ऽवश्यं मृत्युमुखं प्राप्नोतीशेन रक्ष्योऽपि ॥ १४० ॥

विग्रहकाले प्राप्ते शुष्यत्तालुश्च यस्य दिङ्मोहः ।
भ्रान्तः सर्वं पश्यति भङ्गं वा मृत्युमाप्नोति ॥ १४१ ॥

दक्षिणहस्ते स्पन्दं वामे कृष्णं तु लाञ्छनं यस्य ।
म्रियते नहि सन्देहः सुरक्षितः शङ्करेणापि ॥ १४२ ॥

करचरणहृदयकम्पः कर्णे [4]रणरुण च वक्ष्व(?) निस्तेजः ।
नखदशनरोमकेशाः शीर्यन्ते गद्गदं वाक्यम् ॥ १४३ ॥

मुष्टेरस्त्रं पतति स्वाङ्गात् स्वेदो मुहुर्मुहुश्चलनम् ।
नेत्रास्रावं नित्यं स नरो म्रियतेऽथ सङ्ग्रामे ॥ १४४ ॥

---

1. 'चा' क. ग. पाठः. 2. 'भ्र' ख. पाठः. 3. 'श्यमन्तकमु' ग. पाठः. 4. 'रुणरुन्नृपाश्च नि' क., 'रवरणं च नि' ग. पाठः.

'रणरणरवश्च' इत्येवञ्जातीयः पाठः स्यात् ।

वामे दक्षिणचारो दक्षिणदे[1]शात्तु वामसञ्चारः ।
यस्य यदा विपरीते[2]स्तस्यारिष्टं विजानीयात् ॥ १४५ ॥

जीवति सकलं जगदिदमग्नीषोमात्मकं स्वभावाच्च ।
उभयोर्विपर्ययो यदि षण्मासाद् देहभृज्जीवेत् ॥ १४६ ॥

हिमकरबिम्बच्छायां [3]महापथं ध्रुवमरुन्धतीं गगने ।
(सो ? यो)ऽपि न पश्यति सम्यक् षण्मासायुः स विज्ञेयः
[॥ १४७ ॥

निर्घातविद्युत्स्फुरणं याम्यायामिन्द्रकार्मुकं रात्रौ ।
दिवसोल्कां यः पश्येत् षण्मासायुः स विज्ञेयः ॥ १४८ ॥

हृद्घोषनासिकाक्ष्योर्दे[5]र्ग्ध्यं जिह्वाभिदर्शनाभावे ।
[6]यन्त्रश्च घ्राणगुणः शशिसंख्याहानि च तदायुष्यम्
[॥ १४९ ॥

यो हस्तद्वयमध्ये प्रोत्फुल्लाम्बुजमधोमुखं पश्येत् ।
शिरसिस्थकरस्थूलं यद्वर्षार्धं तदायुष्यम् ॥ १५० ॥

संस्थाप्य पृष्ठतोऽर्कं स्वच्छायामूर्ध्नि संनिरीक्षेत ।
बाष्पाद् भ्रमति नहि स्यात् तदादिशेन्मासमायुष्यम्
[॥ १५१ ॥

नाभिप्रमाणमम्भः स्वसाधनमधोमुखं (यदा) यस्य ।
तस्यायुरर्धवर्षं जानीयान्निश्चितं ज्ञानी ॥ १५२ ॥

---

१. 'चारात्तु', २. 'तं तस्या' ग. पाठः. ३. 'थ' क. पाठः. ४. 'ग्घविजि', ५. 'हि' ग. पाठः. ६. 'रन्ध्रश्च' क. ग. पाठः. ७. 'भा' ख. पाठः. ८. 'वत् त' क. पाठः. ९. 'द्वर्षाब्दं त' ख. ग. पाठः १०. 'ष्पोद्भूति न' क. पाठः.

उदयेन्दुसूर्यबिम्बच्छायाकृतिरूपभेदवैकृत्यम् ।
षण्मासं तस्यायुस्तदादिशेदात्मचारज्ञः ॥ १५३ ॥
यो नामार्चिः पश्येत् तस्यायुः स्वल्पमत्र निर्दिष्टम् ।
नागे पुरुषं पश्येद् यदि मासात् तस्य मृत्युः स्यात् ॥
[१५४ ॥
लाक्षारसेन लिप्त्वा हस्ततलद्वन्द्वमत्र पश्येत ।
यत्पर्वणि तद्रागैः सं संक्षयेत् तत्तिथौ म्रियते ॥ १५५ ॥
गन्धर्वनगरभूतप्रेतपिशाचांश्च हेमवर्णतरून् ।
यः पश्येद् विस्पष्टं दशमासायुः स विज्ञेयः ॥ १५६ ॥
छर्दिं मूत्रपुरीषं सुवर्णरजतं समद्भुतं पश्येत् ।
नवमासायुः प्रोक्तं स्वस्थेतरदेहिनस्तथ्यम् ॥ १५७ ॥
कृष्णाधरस्य जिह्वावदनं प्रोत्फुल्लपद्मवर्णाभम् ।
गण्डे पिळका रक्ता यस्यास्ते तस्य मासायुः ॥ १५८ ॥
यस्य दशनप्रकर्षः शवगन्धच्छागगन्धगात्राणि ।
स तु जीवति दशरात्रं न शिरोधूमश्चतुर्मासात् ॥ १५९ ॥
रजनीपीतसमच्छविदन्ताक्षिकराङ्घ्रिशुष्कयो यस्य ।
संभिद्यमानगात्रः स तु जीवेत् सप्तरात्रं च ॥ १६० ॥
नासाक्षुतमत्यल्पं वदने प्राणप्रबन्धता यस्य ।
करचरणतलस्वेदः स्वल्पायुस्तस्य निर्दिष्टम् ॥ १६१ ॥
यस्य स्वभावविक्रममेधाबलवीर्यबुद्धिपूर्वादेः ।
यदि वैकृतं च सहसा तस्यायुः स्वल्पमुद्दिष्टम् ॥ १६२ ॥

---

१. 'रे' ख. ग. पाठः. २. 'भ्रे' ख. पाठः. ३. 'गं' ग. पाठः. ४. 'सपक्षयोस्तत्ति' क. ख. पाठः. ५. 'श' क., 'गन्धर्वच्छा' ग. पाठः.

निजतालुरन्ध्ररूपं नहि पश्येद् यदि यदा स मासायुः।
दिङ्मोहो विभ्रान्तिर्विज्ञाताज्ञानता मृत्युः ॥ १६३ ॥
ध्वाङ्क्षः शिरसि निविष्टः खादेत् स्वप्नेऽथवापि प्रत्यक्षे ।
यदि धावति भवनोपरि पिङ्गलिका मृत्युरासन्नः॥ १६४ ॥
यस्य स्थूला जिह्वा दन्ताः कृष्यन्ति तस्य षण्मासाः ।
कण्ठो मुखं च शुष्यति नाभिस्पन्दः स हीनायुः ॥ १६५।
शङ्खावर्तं च भुजे न स्पन्दनमङ्घ्रिगुल्फदेशेषु ।
यो धूपदीपगन्धं नहि जिघ्रति तस्य षण्मासाः॥ १६६ ॥
पूर्वोत्तरदक्षिणदिक्पश्चिमदेशं च गच्छतः पुंसः ।
छाया दक्षिणसंस्था यदि जीवेन्मासमेकं सः ॥ १६७ ॥
यदि वामदक्षिणाभ्यामूनाधिकमाशु सञ्चरेच्छ्वासः ।
यदि पञ्चनाडिकानां तदरिष्टं तस्य[1] जानीयात् ॥ १६८ ॥
यन्नाम कलाहीनं प्रथमान्तिमयोर्भवेद् यदि स्पष्टम् ।
म्रियतेऽवश्यं समरे सुरक्षितः शङ्करेणापि ॥ १६९ ॥
कुन्देन्दुशङ्खतुहिनस्फटिकनिभं द्वादशान्तगं पुरुषम् ।
भूत्वा निमीलिताक्षो वितस्तिमानान्वितं पश्येत् ॥ १७० ॥
अशिर(स्तु ? न्तु) यदा पश्येत् तदा भवेत् तस्य मृत्युर-
[त्यन्तम्[2] ।
विभ्रष्टहस्तपादः षण्मासाज्जायते मृत्युः ॥ १७१ ॥
उदयरविबिम्बमध्ये तेजोरूपं सुलक्षणं पुरुषम् ।
न यदा पश्येद् योऽसौ कर्मवशान्मृत्युरस्य तदा ॥ १७२ ॥

---

१. 'द्वि', २. 'भ्य' क. ख. पाठः.

निर्व्याधिः सितवर्णः सितेतरो रोगकृत् कपोताभः ।
कुरुते तत्कुलनाशं विचित्रवर्णः स संहारः ॥ १७३ ॥

करहीनः करबन्धनमनङ्घ्रिरात्माङ्घ्रिशृङ्खलाबन्धम् ।
नानाविधोऽपि मृत्युं करोत्यमोघं चतुर्मासात् ॥ १७४ ॥

दीपाग्रं द्विशिखं द्विधा नवशशी पूर्णेन्दुहीनो जले
पङ्केऽर्द्धं चरणाङ्कमम्भसि शकुन्मग्नं शिखी रश्मिमान् ।
शून्याम्भश्च नदीतटाकसरसां स्वप्नेऽपि भङ्गालयं
पातं कर्दमशून्यकूपकुहरे यस्याप्यरिष्टं ध्रुवम् ॥ १७५ ॥

तैलाभ्यङ्गविवस्त्ररक्तकुसुमस्रग्रक्तवस्त्रं वहन्
स्वप्ने कृष्णविलेपनं च वमनं कृष्णाङ्गनामैथुनम् ।
केशोल्लुञ्छनमात्ममुण्डितशिरः पश्येद् विवाहक्रियां
दन्तानां पतनं विरोमनखरा यस्याप्यरिष्टं ध्रुवम् ॥ १७६ ॥

भूतप्रेतपिशाचसूकरखरैर्गृध्रादिभिर्वायसै-
र्गोमायुश्वशिवाकुलैः परिवृतं छागप्लवङ्गैर्वृकैः ।
यानं तैर्महिषोष्ट्रगर्दभखरैस्तैरङ्गसम्भक्षणं
स्वप्ने यस्य भवत्यरिष्टमधिकं तस्यायुरर्धाब्दकम् ॥ १७७ ॥

आकाशः सुसितच्छविः सुरतिथौ निर्लाञ्छनश्चन्द्रमा
मञ्जिष्ठासदृशी धरा च दिनकृद् रश्मिक्षयी तारकाः ।
निर्ज्योत्स्ना विगतच्छविर्ग्रहगणो दीपो मयूरप्रभो
दृष्टो येन दृढं यदा विधिवशात् तस्यायुरर्धाब्दकम्
[॥ १७८ ॥

---

१. 'शस्यसि' क. ख. पाठः.

उत्थानः समदृग् विलम्बितकरः कृत्वा रविं पृष्ठतः
स्वच्छायागळमध्यदेशमवनौ किञ्चिद् विलोक्य स्थिरम् ।
पश्चात् खे विमले विनष्टजलदे पूर्वे[1]ऽपराह्णेऽथवा
रूपं वैकृतमुत्तमाङ्गरहितं पश्येदवश्यं मृतिः ॥ १७९ ॥

सम्पूर्णावयवश्चिरायुरकलं रूपं क्षतं निश्चयं
धूम्रं व्याधिकरं सितं शुभकरं रक्तं हिरण्यप्रदम् ।
पीतं ब्रह्मपशुघ्नमन्यजनने स्त्रीघ्नं पिशङ्गच्छवि-
र्नानावर्णमनूनवापिकलुषं द्रव्यापहारि ध्रुवम् ॥ १८० ॥

भानोर्मण्डलमप्सु कृष्णजलदच्छायोपमं निष्प्रभं
यः पश्येत् स तु याति कालवदनं त्रिंशद्दिनाभ्यन्तरे ।
निम्नन्यून[2]कलं कलङ्ककलुषत्रासैरमासङ्गमे
षण्मासान्म्रियते विधौ[3] स हि नरो रोगेण[4] शस्त्रेण वा ॥

याम्याप्यसौम्यपर[5]भास्करमण्डला[6]भं
मध्येऽन्तरं बहलधूमयुतं च मासैः ।
अन्तर्जले यदि विलोकयते स षट्त्रि-
द्व्येकैर्दशाहमथवैकदिनं म्रियेत ॥ १८२ ॥

इति सङ्ग्रामविजयोदये पञ्चदशोऽध्यायः ॥

---

१. ‘श्री’ क. पाठः. २. ‘त’ ख. ग.’ पाठः. ३. ‘धैः’ क., ‘धे’ ख. पाठः. ४. ‘योगेन श’ क. पाठः. ५. ‘पु’ क. ग. पाठः. ६. ‘लोदङ्मध्ये’ क., ‘ले मं’ ख. पाठः.

अथ षोडशोऽध्यायः ।

अथ कालचक्रमेतद् वक्ष्ये स्वायुःपरीक्षणं सम्यक् ।
काले पौष्णे प्राप्ते निरीक्षयेच्चारमुदयाद्यैः ॥ १ ॥

समसप्तगते सूर्ये स्वजन्मनक्षत्रसंस्थितश्चन्द्रः ।
पौष्णः कालः साक्षाद् भवत्यसौ नान्यथा लोके ॥ २ ॥

विषुसंस्थे दिवसकरे जन्मर्क्षेन्दुर्भवेत् स पौष्णोऽयम् ।
गुरुमि(त्रे ? त्रौ) धनुषि हरौ निवसन्तौ यदि च पौष्णो-
[ऽयम् ॥ ३ ॥

[1]हृत्पद्ममूर्ध्वनालं द्वादशपत्रं भवेदधोवक्त्रम् ।
मेषादिराशिसहितं दक्षिणवामान्वितं सौरम् ॥ ४ ॥

मृत्युर्द्विविधो ज्ञेयः कालाकालाश्रितो नृणां लोके ।
अर्वाङ्मृत्युरकालः शतायुषः कालमृत्युः स्यात् ॥ ५ ॥

तस्य द्विविधस्या[2]कात् समीक्ष्यते कालवञ्चना सद्भिः ।
अपमृत्योः पूर्व[3]मेताश्चिह्नं कालस्य वक्ष्यामि ॥ ६ ॥

[4]तुल्याद्यङ्गः कालः स च द्विधान्तर्बहिस्थितः सर्वैः ।
अर्कप्राणस्थितया गत्यार्कात् [5]कालयत्येषः ॥ ७ ॥

राशौ कर्कटकेऽर्के काले सुपरीक्षयेद् दिवा चार[6]म् ।
मकरस्थे दिवसकरे परीक्षयेद् दक्षिणायां च[7] ॥ ८ ॥

---

१. 'भूपद्म', २. 'स्यापिच स' ख. ग. पाठः. ३. 'तम-श्चिह्नः का' क. ग. पाठः. ४. 'क' क. ख. पाठः. ५. 'प्राणय' ग. पाठः. ६. 'रम् । वामे' क. ख. पाठः. ७. 'च ॥ राशौ कर्कटके-ऽर्के परीक्षयेदात्मसञ्चारम् । वा' ग. पाठः.

वामे वामपरीक्षा दक्षिणनाड्यां च तत्परीक्षा स्यात् ।
मध्ये मध्यपरीक्षां कुर्यात् सम्यङ् मरुच्चारे ॥ ९ ॥

वातव्याधिविकाराच्छ्लेष्मविकारादजीर्णदोषाच्च ।
शयनास[1]नाभिघाताद् विपरीतचरो भवेच्छ्वासः ॥ १० ॥

समकायासनविष्टः समदृङ् मौनी समाधिनिर्द्वन्द्वः ।
शु[2]द्धोपवास्यनिद्रः परीक्षयेदात्मसञ्चारम् ॥ ११ ॥

विधिविहितायुःपुंसः समे न दोषोऽस्ति पञ्चनाडीनाम् ।
आधिक्ये विपरीतो हीने दोषश्च सञ्चारे ॥ १२ ॥

ब्रह्माङ्गधातुवसुरन्ध्रदिशादिनाङ्घ्रि-
त्रिंशद्द्विमासनयनानलसागरेषु ।
वेदाङ्गमङ्गलदिशारविपञ्चविंशत्-
पुंदेववर्णसुकलापदशाब्दे[3]पद्माः ॥ १३ ॥

भूताशातिथिविं[4]शतत्त्वपुरुषज्योतिर्म[5]नुर्विघ्नहृ[6]त्
त्रिंशन्मासपदोत्तरत्रिदशकं द्वात्रिंशदिन्द्रादिभिः ।
वह्निद्वीन्दुरसाग्निनेत्रहिमकृन्मासार्द्ध[7]दिक्सायक-
त्रि[8]द्व्येकास्थितजीवितस्य च समा[9] मासा दिनादिक्रमात् ॥

पञ्चदशान्तरतिथयो दशार्द्धतोयात्रि[10]पञ्चमान्तै[11]स्थाः ।
विंशत्यब्दे[12] तिथयः षोडश संशोधनीयास्ताः ॥ १५ ॥

---

१. 'श' ग. पाठः. २. 'द्धोपवासनि' क., 'द्धोऽपास्तनि' ख. पाठः. ३. 'त्र' ग. पाठः. ४. 'वं' क. ग. पाठः. ५. 'तिम्मनुर्द्विविंस्तु मूर्विंश' क. पाठः. ६. 'कृ', ७. 'द्ध' ग. पाठः. ८. 'त्रि', ९. 'मादायादि', १०. 'नि', ११. 'त्त' क. पाठः. १२. 'र्थे' ख. ग. पाठः.

सम्पूर्णो भवति सदा सर्वगतः सर्वकृत् प्रभुर्नित्यः ।
संशोधितोऽपि कालः सुभागहारः क्रमेणैव ॥ १६ ॥
प्रथमद्वितीययोश्च द्वासप्ततिवृद्धिभागहारोऽयम् ।
षट्त्रिंशच्च षडर्धे चतुर्थके[1]ऽष्टादश प्रोक्ताः ॥ १७ ॥
षष्टित्रिदशादिनानि त्रिगुणं कृत्वैकपिण्डितं[2]प्राणम्[3] ।
स हरेद् द्वासप्ततिभिः पुनर्भजेत् षष्टिभिस्त्रिशतैः ॥१८ ॥
अब्दास्ते तल्लब्धाः शेषास्त्रिंशद्भिरुद्धृता मासाः ।
तच्छेषाणि दिनानि ज्ञातव्यान्यात्मसंविद्भिः ॥ १९ ॥
षष्ठीमारभ्य ततश्चतुर्दशीं यावदत्र संशोध्य ।
विहरेद् द्वासप्ततिभिः प्रथमोत्तरवृद्धिसंगुणितैः ॥ २० ॥
एकस्यां यदि नाड्यां वहति मरुत् षड्दिनानि यत्सततम् ।
द्वे वर्षे नव मासा दिनानि चाष्टादशोक्तानि ॥ २१ ॥
सप्त दिनानि समीरो वहति तदा चेन्निरन्तरं नाड्याम् ।
वर्षत्रयमुद्दिष्टं मासाः सप्तात्र षड् दिवसाः ॥ २२ ॥
अष्टमदि(ना ? नेऽ)ब्दयुगलं मासचतुष्कं च तस्य निर्दिष्टम् ।
दिवसा होरासङ्ख्याः साक्षात् तस्यायुषः सङ्ख्याः ॥२३॥
नवमेऽहनि वर्षे द्वे मासौ द्वौ तस्य तत्र रविदिवसाः ।
दशमेऽब्दयुगळमेतन्निर्दिष्टं तस्य जीवस्य ॥ २४ ॥

---

१. 'भे' ग. पाठः. २. 'तः प्रोक्तम् ।' क. पाठः. ३. 'तम' ख., 'णः ।' ग. पाठः.

एकादशैकवर्षं नव मासास्ते[1] पतिर्दिनानां च ।
द्वादशदिनेऽब्दमेकं मासाः सप्तैव षड् दिवसाः ॥ २५ ॥
वर्षं मासचतुष्कं त्रयोदशाहे[2](षु ? तु) तत्र मनुदिवसाः ।
एकोऽब्दो द्वौ मासौ द्वादशदिवसाश्च भूतदिने ॥ २६ ॥
(वर्षं च चतुर्मासास्त्रयोदशेऽस्मिन् दिवाश्चतुर्विंशाः ।
एकोऽब्दो द्वौ मासौ द्वादशदिवसानि भूतदिने ॥
पञ्चदशदिवसवारे दक्षिणनाड्यां समीरणस्यैव ?)
पञ्चदशदिवसवारे दक्षिणनाड्यां समीरणो यावत् ।
एकाकारेण घनं तस्यायुर्वर्षमेकं च ॥ २७ ॥
षोडशदिनमारभ्य च यावद्दिशं मरुद् भवेत् तावत् ।
षष्टित्रिंशद्[3][4]दिनानां षट्त्रिंशद्भिर्विशोध्य पुनः ॥ २८ ॥
त्रिंशद्भक्तविलब्धा मासास्ते स्युर्दिनानि शेषाणि ।
पश्चात् तद्विगुणांस्तैः षट्त्रिंशद्भिर्विशोध्योर्ध्वम्[5] ॥ २९ ॥
षोडशदिनदशमासा दिनानि द्वो(रा ? रो)पलक्षितानीह ।
*सप्तादश[6]नवमासा दिनानि चाष्टादश प्रोक्ताः(?)॥३० ॥
अष्टादशदिनचारे ह्यष्टौ मासा दिनार्कसंख्येयम् ।
एकोनविंशचारे मासाः सप्तात्र षड् दिवसाः ॥ ३१ ॥
विंशतिदिवसे वायुर्वहति यदा यस्य देहिनो नाड्याम् ।
षण्मासास्तस्यायुःप्रमाणसंख्या मया प्रोक्ताः ॥ ३२ ॥

---

१. 'स्ते दिना' क., 'स्ते प्रतिदिने च' ग. पाठः. २. 'ब्दे' ख. पाठः. ३. 'षट्त्रिंशद्दशदिना' ग. पाठः. ४. 'दि' क. पाठः. ५. 'यम्', ६. 'स' क. ग. पाठः.

---

* 'सप्तदशे नवमासा दिवसाश्चाष्टादश प्रोक्ताः' इति पाठः स्यात् ।

अत ऊर्ध्वं षण्मासांस्त्रिगु(णञ्चा ? णांश्चा)ष्टादशेन सं-
[शोध्य ।
विभजेत् तत्त्रिंशद्भिर्लब्धा मासास्ततो दिवसाः ॥ ३३ ॥
मासाः पञ्च द्वादश दिनानि तस्यैकविंशतिश्चारे ।
द्वाविंशतियुगमासास्तस्य चतुर्विंशतिर्दिवसाः ॥ ३४ ॥
युगमासाः षड्दिवसास्तदा त्रयोविंशतिप्रचारेण ।
अष्टादशदिनमासास्त्रयश्चतुर्विंशचारेण ॥ ३५ ॥
मासास्त्रयो भवन्ति हि चारेऽस्मिन् पञ्चविंशके नित्यम् ।
अत ऊर्ध्वं प्राक्कथितं पौष्णे कालस्य चक्रेऽस्मिन् ॥ ३६ ॥
अथ बाह्यपरीक्षणमप्यन्यं कालस्य निर्णयं सारम् ।
स्वस्थानां पुरुषाणां वक्ष्ये स्वस्थेतराणां च ॥ ३७ ॥
सव्यापसव्यतोऽब्जं[1] शतपत्रं[2] शब्दराशिभेदेन ।
अथ मालिनीत्रिभेदाः शतायुषो विप्रविन्यासः ॥ ३८ ॥
पञ्चाशद्दलमम्बुजमादिक्षान्तैरनुक्रमेणैव ।
पञ्चाशदब्दमायुः पुंसां सुपरीक्ष्यते चक्रे ॥ ३९ ॥
कादिचतुर्विंशतिभिर्भान्तैर्वर्णैरनुक्रमेणैव ।
तत्रास्य चतुर्विंशतिसंख्यायुः प्रोक्तमत्रैव ॥ ४० ॥
प्रणवो हंसो वाचस्तुम्बुरुदेवोऽथ कालबीजं वा ।
तन्मध्ये सम्पूज्य स्रमादिभिर्गन्धधूपैश्च ॥ ४१ ॥
सितघटिकालेखन्या कुमारिकाहस्तवृत्तया मृद्व्या ।
गोमयलिप्ते गुप्ते भूमितले शुद्धदेशे तु ॥ ४२ ॥

---

१. 'योज्यं श' क. पाठः. २. 'त्रमब्जरा' ख. पाठ'.

सलिलरसदर्पणार्चिषि[1] सुगन्धपुष्पैः प्रधूपदीपाद्यैः ।
संपूजयेत् सुबीजं[2] भोज्याद्यैस्तर्पयेत् सम्यक् ॥ ४३ ॥

नाश्नन् शयीत शुद्धः प्रभातकाले ततो निरीक्षेत ।
तच्चक्रवर्णरा(शि ? शे)र्नष्टानष्टच्युतच्छायाम् ॥ ४४ ॥

अङ्कक्षयेऽपि हानिं पूर्णे पूर्णायुराहुराचार्याः ।
कृष्णे मरणं ज्ञेयं शुक्ले पुष्टिं भयं धूम्रे ॥ ४५ ॥

रक्तक्षतं च विकृते सौम्ये सौम्यं विभीषणे कलहम् ।
फलभेदः संप्रोक्तो वर्णाकृतिभेदतः सकलम् ॥ ४६ ॥

गन्धाम्बुशरावस्थाः सृष्टा मृद्गोलकाश्च तावन्तः ।
संलिखितगर्भकास्ते सुपरीक्ष्याः पूजिताः सम्यक् ॥ ४७ ॥

यद्गोलकं विशीर्णं तद्वर्षे मृत्युमादिशेन्मतिमान् ।
दीपो वान्तः स्थाप्यस्तच्छान्तौ तद् भवत्येव ॥ ४८ ॥

विज्ञाताब्दः पुरुषः पश्चान्मृतिमाससंपरीक्ष्यात्मा ।
चक्रं[3] द्वादशजीवैः संलिख्य ततः परीक्षेत ॥ ४९ ॥

विज्ञातमाससंख्यं चक्रं तिथिबोधनाय संलिख्य ।
सव्यापसव्यमार्गान् कृत्वा विद्यान्निजां च तिथिम् ॥५०॥

यामावबोधनार्थं[4] यामैरष्टारकं लिखेच्चक्रम् ।
घटिकावबोधनाय च तदेव पुनरीक्ष्यते चक्रम् ॥ ५१ ॥

साक्षाच्छ्वे[5]तादिघटिकाविनाशकालात्मकाभिसंसिद्ध्यै ।
विधिरेष हि संप्रोक्तः स्वस्यापि[6] परस्य वा तन्त्रे ॥ ५२ ॥

---

१. ‘स्व’ ग. पाठः. २. ‘विजयं भो’, ३. ‘जं चेत् सं’ क. पाठः. ४ ‘र्थायाष्टैरष्टाष्टकं लि’ ग. पाठः. ५. ‘च्च ता घ’ ख. पाठः. ६. ‘परस्य पातेन ॥’ क. पाठः.

नियतानियतत्वेन द्विविधमरिष्टं प्रकल्पितं मुनिभिः ।
विद्यान्नियतमवञ्च्यं तथेतरद् वञ्चनीयं च ॥ ५३ ॥
यस्मिन् मासि मुहूर्ते श्वासो विनिवर्तितः स्फुटं यस्य ।
तस्मिन् मासि मुहूर्ते तस्य तदन्ते मृतिर्ज्ञेया ॥ ५४ ॥
कालज्ञानं सम्यगाख्यातमिष्टमन्त्रतश्चारात् ॥ ५४[1] ॥

इति सङ्ग्रामविजयोदये षोडशोऽध्यायः ।
ज्योतिषभागः समाप्तः ॥

अथ सप्तदशोऽध्यायः ।

अथ वक्ष्ये मृत्युजयं स्वजन्ममासे तु कृष्णपक्षस्य ।
अष्टम्यां शुचिदेहस्तमर्चयेद् देवमीशानम् ॥ १ ॥
क्षीरदधिमाक्षिकाज्यैर्गन्धैः पुष्पैः सचन्दनैर्बहुभिः ।
संपूज्य मन्त्रपूतैः[2] पश्चान्मन्त्रं लिखेद् धीमान् ॥ २ ॥
अजरामरलेखन्या भूर्जतले[3] शोभने समे शुद्धे ।
प्रतिमामधोवलम्बितहस्तां च लिखेत् स्वरक्तेन ॥ ३ ॥
अष्टाक्षरवर्गान्तं बीजान्यष्टौ समुद्धृतान्यत्र ।
तैर्बीजान्वितविद्यां मृत्युघ्नां ब्रह्मसंभूताम् ॥ ४ ॥
सान्तं चरणद्वन्द्वे लान्तं जङ्घाद्वये पवर्गान्तम् ।
कट्यां धान्तं नाभौ[4] तथा स्तनयुगे ढकारान्तम् ॥ ५ ॥
झान्तं वामे हस्ते घान्तं वामेतरे शिरोऽकारः ।
स्वं नाम हृदयमध्ये संलिख्य सुपूजयित्वा तु ॥ ६ ॥

---

१. 'रं' क. ग. पाठः. २. 'तं' ख. पाठः. ३. 'घ' ग. पाठः.
४. 'भौ स्तनयुग्मे तङ्का' ख. ग. पाठः.

दर्भप्रस्तरणेऽस्मिन् स्वपेद् बुधो मन्त्रितोऽथ तस्याग्रे ।
प्रातःकाले सम्यङ् निरीक्षयेद्धीनवर्णं च ॥ ७ ॥
अष्टाब्दोऽष्टममासे चोऽष्टतिथौ चाष्टयामसम्प्राप्ते ।
षष्टिघटिकान्तकाले मृत्युः शून्याक्षरे शून्ये ॥ ८ ॥
लान्ते शून्ये सर्वे सप्तमवर्षादिकं फलं विद्यात् ।
भान्ते षट् स्यात् सर्वं धान्ते पञ्चाख्यकं सर्वम् ॥ ९ ॥
ढान्ते शून्ये चत्वार्यादि च झान्ते तृतीयकं सर्वम् ।
घान्तेऽक्षरे च विद्यात् सर्वं द्वौ पूर्वके चैकम् ॥ १० ॥
लान्ते सप्त समाः क्षयेऽपि च लये षड्वत्सरा नक्षये
पञ्चाब्दा णलये समुद्रगणना झान्ते त्रयो वत्सराः ।
घान्ते द्वे तु कलान्तिमे क्षयंगते वर्षं तदेकं ध्रुवं
ह्येवं वत्सरमासयामघटिकावेलासु मृत्युर्भवेत् ॥ ११ ॥
तामष्टाक्षरविद्यामष्टोत्तरशतंजपेन नासाग्रे ।
अभिमन्त्र्य च सम्पश्येन्नासाग्रगतिं न पश्येत ॥ १२ ॥
तन्मृत्युरष्टदिवसे भवति तदा विष्णुरक्षितस्यापि ।
विज्ञातव्यो मृत्युर्मुद्गलचारे स्वचारज्ञैः ॥ १३ ॥
अथ वक्ष्येऽन्यच्चिह्नं मृत्योः पुरुषस्य कालसञ्ज्ञातम् ।
द्वादशवर्णैर्ज्ञेयं क्षयाक्षयं द्वादशाब्दानाम् ॥ १४ ॥

---

१. 'द्यो' ग. पाठः. २. 'वा' क. पाठः. ३. 'ज्ञा', ४. 'सा', ५. 'मक्षेये विलये' ग. पाठः. ६. 'न्न' क. पाठः. ७. 'सा', ८. 'के', ९. 'प', १०. 'ए' ग. पाठः. ११. 'तं जपेत् स ना' क. पाठः.

पूर्वस्य पूर्ववर्णः पञ्चमवर्णान्तिमो द्वितीययुतः।
पश्चाल्लकारवर्णः पिङ्गलशब्दस्ततो युक्तः॥ १५॥

ज्वलितः पश्चाद् युक्तो लोहितशब्देन पूर्णितो मन्त्रः।
द्वादशवर्णाख्यातः सर्वेषामुत्तरं सिद्धिः॥ १६॥

द्वादशदलमम्भोजं भूर्जे स्वस्यारुणेन तत्र लिखेत्।
मध्ये स्वनामसहितं शरावयुग्मेन सम्पुटितम्॥ १७॥

प्रातःकाले पश्येद् यन्त्राक्षरहीनमच्युतं सम्यक्।
हीनाक्षरेऽपि मृत्युः प्रथमान्तादिक्रमाब्दसङ्ख्यासु॥ १८॥

पञ्चाशद्वर्णौघं फलकायां स्वात्मरक्तरोचनया।
आलिख्य पौर्णमास्यां प्रातः पश्येत् क्षयं पूर्णम्॥ १९॥

एवं परीक्ष्य सम्यक् पश्चात् कालस्य वञ्चनं कुर्यात्।
ध्यानजपमन्त्रयोगैः करणैः श्वासैः प्रयोगज्ञः॥ २०॥

अम्भोरुहमष्टदलं सकर्णिकं केसरान्वितं भूर्जे।
तन्मध्यगमात्मानं साध्याक्षरदर्भितं पश्चात्॥ २१॥

प्रणवं प्राग्वारुण्यां जूङ्कारं राक्षसेशपत्रस्थम्।
मायां दक्षिणसौम्ये सः कारं वायुतेजस्थम्॥ २२॥

बाह्ये षोडशपत्रं षोडशबीजैर्विदर्भितं पश्चात्।
द्वात्रिंशत्पत्राढ्यं द्वात्रिंशद्वर्णकं पश्चात्॥ २३॥

बाह्येऽथ गुह्यशक्तिगमनु त्रिधा मायया च संवेष्टय।
कुङ्कुमगोरोचनया लिखेच्छुभं मृत्युहृद् यन्त्रम्॥ २४॥

---

१. 'मन्त्वादि' ख. पाठः. २. 'स्युः' क. ख. पाठः.
३. 'जीवैर्वि' ग. पाठः.

शुभशालिपिष्टलिङ्गं कृत्वा तस्मिन्निधापयेद् यन्त्रम् ।
तत् पूजयेत[1] स नित्यं ब्रह्मायुस्तस्य निर्दिष्टम् ॥ २५ ॥
आत्मानं सम्पुटितं कृत्वा नित्यं जपेन्महामन्त्रम् ।
मासान्निहन्ति मृत्युं तस्यायुर्वर्धते प्रचुरम् ॥ २६ ॥
भक्ष्यं भोज्यं पानं लेह्यं चानेन मन्त्रितं कृत्वा ।
भक्षयतु निर्विषत्वं भवति तनोर्वर्धनं नित्यम् ॥ २७ ॥
संवेष्ट्य सिक्थकेन[2] हि निधापयेत् क्षीरकुम्भमध्येऽस्मिन् ।
तद्घटमगाधवारिणि निधापयेद् यावदायुष्यम् ॥ २८ ॥
सरसिजसरसि च तोयं प्रविश्य कण्ठप्रमाणमुपवासी ।
इनममावास्यायां रात्रौ मौनी जपेदयुतम् ॥ २९ ॥
अथवा नदीह्रदान्ते तटाकमध्येऽथैवा[3] महावाप्याम् ।
स्थित्वा जपेदनन्तं मृत्युं जित्वा चिरं जीव्यात् ॥ ३० ॥
दर्वीकराहिमण्डलिराजिललूताखुदष्टविषं हन्यात् ।
तद्धारणया सर्वं घोरविषं निर्विषं सद्यः ॥ ३१ ॥
धारयतु बाहुशिखरे सङ्ग्रामे दुर्गराजचोरभये ।
अटवीमृगसङ्कीर्णे समुद्रतरणे भयस्थाने ॥ ३२ ॥
अमृताख्या पूर्वयुगे माहेयी सा परा समाख्याता ।
त्रिपुरविजयीति पश्चात् ख्याता सञ्जीविनी विद्या ॥ ३३ ॥
कवनभ्यामृतयत्नाद् वायुजयः स्यात् ततश्च मृत्युजयः ।
यदि तिष्ठति दृढायुः सहस्रवायुश्शतं ज्ञेयम् ॥ ३४ ॥

---

१. 'येदनुदिनं ब्र' ग. पाठः. २. 'तिलके' ख. पाठः. ३. 'पि' क. पाठः.

ऊर्ध्वाधोनिश्चारो हृल्लीनो निष्कलः परः श्वासः ।
मृत्युजयकृत् समस्तव्याधिध्वंसी भवेद् व्याप्तः ॥ ३५ ॥
हृदये स मनः कृत्वा निर्मलमाकाशकल्पमन्तस्थम् ।
निरुपाधिमनालम्बं मृत्युं जय(न्त ? त्त)त्क्षणेनैव ॥ ३६ ॥
रेचकपूरकयुगळं त्यक्त्वा हृत्पुण्डरीकमध्येऽस्मिन् ।
तिष्ठेदन्तः स्वस्थः मृत्युंजयः स्यात् प्रयोगोऽयम् ॥ ३७ ॥
हिमकरचाराभ्यासाद् ... मृत्युवञ्चना भवति ।
अल्पायुरुष्णदीधितिच ...सात् क्षणेनैव ॥ ३८ ॥
चित्तं नासाग्रे च प्रवि... ततः स्वयं त्र यदि तिष्ठेत् ।
वायुजयः स्यादथवा ...स्थाने निरोधजयः ॥ ३९ ॥
रसनाग्रघण्टिकाग्रस्थि... हंसचारसंरोधैः ।
मासान्निहन्ति साक्षाद् ... कालमृत्युमपि ॥ ४० ॥
कालनिरोधः श्वासस्थानिरोधः क्षणेन पुरुषस्य ।
श्वासनिरोधाभ्यासाद् ... ऽयुः स्यात् ॥ ४१ ॥
वज्रनळकान्तराळे ... तिष्ठेन्मनोरथेनैव ।
यावच्चन्द्रादित्यौ ता... समाधिस्थः ॥ ४२ ॥

क्षीरार्णवे लक्षसह...
श्वेताम्बुजे ... कर्णिकेन्दौ ।
तस्मिन् प्रविष्टः ...मेघवृष्टे-
र्धाराप्लुताङ्गः ...शिचारसक्तः ॥ ४३ ॥

---

१. 'त्ती' ख. पाठः . 'ना' ख. ग. पाठः. ३. 'ञ्जय तत्क्ष' ख. पाठः. ४. 'ग्रे ...टिका', ५. 'धात् ।' क. पाठः. ६. 'ने रो' ग. पाठः. ७. 'ज्ञानाळ' ८. 'स तु मेघपृष्ठे धरा' ख. पाठः

पद्मद्वयेन्दुद्वयमध्यसुस्थः
शिरश्शशाङ्कामृतबिन्दुसिक्तः ।
नासासुषुम्नान्तरचित्तवृत्ति-
र्मृत्युं जयेदागतमर्धवर्षात् ॥ ४४ ॥

आकाशामृतधारा स्वशिरोरन्ध्रप्रवेशिनी शुद्धा ।
आप्लाव्यान्तःकायं भवति बहिश्चाप्लुतापमृत्युहरा ॥ ४५

रन्ध्रान्तविद् बिन्दुमहामृतौघं[1]
सम्पूरितं स्वात्मशरीरसंस्थम् ।
अन्तर्बहिःस्थं सततं सुचिन्त्यः
संचिन्तयेन्मृत्युजयाय धीरः ॥ ४६ ॥

नाडीचक्रे विद्रुतेन्दुद्र(सा ? वा)भा
तीरभोया[2] वा द्रवत्यन्तरस्था ।
याः रोमभ्यो निर्गता व्याप्तबाह्या
हन्यात् साक्षात् कालमृत्युं त्रिमासात् ॥ ४७ ॥

कुम्भाकारेणास्थे नाभिविरन्ध्रेण स्वाम्बुजेऽमितान् ।
आकर्षेदमृतौघं शीतं मृत्युञ्जयाय सदा ॥ ४८ ॥

हस्तोदरसंयोगे[6] प्रवृत्तयोगोऽपमृत्युविजयाय ।
गमनागमनच्छेदः परमावस्थाव्यवस्थानम्[9] ॥ ४९ ॥

[10] नीलग्रीवहृदि स्वयं स्थिरगतो मृत्युञ्जयाय ध्रुवं
चामुण्डीहृदये गतोऽथ मनुजो दुर्गाहृदिस्थः स्वयम् ।

---

१. 'घ', २. 'द्राहा या' ख. पाठः. ३. 'यारोमध्यनि' क., 'योरोमध्यो नि' ख. पाठः. ४. 'श्चा' ख. पाठः. 'हस्तेतर क. ग. पाठः. ६. 'ग', ७. 'पि', ८. 'दस्फुरणा क. पाठः. ९. 'प्य' १०. 'लीनग्री' ख. पाठः.

कालाग्नेर्हृदि वा स्थितोऽभिनिरतस्तद्ध्यानयुक्तो नरः
संजीयादथ नारसिंहहृदये कालं जयाय स्फुटम् ॥ ५० ॥

इति सङ्ग्रामविजयोदये सप्तदशोऽध्यायः ॥

अथाष्टादशोऽध्यायः ।

अथ यन्त्रविधिं वक्ष्ये नानाबीजाक्षरांशसङ्कीर्णम् ।
विविधग[1]णजातियोनिस्थानग्रहकालवेलोक्तम् ॥ १ ॥

द्रव्योपा[2]दनसाधनमण्डलचिह्नाधि[3]दैवसंयुक्तम् ।
क्रूराक्रूरविभागध्यानाकारप्रयोगयुतम् ॥ २ ॥

पृथिवीजलदहनमरुद्व्योम्नां बीजानि पञ्चभेदानि ।
पञ्चाशदक्षराणां मध्ये मन्त्रेषु नान्तानि ॥ ३ ॥

ब्रह्मेन्द्ररुद्रराक्षसगरुडोरगयक्षदैत्यभूतानाम् ।
गन्धर्वासुरकिन्नरकिम्पुरु[4]षपिशाचसिद्धानाम् ॥ ४ ॥

पञ्चदशांशाः ख्याताः शेषाः संमिश्रजाश्च पुरुषाणाम् ।
केचिद् दशाष्टभेदं प्राहुर्मन्त्रांशकं विदु[5]र्षः ॥ ५ ॥

द्व्यक्षरयोगेनोक्ता कर्तरिका त्र्यक्षरैर्भवेत् सूची ।
वर्णचतुष्कं मुद्गरमाहुर्मुसलं च पञ्चमकम् ॥ ६ ॥

षट्[6]कं शृङ्खलमेतत् क्रकचं सप्ताक्षरं त्रिशूलं च ।
अष्टाक्षरमिति वज्रं नवाक्षरं शक्तिदशकं[7] च ॥ ७ ॥

---

१. 'गु' ग. पाठः. २. 'ल' ख. ग. पाठः. ३. 'द' क. ख. पाठः. ४. 'षाणां पि' ग. पाठः. ५. 'षाम्' क., 'षा' ग. पाठः. ६. 'ष्ठं' क. ग. पाठः. ७. 'मं' ख. पाठः.

एकादशकं परशुर्द्वादशवर्णैर्भवेदिदं चक्रम् ।
एवं रञ्जकभेदैर्भेदः सर्वप्रयोगेण ॥ ८ ॥
मन्त्रच्छेदनकार्ये कर्तरिका भेदने च सा सूची ।
प्रतिभञ्जने च मुद्गरमुरुमुसलं क्षोभणे प्राहुः ॥ ९ ॥
शृङ्खलमुग्रविबन्धे घाते शूलं च बन्धने पाशम् ।
अङ्कुशमाकर्षेऽस्मिन् द्वेषे परशुः समाख्यातः ॥ १० ॥
वज्रं स्तम्भनकार्ये नाराचः सैन्यभेदने योज्यः ।
कुलिशं त्रयोदशयुतं सन्धानमभित्रकार्येषु ॥ ११ ॥
स चतुर्दशवर्णोक्तो नाराचः स्यात् स मुण्डकाख्यातः ।
पञ्चदशाक्षरयुक्तः षोडशवर्णो भवेत् कमलम् ॥ १२ ॥
अन्ते स पल्लवः[1] स्यादाद्ये योगो[2]ऽन्तमध्यमा[3]दौ च ।
रोधो ज्ञेयः साक्षादाद्यन्ते सम्पुटं प्रोक्तम् ॥ १३ ॥
वर्णान्तरितो ग्रथनं[4]ः सविदर्भो द्व्यक्षरान्तरान्तरितः ।
एवं षट्कर्मविधौ कर्तव्यो मन्त्रिणा मन्त्रे ॥ १४ ॥
मारणविषसंहारे ग्रहभूतपिशाचनिग्रहे द्वेषे ।
उच्चाटनादिकार्ये कर्तव्यः पल्लवो येन ॥ १५ ॥
दीपकशान्तिकपौष्टिकवशीकरणनिर्मू[5]षिककार्येषु(?) ।
अमली[6]करणे[7] मोहे प्रायश्चित्ते [8]भवेद् योगः ॥ १६ ॥

---

१. 'वे स्या', २. 'गा' क. ख. पाठः. ३. 'मोऽन्ते च' ख., 'मान्ते च' ग. पाठः. ४. 'नं' ख. पाठः. ५, 'मलिक' क., 'मलक' ग. पाठः. ६. 'ल', ७. 'णे च मो' क. पाठः. ८. 'लिखेद् योगम् ।' ग. पाठः.

मन्त्राभिमुख्यकरणे सर्वव्याधेर्विनाशने घोरे ।
ज्वरहरणविषभयाद्ये कर्तव्यो मन्त्रिणा रोधः ॥ १७ ॥

स्तम्भनरक्षणबोधनमृत्युजये सम्पुटो[1] भवेद् दिव्ये[2] ।
परमन्त्रभेदकार्ये ग्रथनः संरोधने प्रोक्तः ॥ १८ ॥

छेदनताडननिग्रहविद्याहरणेऽतिपातने स्तोभे ।
सविदर्भः कर्तव्यो रौद्राद्यो मन्त्रिणा मन्त्रः ॥ १९ ॥

[3]बोधनदीपनतापननिग्रहरोधा मलीकरणच्छेदाः ।
आप्यायनेन चाष्टौ समस्तमन्त्रक्रियाभेदाः ॥ २० ॥

सन्दीपे विद्वेषे चलने सन्ताडने च हुङ्कारः ।
फट्कारो विच्छेद्ये हुंफड् विघ्ने ग्रहे पाते ॥ २१ ॥

आप्यायने च पुष्टौ वषट्पदं बोधने[4] बलीकरणे ।
[5]सञ्छादनार्चनायां नमोऽग्निकार्ये जपेत् स्वाहा ॥ २२ ॥

स्वाहास्वधावषट्पदबहुलं(ष?फ)डुंफट क्रमेण संयोज्यम् ।
शान्तिकपौष्टिकवश्यद्वेषाकृष्टिभ्रमध्वंसे ॥ २३ ॥

आकर्षणतापज्वरवश्ये स्वाहापदं प्रयोक्तव्यम् ।
क्रोधोपशमनशान्तिप्रीतिषु योज्यो नमस्कारः ॥ २४ ॥

मृत्युञ्जयसम्मोहनपुष्टिसमुद्दीपनेषु वौषड्[6]भ्याम् ।
छेदनमारणकार्ये हुङ्कारः प्रीतिनाशे च ॥ २५ ॥

उच्च[7]लने विद्वेषे वषट्प्रयोगोऽन्धके सफट्कारः ।
मन्त्रोद्दीपनकार्ये लाभालाभे वषट्कारः ॥ २६ ॥

---

१. 'टे' क. ख. पाठः. २. 'व्यैः ।' क. पाठः. ३. 'यो' क. ग. पाठः. ४. 'ने च बलिक' ग. पाठः. ५. 'व', ६. 'भ्यः', ७. 'ज्ज्व' ख. पाठः.

जपहोमार्चनसाधनमिह नहि सिद्धिः स्वजातिहीनाच्च ।
तस्माज्जातिं ज्ञात्वा नियोजयेत् सर्वकार्येषु ॥ २७ ॥
ता[१]डनदीपनभेद्यच्छेदनसंरोधनेन्धनेत्यादि ।
संयोजयेत् समस्तप्रचण्डमन्त्रेषु सर्वेषु ॥ २८ ॥
वश्यं वसन्तकाले विद्वेषोच्चाटनं निदाघे च ।
प्रावृषि शान्ति पुष्टिं मारणमुद्यच्छरत्काले ॥ २९ ॥
शिशिरे स्तम्भनमेतद्धेमन्ते प्राहुरुद्यतां तुष्टिम् ।
यच्चान्यच्छुभकार्यं कुर्यान्मन्त्रस्य हेमन्ते ॥ ३० ॥
पूर्वो वसन्तकालो मध्याह्नं ग्रीष्ममाहुराचार्याः ।
अपराह्नं प्रावृट्कं सन्ध्याकालः शरत् प्रोक्तः ॥ ३१ ॥
पूर्वो वसन्तकालो मध्याह्नोष्णश्च वृष्टिरपराह्नः ।
कालः शरत् प्रदोषः शिशिरोऽर्द्धनिशा च शेषोऽन्त्यम्
[॥ ३२ ॥
द्विविधो मन्त्रो ज्ञेयः क(ल्पा ? ल्पोऽ)कल्पश्च सर्वकार्ये[२]षु ।
एकाक्षरमारभ्य च षोडशवर्णान्तिकं कल्पः ॥ ३३ ॥
तस्योर्ध्वो मालाख्यो मन्त्रः [३]कल्पस्य कल्पिता सिद्धिः ।
उच्च[४]रसिद्धिरकल्पे स हि कल्पस्या[५]न्वितो भेदः ॥ ३४ ॥
पिण्डो बीजं ख्यातं पिण्डः स्यात् पञ्चभूतसंयुक्तः ।
बीजं जीवसमेतं ताभ्यां युक्तो[६] मतो मन्त्रः ॥ ३५ ॥

---

१. 'प' ग. पाठः. २. 'शास्त्रेषु' क. ख. पाठः. ३. 'कालस्य कल्पना सि', ४. 'म', ५. 'स्वान्वितात्र भेदाः', ६. 'नो' ख. पाठः.

पिण्डो बीजं मन्त्रं त(त्र ? न्त्रं) यन्त्रं च पञ्चधा भिन्नम् ।
पिण्डोऽनुच्चार्यः स्यादुच्चार्यं बीजमत्रैव ॥ ३६ ॥

एकाक्षरो द्विबीजो बहुवर्णो वा भवेत् ततो मन्त्रः ।
तन्त्रं द्रव्यादियुतं मन्त्रेणालेखितं यन्त्रम् ॥ ३७ ॥

भेद्योऽभेद्यः पिण्डो द्विविधः परिकल्पितः सदाचार्यैः ।
आद्यक्षरादिमायायुक्तं हेढोरको भेद्यः ॥ ३८ ॥

आद्यन्तमध्यवर्णैर्मण्डलमध्ये विभेदितोऽभेद्यः ।
भूम्यम्बुदहनमरुतां स्वमण्डलस्थेषु कूटानाम् ॥ ३९ ॥

उच्चाटनं ध्वजाग्रे विद्वेषं रासभाजिने स लिखेत् ।
स्तम्भनमिभस्य चर्मणि वश्याकृष्टिं च भूर्जतले ॥ ४० ॥

मारणसन्तापज्वरकार्यं प्रेताम्बरे शिलायां च ।
सेनास्तम्भनमोहनजल्पविवादादिकार्यं च ॥ ४१ ॥

ध्वजमण्डले(कं ? के) स्तम्भनमुच्चाटनमग्निगोचरे शान्तिः।
गजवृषभमण्डलेऽस्मिंस्तापनमरणादिकं सिंहे ॥ ४२ ॥

ध्वाङ्क्षे निग्रहकलहौ विद्वेषो मण्डले च कर्तव्यः ।
खरधाम्नि कुलोत्सादो ब्रह्मस्थाने शुभं कार्यम् ॥ ४३ ॥

मारणमहिरक्तेन तु विद्वेषं कालरौद्ररक्तेन ।
विषरक्तेन तु[2] मोहनमुच्चाटनमुष्ट्ररक्तेन ॥ ४४ ॥

वश्यं गोरोचनया हरिद्रया स्तम्भनं च तापेन ।
असृजाप्यनामिकायाँ[3] वनिताकृष्टिः प्रयोक्तव्या ॥ ४५ ॥

---

१. 'न' क. पाठः. २. 'च', ३. 'या' क. ग. पाठः.

चलने विद्वेषे[1] सति[2] कलेन खटिका[3] निरास्थि[4] चात्मवेधे[5](?)।
वश्ये दूर्वाखण्डं शिखिपिञ्छमया सदाकृष्टौ ॥ ४६ ॥

वृषसिंहकुम्भवृश्चिकवेलायां स्तम्भनं लिखेद् यन्त्रम्।
नक्रतुलाजकुलीरे विद्वेषोच्चाटनादिकं कार्यम्[6][7] ॥ ४७ ॥

यममीनचापकन्यावेलायां वश्यशान्तिपुष्टिं च ।
मारणनिग्रहकार्यं[8] तस्याष्टमराशिवेलायाम् ॥ ४८ ॥

रौद्रग्रहेषु रौद्रं शुभेषु वश्यं च शान्तिपुष्टिं च ।
सूर्यार्किभौमयोगे मारणकार्यादिकं कुर्यात् ॥ ४९ ॥

मन्त्रस्त्रिविधः सर्वः शाक्तायणशैवशाम्भवाः ख्याताः ।
त्रिविधोच्चारास्तेषां भवन्ति मन्दोग्रशक्त्यान्ये ॥ ५० ॥

मन्देन सिद्धिर्भुवि शक्ति[9]मन्त्रो
मायो भवो (?) येन च मध्यमेन ।
तीव्रेण सिद्धिः शिवमन्त्र एव-
मुच्चारभेदैः[10] कथितैः[11] फलाय ॥ ५१ ॥

आपूर्याजस्थानं हृदयं तद्वत् प्रपूरयेद् वायुम्।
उच्चारः शक्तिभवो मनो निरालम्बनीकृत्य ॥ ५२ ॥

अतितीव्रमतिफलद(मिद)मतिमन्दं[12] मन्दमल्पतरमल्पम् ।
आध्यात्मिकमुच्चारं[13] ज्ञात्वा युञ्जीत मन्त्रज्ञः ॥ ५३ ॥

---

१. 'षे द्विकले ख' ग. पाठः. २. 'ति ख' ख. पाठः. ३ 'नि' क. ख. पाठः. ४. 'न्नि' ख. पाठः. ५. 'विधेः ।' क. पाठः. ६. 'कुर्यात् ॥', ७. 'कगापशाम्भवाश्च विख्या।', ८. 'क्त्य' ग. पाठः. ९. 'क्तमित्रो मालो भ' ख. पाठः. १०. 'दाः', ११ 'ता मुनीन्द्रैः ।', १२. न्दमल्पतरफलदम् ।' क. पाठः. १३. 'अध्यात्मक' क. ख. पाठः.

संवृतसुवृतव्यावृत उच्चारस्तस्य बाह्यतः प्रोक्तः ।
एतत् कथितं कार्यं मन्त्राणां तन्निगर्भे च ॥ ५४ ॥
अथ रक्षां वक्ष्येऽहं समस्तविषदोषहारिणीं पूर्वम् ।
हंसान्तर्गतनामर्क्षवेष्टितचतुर्वकारस्थम् ॥ ५५ ॥
बाह्ये द्वादशपत्रं तद्बाह्ये षोडशारमम्भोजम् ।
सान्तं वह्न्यारूढं द्वादशजैर्बिन्दुभिन्नाद्यैः ॥ ५६ ॥
बाह्ये शक्तेर्बीजं यवकारं षोडशस्वरैर्भिन्नम् ।
षोडशदले नियोज्यं बाह्ये वार्थो(ष्ट ? श्व) मण्डलकम् ॥५७॥
भूर्जे गोरोचनया कुङ्कुमकर्पूरहस्तिमदजालया ।
आलिख्य यन्त्रराजं स धारयेत् सर्वरक्षकरम् ॥ ५८ ॥
इचतुर्थं सान्तयुतं सरेफमोङ्कारसंयुतं कूटम् ।
अवनीन्द्रभवसंस्थं प्रतप्तहेमोपमं ध्यायेत् ॥ ५९ ॥
व्यालेभमूर्ध्नि संस्थं वज्राकारं महज्ज्वलद्दीप्तम् ।
नाशयति तस्य शक्तिं शत्रूणां चापि वक्त्रस्थम् ॥ ६० ॥
तद्बीजमिन्द्रमण्डलसंस्थं क्रोधादिवाक्यसंस्तोभम् ।
सद्यः करोति साक्षात् पीतद्रव्येण संलेख्यम् ॥ ६१ ॥
भूतपिशाचभुजङ्गमचोरमृगारण्यशैलसंग्रामे ।
नद्युदधिसमुत्तरणे जप्तव्यं तत् प्रयत्नेन ॥ ६२ ॥

---

१. 'सुप्तव्या' ग. पाठः. २. 'ह्रैं' ख. पाठः. ३. 'तं तच्चतु', ४. 'ये ॥' क. पाठः. ५. 'जं वकारकं षो' ख. पाठः. ६. 'य्योर्मण्ड' ग. पाठः. ७. 'सु' क. ग. पाठः. ८. 'लं दीप्तम् ।' क. ख. पाठः. ९. 'दिसं' क. पाठः.

अष्टा[1]रं राजीवं तत्कूटं कर्णिका[2]ग्रगं ग्रहगम् ।
क्षिप ओंस्वाहेति चतुष्टयमब्जचतुर्दले योज्यम् ॥ ६३ ॥

तन्मध्यशङ्खबीजं शेषेषु दलेषु तत् प्रविन्यस्तम् ।
मायावेष्टितमेतद् रक्षकरं धारयेन्नित्यम् ॥ ६४ ॥

नाम ववीजान्तस्थं हकारशिरसि स्थितं सकारेण ।
जूंकारेण निरुद्धं स्थितं सै[3]मध्ये तु शशिवेष्टयम् ॥ ६५ ॥

पश्चाद् रान्तान्तगतं[4] मकारवर्णं त्रिमूर्तिमध्यस्थम् ।
रोचनया भूर्जतले लिख्य परं लोहसंवेष्टयम् ॥ ६६ ॥

धारयतु सव्यहस्ते लिप्तविदोषापहृद् विरोधहरम् ।
आयुधवारणमेतत् साक्षान्मृत्युञ्जयं नाम ॥ ६७ ॥

मृत्युञ्जयसंपुटितं नाम ब्लुं[5]ङ्कारवेष्टितं पश्चात् ।
जीङ्कारेण सशशिना संवेष्टय थवेष्टितं बाह्ये ॥ ६८ ॥

चतुरश्रमष्टकोणं तन्मध्ये लान्तमर्धचन्द्रेण ।
ईशे प्रणवं देयं जूङ्कारं निर्गतं चाग्नौ ॥ ६९ ॥

वीकारं[6] वा याम्ये सनैर्ऋते वारुणे तु जूङ्कारम् ।
यं वायुस्थं धनदे मेरु[7]शिखे चन्द्रपुरयुक्तम् ॥ ७० ॥

भूर्ता[8]रविशशिमृद्भिर्विलिखेद् घटिकां च कारयेल्लिङ्गम् ।
स्तम्भयति वह्निजालं दिव्यं[9] चानेन मार्गेण ॥ ७१ ॥

---

१. 'ष्टाक्षररा' क. पाठः. २. 'काग्रहतः ।' क., 'को' ग. पाठः. ३. 'क्ष' ग. पाठः. ४. 'तमिका' क. ग. पाठः. ५. 'जू' ख. ग. पाठः. ६. 'विङ्कारं' क. ग. पाठः. ७. 'लिखेद् वज्रपु' ख. ग. पाठः. ८. 'पा' ख. पाठः. ९. 'दीपं चा' क. पाठः.

पद्मं द्वादशपत्रं[1] मध्ये जूङ्कारगर्भगं[2] नाम ।
[3]लुङ्कारं तन्मध्येऽन्ते(म ? र)ष्टदिक्पत्रगं प्रणवम् ॥ ७२ ॥
बाह्येऽष्टदलाम्भोजं षोडशशूलान्वितं महाचक्रम् ।
शूलाग्रेषु प्रणवं क्षुंग्लौं[5] शूलान्तरे न्यस्तौ ॥ ७३ ॥
भूर्जे रविणात्र लिखेन्निधापयेत्[6] पिष्टलिङ्गमध्येऽस्मिन् ।
संस्थाप्य वारि पात्रे दीपं तस्योर्ध्वगं न्यस्त्वा ॥ ७४ ॥

सकलविषसमूहं सर्वरोगांश्च हन्ति
ग्रहभुजगपिशाचांश्चालयत्येतदाशु[7] ।
गजतुरगरथादिस्तम्भकृद् युद्धभूमौ
कुलिशदहनशक्तिध्वंसकृद् यन्त्रराजः ॥ ७५ ॥

वेदादिद्वयमध्यगतं[9] मग्लौंयुग्मवेष्टितं ठगतम् ।
दिक्कुलिशाष्टाविद्धं ग्लौंक्षौं[10] वज्रान्तरेषु गतौ ॥ ७६ ॥
तद्वज्रान्ते[11]प्रणवं महेन्द्रपुरमष्टवज्रसम्पूर्णम् ।
तत्कोणेषु लकारं बाह्येऽकारेण संवेष्ट्य[12] ॥ ७७ ॥
अङ्कुश[13]बीजनिरुद्धं हरितालेनाथ पीतगैरिकया ।
भित्तौ वाससि भूमौ शिलातले वा लिखेद् यन्त्रम् ॥ ७८ ॥

---

१. 'त्रं तन्मध्ये' ख. ग. पाठः. २. 'कं' घ. पाठः. ३. 'जू' ख. पाठः. ४. 'त' क. ग. पाठः. ५. 'गौं' क., 'ग्लौं' ग. पाठः. ६. 'विले निधा' ख. पाठः. ७. 'न्त्ये' ख., 'न्ते' ग. पाठः. ८. 'जम् ।' ख., 'जा' ग. पाठः. ९. 'तं ग्लौ' क., 'तामग्लौं यु' ख. ग. पाठः. १०. 'क्षौं' ग पाठः. ११. 'ष्ट', १२. 'ष्टयन्', १३. 'शं' ख. पाठः.

वा(ग्ग ? ग्दि)व्यै[1]गर्भगमनक्रोधानलशकटयन्त्रपाताद्यै[2]म् ।
स्तम्भयति यै[3]न्त्रमेतद् रौद्रमृगग्रौ[4]हसर्पांश्च ॥ ७९ ॥

स्तम्भयति शत्रुवाचं[5]ः शान्तान्तो[6] मलयवर्णसंयुक्तैः[7] ।
षष्ठस्वरेण सहितः साध्याक्षरदर्भितः सद्यः ॥ ८० ॥

सचतुर्थो बिन्दुयुतः शत्रुशिरोरन्ध्रघण्डिकालीनः ।
स्तम्भयति वाक्प्रवृत्तिं ध्याँ[8]तः पी[9]तः सविच्छेदैः[10] ॥ ८१ ॥

मचतुर्थः शत्रुमुखे न्यस्तव्यो बिन्दुमस्तकः पीतः ।
अमरेन्द्रमण्डलस्थः[11] क्रोधस्तम्भं करोत्याशु ॥ ८२ ॥

तालुरसनाग्रमूले[12] त्रांकारस्तप्तहेमसङ्काशः[13] ।
ध्यातः प्रतिपक्षाणां वाचः स्तम्भं करोत्याशु ॥ ८३ ॥

चरणयुगजानुवक्षसि जठरस्तनकण्ठमूर्ध्नि संवेष्टय ।
शिरसः[14] पायुस्थानात्[15] पीताकारेण भूलग्नाम् ॥ ८४ ॥

ध्यात्वा शक्तिं[16] वाचां गमनक्रोधास्त्रशत्रुसङ्घातम् ।
व्यालमृगोरगवदनस्तम्भं दृढलक्षणेनैव ॥ ८५ ॥

अथ परसेनास्तम्भनमहितप्रध्वंसि जीवरक्षकरम् ।
वीरश्रीकरमाद्यं विश्वेश्वरनिर्मितं शिव[17]दं[18]म् ॥ ८६ ॥

---

१. 'व्य(ग)मनगर्भक्रो' ख. पाठः. २. 'द्याः' ख., 'द्या' ग. पाठः. ३. 'म' ख. पाठः. ४. 'ग्रासस' क., 'ग्रहादिस' ख. पाठः. ५. 'चं' क., 'चां' ख. पाठः. ६. 'न्तौ' ख. पाठः. ७. 'क्तम्' ख. ग. पाठः. ८. 'ध्वान्तः पी', ९. 'ता' ख. पाठः. १०. 'द्यः' क. ग. पाठः. ११. 'स्तकस्थः' क., 'ण्डपस्थः' ख. पाठः. १२. 'लं' ग. पाठः. १३. 'शम् ।' ख. ग. पाठः. १४. 'सि पा', १५. 'ने' ख. पाठः. १६. 'क्तिर्वाचां' ग. पाठः. १७. 'विशदम्' ख. ग. पाठः. १८. 'दम् ॥ इति सङ्ग्रामविजयोदयेऽष्टादशोऽध्यायः । वाग्दि' ख. पाठः.

वाग्दिव्यगर्भगमनं[2]क्रोधानलवृ[3]ष्टिवज्रपातानाम्।
भूतपिशाचार्म्यन्तरकुमारयक्षग्रहादीनाम्॥ ८७॥
गजतुरगभुजगमृगरथ[5]शकटनदीयन्त्रशस्त्रजालानाम्।
मकरशि[6]शुमारकाणां स्तम्भकरं यन्त्रराजेन्द्रम्॥ ८८॥
द्वादशदलमम्भोजं सकर्णिकं तस्य तुम्बुरुं मध्ये।
दिक्कूटस्था देव्यो विदिग्गतं बीजकमलस्थम्॥ ८९॥
शेषदलेषु नियोज्यं रान्तेन च साध्यनामसम्पुटितम्।
सं च लकारे संस्थं चक्रेश्वरमिन्द्रबीजस्थम्॥ ९०॥
चक्रस्य बाह्यदेशं नपुंसकै[8]र्वेष्टितं च तद्बाह्ये[9]।
या[10]न्तं तस्योर्ध्वस्थं मकाररविवेष्टितं भूयः॥ ९१॥
पाशेन वेष्टयित्वा त्रिवारमुग्राङ्कुशेन संरुद्धम्।
पश्चात् ठकारबीजं ततः फणीन्द्रस्य मन्त्रं च॥ ९२॥
तद्बाह्योरगरूपं महोन्नतास्यं च मन्त्रकान् सर्वान्।
शृङ्खलबन्धेन लिखेत् त्रिवारमक्षरसमूहं च॥ ९३॥
मण्डलमुरुचतुरश्रं तद्बाह्येऽन्यं समं सुचतुरश्रम्।
वज्राष्टकसंयुक्तं सुशोभनं चाष्टकोणयुतम्॥ ९४॥
कोणेषु मन्त्रराजं चक्रासनसंस्थितं महायन्त्रम्।
सितकर्पटे विलिखितं हरिद्रया शक्रतालेन॥ ९५॥

---

१. 'नहंग' ख. पाठः. २. 'नं', ३. 'वि' ग. पाठः ४. 'व्य' क. ग. पाठः. ५. 'व' क. पाठः. ६. 'शिं', ७. 'र्म्बु' ग. पाठः. ८. 'कं वेष्टि' क. पाठः. ९. 'ह्यम्' क. ग. पाठः. १०. 'न्ता' ख. ग. पाठः.

रेचकयोगेनैवं स्तम्भं शान्तिं च पूर[1]केणैव ।
पुष्टिकरं मृत्युहरं कु[2]म्भकयोगेन कर्तव्यम् ॥ ९६ ॥
मुद्गचणकोरुमाषकचूर्णं[3] तन्मर्दयेन्मृदा सूक्ष्मम् ।
तेन विरूपं कुर्यात् कराङ्घ्रिहीनं विकर्णाक्षम् ॥ ९७ ॥
तन्मध्ये तद्यन्त्रं न्यस्त्वा पीतेन तन्तुनावेष्टय[4] ।
पीतकुसुमोग्रगन्धैस्तमर्चयेत् पीतनैवेद्यैः ॥ ९८ ॥
उद्धर्द्धमूर्ध्वपादं कुर्यात् परचक्रसम्मुखं रूपम् ।
तत् परचक्रं नश्यति सद्यो भानोर्यथा ध्वान्तम् ॥ ९९ ॥
द्वादशदलाब्जमध्ये तुम्बुरुबीजं तदन्तगं साध्यम् ।
अनिलाग्निसमाक्रान्तं दिक्षु चतुर्देवता न्यस्त्वा ॥ १०० ॥
उपदिक्षु बीजपञ्चकमन्त्रः पं[5]त्रे[6]ष्वाधिष्ठितः क्रोधः ।
शिखिपवनसमाक्रान्तं ठकारपरिवेष्टितं पश्चात् ॥ १०१ ॥
बाह्ये च चतुस्त्रिंशत् कादिक्रोधान्तमाग्निवायुयुतम् ।
तत्रा[7]स्त्रराजमन्त्रे विदर्भितं कर्ण(को?मो)ट्याँ च ॥ १०२ ॥
आग्नेयमण्डलान्तररेफाक्रान्तं समन्ततश्चक्रम् ।
विषरुधिराचिताङ्गारैर्नै[8]लकेन प्रेतवस्त्रे तुं[9] ॥ १०३ ॥
आलिख्य सिक्थकाकृति मध्ये पं[10]त्रे निधाय शस्त्रेण ।
तं वेधयेत् सुमर्मणि सोऽपि रिपुः स्तम्भितः सद्यः ॥ १०४ ॥

---

१. 'पूरक', २. 'पू' क. पाठः. ३. 'ष्ट्यम् ।' ख. ग. पाठः. ४. 'न्ध' ग. पाठः. ५. 'पा', ६. 'न्त्रा', ७. 'स्त्रं' ख. पाठः. ८. 'र्जे' क., 'र्नेलरुधिरप्रे' ग. पाठः. ९. 'ण' ख. ग. पाठः. १०. 'शस्त्रे नि' क. ग. पाठः.

ओं कर्णमोटे लङ्के क्रूर[1]रूपे! दंष्ट्रे हूं[2] हुंफट् । ग्रस
[3]ग्रस कृ कृ छृ छृ भृ भृ हुंफण्णमः । कर्णमोटीमन्त्रमिदम् ।

अथ वक्ष्येऽन्यं मन्त्रं परसेनास्तम्भनं महारौद्रम् ।
तद्दर्शनेन रिपवो भवन्ति सर्वे निरुच्छ्वासाः ॥ १०५ ॥

प्रथमं प्रतिमां च लिखेद् वा[4]यांसनगां कपालका[5]त्रिक(री? रा)म् ।
ग्लौङ्कारं नाभिगतं वृश्चिकमुदरे विलिख्य ततः ॥ १०६ ॥

बाह्येऽष्टकोणयुक्तं वज्रायुधलाञ्छितं पुरं शौ[6]क्रम् ।
युक्तं सप्तममुण्डं पिङ्गलमन्त्राष्टमं लेख्यम् ॥ १०७ ॥

जङ्कारमिन्द्रभागे [7]क्रोङ्कारं पावकालये न्यस्त्वा ।
ह्रूं क्ष्रूं[8] क्रों याम्यां च क्रमेण परिदापयेत् कोणे ॥ १०८ ॥

तन्मध्येऽनिलबीजं तदग्रगे पञ्चवक्त्रमुरगेशम् ।
तन्मुख्यनाम हृदये परसैन्यं भक्षयेद् रौद्रम् ॥ १०९ ॥

तद्धृदये च फडग्रे बाह्ये वि[9]द्याक्षरादिरावेष्ट्य ।
प्रेताम्बरे ध्वजे वा समालिखेद् यन्त्रपालेन ॥ ११० ॥

जं[10] जं[11] मारि महामारि! ग्रसे[12] प्रज्वल फट् स्वाहा ।
ओं नमो वज्रधराय सहस्रकोटिपरिवृत[13]देवताय अप्रतिहत-

---

१. 'रे' क. पाठः. २. 'आं भ्रूं फ' ख. पाठः. ३. 'ग्रासः कृच्छ्रहुं' क., 'क क । भ भ हुं' ख. पाठः. ४. 'ख्वी', ५. 'तृ', ६. 'श' ग. पाठः. ७. 'रं वामतः ओङ्कारमिन्द्रभागे क्रोङ्कारं पाव' क. ग. पाठः. ८. 'क्षीं', ९. 'भि', १०. 'जि' ख. पाठः. ११. 'ज' क. ख. पाठः. १२. 'स ज्व' ख. पाठः. १३. 'ताय देवताया अ' क. पाठः.

शासनाय प्रतिचक्रविनाशनाय उग्रतेजसे गरुडेन्द्रासनसंस्थिताय असिमुसलपाशहस्ताय शङ्खचक्रे[2]शरधनुर्धराय गर्जे घुन हुंफट् स्वाहा । ओं नमो वृषभायां[3]प्रतिहतचक्राय महाबलाय महावीर्य[4]पराक्रमाय रक्तालङ्कारस्वरूपाय अप्रतिहतकर्मकालदहनाय स्वाहा ।

अङ्कं न्यस्त्वा विद्यां वामाद्यां च क्रमेण संवेष्ट्य ।
प्रतिमायां[5] क्ष्रींबीजे न्यस्त्वा साध्यं विदर्भकृतम् ॥ १११ ॥
पीतद्रव्येण लिखेत् पूर्वोक्तपटक्रियासमानं च ।
परसैन्यस्तम्भकरं नहि कार्यविचारणं लोके ॥ ११२ ॥
मन्त्रान्तर्गतसाध्यं मन्त्रासनसंस्थितः[6] पुनर्मन्त्रम् ।
षट्[7]कोणमण्डलस्थं लिखेद् ध्वजे काकरक्तेन ॥ ११३ ॥
[8]पिकलेखिन्या बलिभुक्कण्ठे बद्धं नृकेशपाशेन ।
भ्रमयति समस्तदेशं वायसवन्निलमुद्धूतं[9] ॥ ११४ ॥
अचतुष्कमध्यसाध्यं लबीजसंरोधितं वषट्केण ।
चतुरश्रपुरं दिक्षु च बाह्यं शाक्रं पुरं शुद्धम् ॥ ११५ ॥
कोणेषु भैरवाष्टकरूपं तालेन पट्टमा[10]लिख्य ।
धारयति पट्टमेनं सर्वायुधवारणं समरे ॥ ११६ ॥
साध्यमिकारान्तस्थं मायासंवेष्टितं पुनर्बाह्ये ।
[11]क्लींकारेण विवेष्ट्यं त्रि[12]धार्धचन्द्रं चतु[13]श्शृङ्गम् ॥ ११७ ॥

१. 'शरासना' क. ख. पाठः. २. 'क्रघ' ख. पाठः. ३. 'यांतिप्रह' ग. पाठः. ४. 'नाय स्वा' क. पाठः. ५. 'याः क्ष्रीबी' क., 'यां क्ष्रीबी' ग. पाठः. ६. 'तं', ७. 'के' ख. पाठः. ८. 'द्विजले क., 'द्विज' ग. पाठः. ९. 'तः' क. ग. पाठः. १०. 'ले' ग. पाठः. ११. 'ह्रीं' क. पाठः. १२. 'द्वि' ग. पाठः. १३. 'शुक्लद्व' क. पाठः.

[1]अग्रे क्लीङ्कारेण प्रपूरयेत् [2]तेन् समन्ततस्तस्मिन् ।
कूटस्थ[3]देवताद्यां शशिगर्भे योजयेदूर्ध्वम् ॥ ११८ ॥

मोह्राः [4]शोषाः क्रमशः पश्चाद् वौषट्पदेन संयो[5]ज्यम् ।
एतदुरुवीरपट्टं बद्ध्वा युद्धं विशेद् धीरः ॥ ११९ ॥

त्रिस्वरयुतमध्यगतं नाम लिखेन्निधनबीजगर्भा[6]न्ते ।
भवबीजेन विवेष्ट्य त्रिकोणधामाग्निबीजस्थ[7]म् ॥ १२० ॥

स्वाहाकारनियु[8]क्तं मातृकयावेष्टितं क्रमेणैव ।
तद् ध्यायेदात्मानं भैरवमुग्रं महाभीमम् ॥ १२१ ॥

अत्यञ्जनपुञ्जाभं प्रलयाम्बुदनिस्वनं महाघोरम् ।
आरक्तमुक्तकेशं दंष्ट्रास्यं रिपुबलाभिमुखम् ॥ १२२ ॥

एकारमध्यसंस्थितनाम यबीजेन सम्पुटं कुर्यात् ।
बाह्ये षट्कोणपुरं यकारबीजैश्च संवेष्टयम् ॥ १२३ ॥

चतुरश्रपुरं पश्चाद् भूयो भूयः प्रकल्पयेत् तस्मिन् ।
देयाः पीठाधीशाः कोणेषु शितास्त्रसंयुक्ताः ॥ १२४ ॥

श्वभ्राग्रेषु यकारं समालिखेत् पट्टमुत्तमं हैमम् ।
बद्ध्वा ललाटदेशे सङ्ग्रामं यातु वीरेन्द्रः ॥ १२५ ॥

तं दृष्ट्वाहवभूमौ शस्त्रं न्यस्त्वा क्षणेन निर्गच्छेत् ।
अतिशूरो दृढसत्त्वो मन्त्रौषधसंयुतो वापि ॥ १२६ ॥

---

१. 'भागे ह्लींका' क. पाठः. २. 'तं', ३. 'दैवताद्या श' ग. पाठः. ४. 'शे' ख. ग. पाठः. ५. 'ज्य ।' क. ख. पाठः. ६. 'जेशम् । म' ग. पाठः. ७. 'स्थः ॥', ८. 'क्तः' ख. ग. पाठः.

अङ्कारद्वयमध्ये साध्यं हंसाननेषु [1]संयोज्यम् ।
जीवेन वेष्टयित्वा भैरवकूटेन संवे[2]ष्टयम् ॥ १२७ ॥
बाह्ये ठकारवलयं चतुर्दलं नीरजं च कर्णिकया ।
कूटस्थान्तर्दलको[3]ठकारसंवेष्टच(?)[4]शस्त्रेण ॥ १२८ ॥

ओं ह्रीं प्रस्फु[5]रं प्रस्फुर । घो[6]रतररूपे च[7]टं चट प्रच
प्रचट कह कह [8]भ्रम भ्रम भ्रामय भ्राम[9]यं घम घम म
मथ घातय घातय हुंफट् ।

अस्त्रेणानेन ततो [10]रंकारबाह्ये विवेष्टयेत् पश्चात् ।
पिङ्गलशस्त्रं[11] देयं खादकशस्त्रं[12] पुनर्देयम् ॥ १२९ ॥
सन्तापयेन्निरन्तर[13]मन्त्यठकारं तु मातृका[14]वृतम् ।
[15]तद्बाह्येऽपि ठकारं पीठाधीशांस्ततो न्यस्त्वा ॥ १३० ॥
वलयेन [16]समोपेतास्तद्बाह्ये द्वादशे[17] नृयोगिन्यः ।
ह्रीङ्कारं शूलाग्रे फट्कारयुतो नमस्कारः ॥ १३१ ॥
तद्बाह्ये फेलखिलं प्रदापयेत् तत्समन्[18]ततः सम्यक् ।
एतत् परसैन्यहरं स्वसैन्यसंरक्षणं प्रोक्तम् ॥ १३२ ॥

---

१. 'निर्योज्यम् ।' ख. पाठः. २. 'ष्टच ॥' ग. पाठः.
'र' ख. ग. पाठः. ४. 'शा' क. ग. पाठः. ५. 'र । घो' क. पा
६. 'रघोरतनुरूप' ग. पाठः. ७. 'ट क' क., 'टच्छट' ग. पाठः.
'बम बम' ग. पाठः. ९. 'य म' ख. पाठः. १०. 'ठ', ११. '
मन्त्रं दे', १२. 'स्वमन्त्रं पु' ग. पाठः. १३. 'रठङ्कारं', १४. '
क. पाठः. १५. 'पीठाकारं भैरवं पीठा' ग. पाठः. १६. 'ततोपेतान्तद्
क., 'ततोवेदान्तद्बा' ग. पाठः. १७. 'शो' ग. पाठः. १८. 'न्तकं स
न्यस्त्वा । ए' क., 'न्तकं समं सम्य' म. पाठः.

अथ शब्दभङ्गमन्त्रं वक्ष्ये रुद्रेण निर्मितं सारम् ।
तुटिपटहशङ्खमद्दलशब्दं श्रुत्वा प्रभीताः स्युः ॥ १३३ ॥
मन्त्रेण मन्त्रयित्वा तूर्यं[1] कुर्यात् प्रबोधनं सम्यक् ।
मातृके[2]रुकं च पितृवनभस्मविमिश्रं च कपिकच्छुम्
[॥ १३४ ॥
यूथीकन्यामूलं पिष्ट्वा[3] तल्लेपयेद् दृढं तूर्यम् ।
विद्या हि मन्त्रयित्वा स सप्त वारांस्ततः पुरुषः ॥१३५॥
ओं[4] अं हं हलियां[5]हे महे[6]लि विहिञ्जहि[7] साहिणे[8]हि
नशाणेहि खाहि लुब्बहि किलिकिलि काळि हुंफट् स्वाहा ।
एवं कृत्वा पश्चात् सर्वज्ञस्योद्यं स्मरेच्छब्दम् ।
श्वेतापराजिताया मूलं चोन्मत्तपत्ररसम् ॥ १३६ ॥
आत्मनि तिलकं कृत्वा शब्दे[9]नैवाभिकर्णयेत् सम्यक् ।
भवति परचक्रभङ्गः स्वसैन्यविजयोऽपरश्रवणात् ॥ १३७ ॥
अथ शस्त्रभङ्गचक्रं परचक्रस्तम्भनं स्वचक्रहितम् ।
मोटनमखिलास्त्राणामरिविद्रुतमंत्र[10] वक्ष्यामि ॥ १३८ ॥
ओं ह्रीं हूं[11] ह्रः । अस्त्र मोटय मोटय । चूर्णय चूर्णय
सर्वसत्वान् मर्दय मर्दय । हूं हुंफट्[12] स्वाहा ।
मन्त्रं सं[13] सप्तवारं न्यस्त्वा ध्यायेत् परं महारौद्रम् ।
परचक्रस्याभिमुखं भीमं दंष्ट्रोत्कटं देवम् ॥ १३९ ॥

---

१. 'दूरं कु' ख, 'चतुरं कु', २. 'च', ३. 'द' ग. पाठः. ४. 'ओं अं ह', ५. 'यामहे', ६. 'हे वि' ख. पाठः. ७ 'मञ्जहि', ८. 'सो' ग. पाठः. ९. 'ह' क. पाठः. १०. 'मस्त्रमन्त्रं व ११. 'हूं ह्रीं ह्रः' क. पाठः. १२. 'ट् । म' क. ग. पाठः. १३ 'समस्तवा' क. पाठः.

घोरं घोरातिघोरं प्रळयशिखिनिभं वक्रदंष्ट्रास्यमुग्रं
वक्रास्यं वक्रनेत्रं धवळनरशिरःस्रग्धरं शूलहस्तम् ।
दीर्घाङ्गं[1] दीर्घबाहुं भ्रुकुटिपुटमुखं दीर्घकण्ठं त्रिणेत्रं[3]
ध्यायेदात्मानमीशं प्रचुरपरबलं भक्षयन्तं सुदीप्तम्
॥ १४० ॥

एवं ध्यानेन दृढं स्तम्भयति समस्तशत्रुसङ्घातम् ।
मर्दयति शत्रुवर्गं द्रवयति शस्त्रास्त्रसङ्घातम् ॥ १४१ ॥

दानववधाय चक्रं पूर्वं सृष्टं त्रिलोचनेनैव ।
अभिवृद्धिकरं नित्यं स्वसैन्यसंरक्षणं ध्येयम् ॥ १४२ ॥

भूतपिशाचग्रहगणदेवासुरदानवोरगाः सर्वे ।
नश्यन्ति गरुडचक्रस्मरणेनानेन भीताश्च ॥ १४३ ॥

ओं हुं[5] पक्षि क्षिपं[6] जुं महापराक्रम! सर्वसैन्यं भक्षय भक्षय मर्दय मर्दय चूर्णय चूर्णय निद्रापय निद्रापय हुं[7] फट् ख ख भैरवो ज्ञापयति स्वाहा ।

वृश्चिकया मन्त्रितया परचक्रस्तम्भनं भवेत् सद्यः ।
भ्रामितया साधितया रिपवो भयविह्वलाः सर्वे ॥ १४४ ॥

पृथुबलमतिरौद्रं पञ्चवर्णं महान्तं
निहितभुजगदेहा दीर्घघोणं द्विपक्षम् ।

---

१. 'ङ्कं' ख. ग. पाठः. २. 'त' क. पाठः. ३. 'ने' ग. पाठः. ४. 'द्रा' ख. पाठः. ५. 'हूं' ग. पाठः. ६. 'प ज- क्षिप ज्रुं' ख. पाठः. ७. 'हुं ख' क. ग. पाठः.

कपिलनयनमुग्रं चिन्तयेदात्मरूपं
स्वयमपि परसैन्यं भक्षयन्तं खगेशम् ॥ १४५ ॥

इति सङ्ग्रामविजयोदये अष्टादशोऽध्यायः ॥

अथैकोनविं[1]शोऽध्यायः ।

अथ वक्ष्येऽन्यं योगं व्याधिकरं स्फोटदाहशोषकरम् ।
रिपुनामसमायुक्तं कुर्याल्लवणादिभिः क[2]टुकैः[3] ॥ १ ॥

मन्त्रम् ओङ्का[4]रैकसम्पुटं सकलं हि[5]मिहि[6]मन्तं[7] सिमि-
सिमन्तं ख ख हे चामुण्डे! ख ख हुम्फट् स्वाहा ।

मन्त्रेणानेन ततो होमं कुर्याद् दिनत्रयं पुरुषः ।
भङ्गं प्रयाति सद्यः परचक्रं व्याधिभिर्ग्रस्तम् ॥ २ ॥

अथ वक्ष्येऽन्यच्चक्रं त्रैलोक्यविमर्दनं महारौद्रम् ।
पूर्वं रुरोर्वधार्थं नीलग्रीवोद्भवं सारम् ॥ ३ ॥

ओं चामुण्डे! ज्वलितशिखे! कपालमालिने! क्रुद्धे!
हुं खं ख जुं ख ख । कह कह चामुण्डे चामुण्डे ख ख
हुम्फट् स्वाहाँ ।

भूतदिनेऽष्टसहस्रं चामुण्डाधाम्नि तं[11] जपेन्मन्त्रम् ।
सम्पूज्य कालरात्रिं रात्रौ शुद्धोपवासी च ॥ ४ ॥

---

१. 'एकोनविंशोऽध्या', २. 'कुकुटैः ।' ख. पाठः. ३. 'कैः' । ओ' ख. ग. पाठः. ४. 'रेकास' क, 'रे करस' ग. पाठः ५. 'जि', ६. 'छि' क. ग. पाठः. ७. 'न्तं पोटिच्छन्तं सि' ग. पाठः. ८. 'हुं स्वा' क. ग. पाठः. ९. 'खं जुं खः हे चा', १०. 'हा हुंफट् स्वाहा । भू', ११. 'तज्जपे' ग . पाठः.

सप्ततरु[1]स्थितदेव्यः सकालराज्यः समस्तविख्याताः ।
तत्स्थानमृत्तिकासृक्चरुरम्भामातुलुङ्गयुतम् ॥ ५ ॥
पिण्डीतगरं साक्षादधःकुसुममूलसर्वफलमिश्रम् ।
तत्सर्वं संपिष्ट्वा मन्त्रेण समन्त्रयित्वा तु ॥ ६ ॥
आलिख्य तेन नेत्रे वाससि वा सप्तमातृकाशस्त्रात्[2] ।
बद्ध्वा प्रविशेत् समरं सप्तदिनं मन्त्रितो वीरः ॥ ७ ॥
भ्रश्यन्ते सप्तमुखाः स[3]सप्तशस्त्राश्च शस्त्ररूपधराः ।
दृष्ट्वापि रौद्ररूपं शस्त्रं न्यस्त्वा विनिर्यान्ति ॥ ८ ॥
अथ देवताङ्गभूता(ः ?) सद्यो मृत्युप्रदायिका विद्या[4] ।
संसाधिता च[5] सर्व[6] करोति शत्रुक्षयं सद्यः ॥ ९ ॥
सप्ताभिमन्त्र्य वासरमम्भोमध्ये निधापयेत् पुष्[7]ये ।
प्राक् कृष्णचतुर्दश्या[8] मध्या धवला चतुर्दशी यावत्[9] ॥

ओं ह्रीं महेन्द्रकुलिशधारिणि जुङ्का[10]रमन्त्रिणि चूलि[11]
[12]तोहिं चळ [13]विहरि नरच्छुहु पुणुजो विणी चुकुच्चच्छ ।

विभ्रान्तं भग्नगलं करचरणमितस्ततो लिखेत् साध्यम् ।
शवशयनाकारेण प्रेतालयकर्पटे धीमान् ॥ ११ ॥

---

१. 'मरुत्स्थित' क. पाठः. २. 'शास्त्रात्' क., 'शास्तात्' ग. पाठः. ३. 'मस्तश', ४. 'द्याः' क. पाठः. ५. 'त्र' ग. पाठः. ६. 'स्त्रा' ख. पाठः. ७. 'ष्यम् ।' क. ख. पाठः. ८. 'श्यां ध' ख; 'श्यां या ध' ग. पाठः. ९. 'त् । मन्त्रः । ओं' क. पाठः. १०. 'रिणिज्रुन्त्रिणि' क, 'रजन्त्रिणि ग. पाठः. ११. 'ल' क. ग. पाठः. १२. 'क' क. पाठः. १३. 'वहरिहराहिहुवु सुजो विन्नीकुचुच्चछज्ज । विभ्रा' क, 'विंहरीहरएहुपुणुज्ज णीचुकुच्छच्छञ्ज वि' ग. पाठः.

हृद्यन्नाम न्यस्त्वा सूत्रेणावेष्ट्य नीलसूत्रेण ।
तन्मोटयेत् समस्तं विद्योच्चारेण सङ्ग्रामे ॥१२॥
म्रियते सद्यः शत्रुर्भीतो वा स्फोटरोगसंग्रस्तः ।
निश्चेष्टो निर्जीवो भवेन्नरः सप्तरात्रेण ॥ १३ ॥
अथ विभ्रमचक्रमिदं भेकान्तरितं लिखेद् रिपोर्नाम ।
ठान्तरितं तत् कृत्वा भेकास्ये निक्षिपद्[1] यन्त्रम् ॥ १४ ॥
कण्टकविद्धं तन्मुख-
ममृतेन च वेष्टयेत् ततः पश्चात् ।
संवयति काष्ठपाते-[2]
नाक्रम्य पदेन निर्गच्छेत् ॥ १५ ॥
अजै[3]रुधिरमुद्रकेऽस्मिन् क्षिपेत् ततस्तस्य सर्वभवनान्ते ।
भीतो वा ज्वरतप्तो नहि युद्धमुखं रिपुर्याति ॥ १६ ॥
सँ[4]न्तानका(?)न्तर्गतमरिनाम लिखेत् तमालपत्रान्ते[5] ।
आलिख्याङ्गारेण स्नुहिदुग्धविमुद्रकान्तस्थम् ॥ १७ ॥
अभिनवतुषमृद्वह्नौ क्षिपेत् ततस्तत्र सप्तमे ज्वरितः ।
पक्षद्वयेन म्रियते दीर्घायुश्चेद् ध्रुवं देही ॥ १८ ॥
सान्तो मल्यारूढः षष्ठकलावेष्टितस्थितार्धेन्दुः ।
तत् सप्तधा विभेद्यं लिखेत् क्रमात् तालपत्रेण ॥ १९ ॥
तद्बाह्ये रेखाद्वयसंवेष्टितमग्रवज्रसंरुद्धम् ।
बा(ह्य ? ह्ये ऽ)स्त्रमन्त्रवेष्टितमभेद्यकवचं भवेन्नाम ॥ २० ॥

---

१. 'तु' २. 'पते पादेनाक्रम्य नि', ३. 'जखररुधिरमूके-ऽस्मिन्', ४. 'सन्तानका' क. पाठः. ५. 'भ्रे' ख. पाठः.

शिरसि भुजे कण्ठे वा कट्यां वा धारयेच्छिखाग्रे वा ।
धारयति बाणजालं नाराचाद्यस्त्रसङ्घातम् ॥ २१ ॥

ओं सर्वशस्त्र[1]विनाशनाय स्वाहा । सर्वविघ्नाय स्वाहा[2] । शरबाणाय स्वाहा ।

नामयचतुर्थमध्ये सकारपरिवेष्टितं बहिः पश्चात् ।
मृत्युञ्जयसम्पुटितं समावृतं चार्धचन्द्रेण[3] ॥ २२ ॥
भूर्जे कर्पटके वा गोरोचनया लिखेत् परं यन्त्रम् ।
सितसूत्रेण तु वेष्टितमेतल्लिङ्गे मधूच्छिष्टे ॥ २३ ॥
ॡचतुर्थं[4] बिन्दुयुतं कलावृतं जीवबीजसंयुक्तम् ।
बाह्ये सङ्कारयुतं पकारसुस्थं ठकारस्थम् ॥ २४ ।
ऐन्द्रेण तु सम्पुटितं भूर्जे पत्रे लिखेत् परं यन्त्रम् ।
शशिकुङ्कुमरोचनया संवेष्ट्य श्वेतसूत्रेण ॥ २५ ॥
संवेष्ट्य सर्तकेन[5] तु कलशे संस्थाप्य पूर्णतोयेऽस्मिन् ।
सम्पूजयेत् सुगन्धैर्मृत्युहरं पञ्चषण्मासात् ॥ २६ ॥
वेदाद्यो जूङ्कारो जीवो बिन्दुद्वयेन संयुक्त ।
सम्पुटितः स्वं[6](क)नाम्ना स जयेन्मृत्युञ्जयं नित्यम् ॥
[२७ ॥
अथ कृतरक्षः पुरुषो विद्यासन्नद्धविग्रहः पूर्वम् ।
पश्चात् षट्कर्मविधिं ज्ञात्वा कुर्यात् स मन्त्रज्ञः ॥ २८ ॥

---

१. 'र्वास्त्र', २. 'हा । नाम', ३. 'ण ॥ यचतुर्थेन तु वेष्टितमष्टाविंशतिगणक्रमेणैव । वर्षान्तन्तं ध्यायेन्मूर्ध्नि सितं सप्तरात्रेण ॥ मू' ख. पाठः. ४. 'थ', ५. 'क', ६. 'स्वनाम्ना' क. पाठः.

देवासुरयुद्धेऽस्मिन् देवेन विनिर्मिता त्रिशूलभृता ।
प्रत्यङ्गिराश्च विद्या[1] प्रवक्ष्यते तास्त[2]तस्तथ्या[3]ः ॥ २९ ॥

भूतभुजङ्गमराक्षसपिशाचवेतालगुह्यकाः सर्वाः ।
तत्स्मरणान्नहि रिपवो नश्यन्ति ततो विषादीनि ॥ ३० ॥

ओं नम उमापतये । एह्येहि भगवन्! श्रीकण्ठ! विरूपाक्ष! विकृ[4]तनयनाट्टहास! महाभैरव[5]! भागीकरण[6] हृ-(त ? न) हन सर्वपापानि कट कट। दंष्ट्रोत्कटाट्टहास! पिङ्गलनयन! हन हन। दह दह। पच पच। विधूतसर्वशत्रुरक्ष। सर्वभयोपद्रवोपसर्गो[7]भयेभ्यः भो भोः त्रिपुरविध्वंसनकर! भ्रम भ्रामय[8] भ्रामय सर्वाहितानि संमर्द संमर्द विदारय विदारय देहि विरूपाक्ष! सर्प सर्प सत्याहतं कुरु। सर्वकामहितं कारय। हा हा ही ही हू हू हे हे है है हू[9]त दह दह पच[10] पच विधूतसर्वसत्त्व! रक्ष रक्ष सर्वभयेभ्यो यदुल्लङ्घितदशमशकं सरीसृपेभ्यो दुष्टमूषिकविषेभ्ये[11]स्सर सर घूर्णय घूर्णय सर्वहितैषिणो ये मम जुह्वति मन्त्रं तज्जयन्ति[12] ख ख। खादयन्ति वेतालामुपदिशन्ति। हन तां पच तां दह तां शप तां ये ममाहितं चिन्तयन्ति कुर्वन्ति करापयन्त्यत्र मन्यन्ते तत्

---

१. 'द्याः' क. पाठः. २. 'न्त', ३. 'त्स्थ्याम्'। ख. पाठः. ४. 'रूपन', ५. 'वाभा', ६. 'ण एकः सर्वहा त्रिपुरविध्वं' ७. 'य स' क. पाठः. ८. 'धारविधार' ख. पाठः. ९. 'हु', १०. 'कचकच', ११. 'भ्यो रसप' क. पाठः. १२. 'ति मन्त्रं तज्जयति ख' ख. पाठः.

सर्वज्ञ[1]! स्तम्भय स्तम्भय मोहय मोहय द्रावय द्रावय। त्रिशूलपाणिराज्ञापयति। सिध्यन्तु मे मन्त्रपदानीन्द्राय स्वाहा[2]। देवदानवेभ्यः स्वाहा। प्रेतपिशाचपूतनाकटपूतना-किन्नरमहोरगेभ्यः स्वाहा। भूर्भुवः स्वाहा। देवात्तं रक्ष रक्ष। सर्वभयेभ्य[3] उपद्रवेभ्य[4] उपसर्गेभ्यः स्वाहा[5]। द्वितीयां विद्यां मानसीं नाम प्रत्याङ्गिरां प्रवक्ष्यामि। सर्वविषघातिनि कलिकलहविवादप्रशमनि[6] कृते कारापिते कृत्यकर्माणि का-चो[7]द्दर्कू[8]ष्माण्डभूतग्रहापस्मारकटपूतनाधिपतये कादीनां कृ-च्छ्रादीनि हन[9] हन[10] सर[11] सर रुद रुद[12] किञ्जल्क किञ्जल्क त्रिपुरान्तक विचर विचर प्रहर प्रहर ज्वलन तुट तुट प्रचट प्रचट स्वाहा। धुन स्वाहा। कुरु कुरु स्वाहा स्वर स्वाहा। समयेन कृतं येन करापितं करिष्यति अनुमोदी येन नग्नेन मुण्डितेन वा प्रव्रजितेन वा जले[13] वा स्थले[14] वा तुष्[15]यति नि-री[16]क्ष्यते वा तत् सर्वं तस्मिन्नपगच्छतु वृक्षमिन्द्राशनिर्यथा। ब्रह्माणी स्वाहा। वैष्णवी स्वाहा। रुद्राय स्वाहा कार्तिकेयाय स्वाहा[17]। प्रजापतये स्वाहा। विरूपाय स्वाहा। वज्रपाणये

---

१. 'र्वसंज्ञ', २. 'हा। देवदत्तं' क. पाठः. ३, ४. 'भ्योप' क. ख. पाठः. ५. 'हा। भूःस्वाहा भुवःस्वाहा स्वःस्वाहा भूर्भुवःस्वःस्वाहा देवदत्त रक्ष रक्ष सर्वभयेभ्योपद्रवेभ्योपसर्गेभ्यः स्वाहा। द्वि' ६. 'नी' ख. पाठः. ७. 'खो', ८. 'कू' क. पाठः. ९, १०. 'ह' ख. पाठः. ११. 'न रु', १२. 'द स्वाहा। सम', १३, १४. 'लेन वा' क. पाठः. १५. 'सु' ख. पाठः. १६. 'क्षि', १७. 'हा। वज्र' क. पाठः.

स्वाहा[1]। सूर्याय स्वाहा । सोमाय स्वाहा । मरीचये स्वाहा । वसुभ्यः स्वाहा । मातृभ्यः स्वाहा । दितये स्वाहा । अदितये स्वाहा[2]। आदिभ्यः स्वाहा । वनस्पतिभ्यः स्वाहा । भूःस्वाहा । भुवः स्वाहा । (भुवस्वाहा?) स्वः स्वाहा । भूर्भुवः स्वः[3]स्वाहा । मन्त्रे[4] मम स्वाहा । कर्मणा समये स्वाहा । सर्वो[5]पत्प्रशम(ने? नाय) स्वाहा[6] । अरुणाय स्वाहा । सौभाग्यपतये स्वाहा । तद्यथा सर सर च[7]ट चट घट घट प्रचण्डे चण्डिनि रुद्र तुरु[8] तुरु हन हन विदारय विदारय आगच्छ ममार्थं प्रसाधय । सर्वकामान् पूरय । देवदत्तं रक्ष रक्ष[9] । ओं ह्रीं हूं हें हन हन धम धम फट् स्वाहा ॥

सकलविषदर्पराक्षसभूतग्रहशत्रुदुष्टहननी या ।
पथि चोरविघ्नमथनी विज्ञेया मानसी नाम ॥ ३१ ॥

ओं ह्रीं नमः कृष्णवाससे । शतसहस्रसिंहवाहने ! सुसहस्रवदने! महाबले! अपराजिते! प्रत्यङ्गि[10]रसे! सर्वसैन्यपरकर्मविध्वंसिनि! परमन्त्रच्छेदिनि! सर्वभूतदमनि! सर्वदेवि! बन्ध बन्ध सर्वविघ्नान् छिन्द निकृन्त निकृन्त । सर्वदुष्टान् भक्षय भक्षय । ज्वलितजिह्वे! करालवक्त्रे! प्रत्यङ्गिरे! नमोऽस्तु ते स्वाहा ॥

---

१. 'हा । सो', २. 'हा । दिक्पतये स्वाहा । भूःस्वाहा', ३. 'भुवःस्वा', ४ 'न्त्रं', ५. 'र्वत्र प्र' क. पाठः. ६. 'हा । सौ', ७. 'पदपद घ', ८. 'र' ख. पाठः. ९. 'क्ष स्वाहा । ह्रीं हुं हें' क. पाठः. १०. 'रि स' ख. पाठः.

भूर्जे गोरोचनया विद्यां प्रत्यङ्गिरां च संलिख्य ।
लोहै[1]स्त्रिभिरावेष्ट्य स्थिरं स सन्धारयेद् रक्षाम् ॥ ३२ ॥

यशवर्गं तत्रैव न्यस्त्वा विघ्नाधिपं मध्ये ॥ १०४ ॥
संहारैः षष्ठयुतं बिन्दुयुतं बाह्यतष्ठकारं च ।
तद्बाह्ये तद्विद्यां लिखेद् रिपुस्तम्भनाय ततः ॥ १०५ ॥
ब्राह्मी रौद्री कन्या हरिकान्ता सौकरी महेन्द्राणी ।
चामुण्डा सप्तोर्व्यामोषध्यो दिव्यरूपिण्यः ॥ १०६ ॥
पद्माधो लिङ्गाधः कन्याङ्घ्रिकुलालहस्तमृद्विहितम् ।
सूकरगजरदनोद्भवदेव्यालयमृद्युतं पङ्कम् ॥ १०७ ॥
हंसवृषवेशकन्यातारकमहिषेभजम्बुकात्ममलैः ।
संयुक्तं तत्पङ्कं सङ्ग्रामे वज्रकवचं च ॥ १०८ ॥

---

१. 'लंदीर्घ' क. पाठः. २. दायापिकारार्घ हत्थमोदण्डपादपदवन्दअहिरि-क्षुनहाणहा संविचुहार्यंपिवैरेवहमुखत्थमुण्डकरहिमहावैस्खवर आयुधं' क., 'मुभेभने दायाविकाराद्वंसहत्थमोदण्डपापवदपन्दयहरिलिक्षुघोणाहसं विचयाहं विवारिमोहमुखत्थ' ग. पाठः. ३. 'कारकुलवत्सगाण्डिशिखाबन्ध अस्त्रशत-भञ्जन ।' क., 'कारकुलदूघ'गाण्डिशिखास्वाहाशिखबन्धन' ग. पाठः. ४. 'य' ग. पाठः. ५. 'ललाटप' ख. पाठः. ६. 'रपृष्ठयु' क., 'रपुष्ययु' ख. पाठः. ७. 'मौ' क. ख. ग. पाठः ८. 'भे' ख. पाठः. ९. 'केखराम' ख., 'कखराम' ग. पाठः.

सितशरपुङ्खीमूलं शिरसि सदा धारयेन्मुखे गौरीम् ।
कंठ्यां च सालपर्णीं भुजशिखरे भूतकेशीं च ॥ १०९ ॥

भूशर्करायाः शिफकल्कमिश्रं
गोदुग्धपिष्टं पिबतु प्रगाढम् ।
यावन्न जीर्णं जठरेऽपि ताव-
न्निवारयत्यायुधवृन्दमुग्रम् ॥ ११० ॥

पुष्यार्कयोगे सितविष्णुक्रान्त्या
मूलं गृहीत्वा पयसाम्बुपिष्टम् ।
यस्त्वेत् समालोड्य पिबेज्जयार्थी
न शस्त्रभेद्यः स तु वज्रकायः ॥ १११ ॥

विबुधपतिलताग्रमूलमेतत्
पिबतु नरः पयसाम्बुपिष्टमिष्टम् ।
शिरसि भुजगलेऽथवानुबद्धं
नहि समरेऽपि भिनत्ति शस्त्रजालम् ॥ ११२॥

सितजलजमृणालकल्कमिश्रं
समरजयाय पयः पिबेज्जयार्थी ।
यदि जठरगतं हि तन्न जीर्णं
नहि समरे सकलास्त्रशस्त्रभेद्यः॥ ११३ ॥

इति सङ्ग्रामविजयोदये एकविंशोऽध्यायः ॥

अथ द्वाविंशोऽध्यायः ।

धारालिप्तकमुग्रं सद्यः कृमिसम्भवं तु शस्त्राणाम् ।
व्रणदाहभीतिकरणं प्राणहरं तत् प्रवक्ष्यामि ॥ १ ॥

आनीलमक्षिकाङ्गं क्षुरिकाधारां प्रलिप्य संहारात् ।
सद्यः कृमिसङ्घातो व्रणेषु संजायते तीव्रम् ॥ २ ॥

षड्बिन्दुः खर्जूरः कीटो रक्तः सहस्रपर्यटनैः ।
माक्षीकयानचूर्णैर्मृत्युकरः शस्त्रलेपोऽयम् ॥ ३ ॥

नीलीरसगुञ्जाफलमर्कटविषमूषिकाङ्गषड्बिन्दुः ।
भल्लाततैलयुक्तः प्रलापसन्नाहभीतिकरः ॥ ४ ॥

कृष्णभुजङ्गमरक्तं शृङ्गीकृकलासवल्गुलीचूर्णम् ।
भल्लाततैलयुक्तं लेपोऽयं कालरूपः स्यात् ॥ ५ ॥

मण्डलिकागृहगोधागुञ्जाचूर्णं विभावितं गाढम् ।
आरुष्करतैलेन स्फोटकरः शस्त्रलेपोऽयम् ॥ ६ ॥

कपिकच्छुरोमचित्रककरञ्जगुञ्जाविषं च भावितकम् ।
स्नुहिभल्लातकतैलं सद्यःक्षतकीटजालकरम् ॥ ७ ॥

कृष्णाहिरक्तं वृषवृश्चिकाङ्गं यद्वाहिमालीवदनं शिलीन्द्रम् ।
षड्बिन्दुभेकार्जुनकीटचूर्णं तन्निम्बतैलेन तु मृत्युरूपम् ॥

१. 'मा' ग. पाठः. २. 'हन्यात्', ३. 'त्रः ।', ४. 'टे', ५. 'नम् ।', ६. 'क', ७. 'फल्गुनीचू' क. पाठः ८. 'वयितुम्' क., 'बवितम् ।' ग. पाठः. ९. 'कालहरः ।' क. पाठः. १०. 'रः' ग. पाठः. ११. 'द्वाहिमा' क., 'द्यमिमा' ख. पाठः. १२. 'के भार्जकर्की' ग. पाठः.

चुच्छुन्दरीकृष्णभुजङ्गरक्तं
सहस्रपादः कुटभेकचूर्णम् ।
स्नुह्यर्ककारस्करलाङ्गलीभि-
र्भल्लाततैलेन विषोपमेयम् ॥ ९ ॥

अथ निर्वर्तनकार्यं खड्गक्षतवे[1]गदोषसंशमनम् ।
तत्प्रक्षालनमेतन्निगद्यते तत्र तत् सम्यक् ॥ १० ॥

आजक्षीरं कुष्ठं ससैन्धवं श्वेतशैलकर्णी च ।
तत्कल्को दातव्यः शमयति दोषं ततः सद्यः ॥ ११ ॥

गिरिकन्या शुकतुण्डो वायसतुण्डेश्वरी त्रिशूद्री च ।
वनलाङ्गलीसमेतं पिष्ट्वा प्रक्षालनं पयसा ॥ १२ ॥

आजक्षीरेण ततो मनुष्यशकृदाथ कुक्कुटाण्डेन ।
प्रक्षालयेत् क्षतानि च सद्यस्तद्दोषशमनाय ॥ १३ ॥

अथ कथयामि तदूर्ध्वं शस्त्रास्त्रव्यस्त्रपायनं विदितम् ।
आदित्याङ्गारकयोरखिलायुधपायें[2]नं शस्त्रं[3]म् ॥ १४ ॥

शैलेन्द्रविन्ध्यसह्यश्रीशैलमहेन्द्रनीलशैलेभ्यः ।
सञ्जातमयः श्रेष्ठं[4] किष्किन्धास्ताद्रिजातं[5] च ॥ १५ ॥

खरकरभतुरगवारण[6]निजजलकुलिशार्क[7]दुग्धपरिषिक्तम् ।
आयुधमशनिसमानं छिनत्ति तत् सर्वलोहानि ॥ १६ ॥

सैन्धवनिर्गुण्डीरसकुलिशाजाव्यर्कदुग्धपरिषिक्तम् ।
तत्ताडनेन सद्यः परकरनिहितास्त्रभङ्गकरम् ॥ १७ ॥

---

१. 'दोषवेगसं' क. पाठः. २. 'ल' ग. पाठः, ३. 'स्त्रु' पाठः. ४. 'ष्ठः' क. ग. पाठः. ५. 'तश्च' ग. पाठः. ६. 'ह', 'ल' क. पाठः. ७. 'र्कः' क. ग. पाठः.

सैन्धवसितसिद्धा[1]र्थककपित्थमृगवाजिमूत्रसंक्लिन्नम् ।
तं लिप्त्वाथ मुहुर्मुहुरर्कौ शस्त्रं भिदेद् गाढम् ॥ १८ ॥

पश्चाद् रम्भाक्षा[2]रे परिषिक्तं तद् भवेन्महातीक्ष्णम् ।
कृकलासं च गृहीत्वा विष[3]दूषितकन्यकाश्मशाने तु ॥

तद्भस्म तदङ्गारं विद्युत्प्रहतेन्धनं ग्रहणे ।
हुतभुग्भस्माङ्गारं पाषाण[4]विमथ्यतश्च (?) संयुक्तम् ।
आदाय पूतिकीटं त[5]तोऽर्कतूलेन संयुक्तम् ॥ २० ॥

चुच्छुन्दरीसमेतं कान्तापुष्पस्य तद्र[6]जोयुक्तम् ।
तल्लिखित[7]मस्त्रमुग्रं वज्रोपममस्त्रभङ्गकरम् ॥ २१ ॥

कादम्बरीशिरःस्था सर्वायुधवारणी सदा समरे ।
विटिरतिवीर्यसमेता शस्त्रास्त्रस्तम्भनी ज्ञेया ॥ २२ ॥

[8]कुन्ददमनी च मुसली सुसालपर्णी च घर्घरीमूलम् ।
एतद्भक्षितदेही न च वध्यः शस्त्रजालैश्च ॥ २३ ॥

निष्पावमूलमेतत् [9]त्रिवार्षमूलेन तालसंयुक्तम् ।
उद्वर्तयेच्छरीरं भवति ततो वज्रदेहोऽयम् ॥ २४ ॥

---

१. 'र्थे मृगविष्ठमृगवा' ग. पाठः. २. 'रं', ३. 'भूद्धत', ४. 'वीथ्य', ५. 'तः सटाले', ६. 'जोपेतम्' क. पाठः. ७. 'कषा-नचक्रपातनम् इति सङ्ग्रामविजयोदये सप्तविंशोऽध्यायः' ख. पाठः. ८. 'क' क. पाठः. ९. 'त्रिवृषम्' ग. पाठः.

रास्ना जीवच्छीदी चक्राङ्गी भीमशृङ्खलातिबला ।
पक्वं तदारनाले तस्मिन् भाण्डे तु संयोज्य ॥ २५ ॥

नीवारकोद्रवोद्भवमणिञ्चकैस्तण्डुलैः शुभैः शुद्धैः ।
पक्वं तदारनालैश्चक्राङ्काद्यन्वितं सम्यक् ॥ २६ ॥

यावज्जीर्यति देहे तावच्छस्त्रैर्न भिद्यते समरे ।
भूमिकदम्बस्य शिफं जयाय तद्धारयेच्छिरसा ॥ २७ ॥

पु(ष्पे ? ष्ये)सितनादे(वी ? यी)कान्ताशरपुङ्खहिंस्ररविमूलम् ।
कृष्णे हि तद् गृहीतं शरवारणमास्यसंस्थं च ॥ २८ ॥

सितशरपुङ्खीयुक्तं जम्बूफलभक्षितार्द्रकूर्मशकृत् ।
तच्छरवारण(यु ? मु)क्तं शिरसि गतं वाथ वक्त्रगतम् ॥

कृत्वास्त्रयोगं भवने स्वकीये
सम्पूज्य देवं शिवमिन्दुमौलिम् ।
तां गीतसारां क्षुरिकां मनोज्ञां
स कारयेदात्महिताभिकाङ्क्षी ॥ ३० ॥

प्रथमोद्भवशिशुरदना रात्रौ दत्त्वा बलिं च गन्धाद्यैः ।
मन्त्रितया साधितया समुद्धरेत् क्षुरिकया ग्रीवाम् ॥ ३१ ॥

भृङ्गकनकापराजितहनुकजटा रोचना त्रिशूली च ।
द्विकजातिर्द्विकमाली कन्धारी कृत+हारी च ॥ ३२ ॥

एतत् सर्वं सुदिने प्रोद्धृत्य दृढं त्रिलोहसंवेष्टयेम् ।
धारयतु वक्त्रमध्ये गुलिकां सर्वार्थदां लोके ॥ ३३ ॥

राहुशनैश्चरचन्द्रस्थानौषधमन्त्रवर्जितं करणम् ।
कालोदयनिर्मुक्तं प्रवक्ष्यते शत्रुविजयाय ॥ ३४ ॥

आद्यं वज्रीकरणं पश्चात् क्षुरिका ततश्च सम्पुटकम् ।
तस्योर्ध्वं सङ्कोचैस्तदन्तिमं घण्टिकाग्रं च ॥ ३५ ॥

अनामिकाया यवमध्यसंस्थं
सतुम्बुरूर्ध्वे तु सदा क्रमे स्थितम् ।
तत्तुम्बुरुं तेन तदङ्गुलेन
ततश्च वज्रीकरणं निपीडितम् ॥ ३६ ॥

वामचरणेन गाढं तर्जन्या तुम्बुरुं च भूमिगतम् ।
एतत् क्षुरिकाकरणं सङ्ग्रामे धारयेन्नित्यम् ॥ ३७ ॥

पूरकमुदरे पूर्णं प्रपूरयेत् कुम्भकं च सम्पुटकम् ।
गाढमधः सङ्कोचं सङ्कोचैः पुङ्गलेनैव ॥ ३८ ॥

रसनां स्वघण्टिकाग्रे लग्नां कृत्वा नवात्मसञ्चारम् ।
एवं तद् धारयतु व्यास्तालैनैव साधयति ॥ ३९ ॥

वर्गान्तस्थितवर्णास्ते पञ्च व्योमनामसम्भूताः ।
यदि वक्त्रमध्यसुस्थाः सर्वायुधवारणाः समरे ॥ ४० ॥

---

१. 'ष्टच ।' क. ग. पाठः. २. 'कां', ३. 'चं तद' ग. पाठः. ४. 'न' क. पाठः. ५. 'तदा क्रमेण ।' ग. पाठः. ६. 'पूरकं', ७. 'चमद्गुले' क. पाठः.

ललनारसनायोगे गन्धव्योम्नि स्वचित्तिमाक्षिप्य ।
यावन्न वदेद् देही तावच्छस्त्रैर्न भिद्येत ॥ ४१ ॥

तालुविलग्ना रसना दृढा रसव्योम्नि यावदस्खेलिता ।
तावद् वा(री?रु)णमस्त्रं न भिनत्ति सदाहवे मुक्तम् ॥ ४२ ॥

दशनोर्ध्वमांससन्धौ रसनां तेजोम्बरे निधाय घनम् ।
तिष्ठेदाग्नेयास्त्रस्तम्भाय नरः स्वयं मौनी ॥ ४३ ॥

ताल्वग्रसन्धिमूर्धस्पर्शे व्योम्न्यस्त्रवारणं नित्यम् ।
रसनानुबन्धयोगाद् वायव्यस्तम्भकृन्नित्यम् ॥ ४४ ॥

सर्वे व्योमं (?) त्यक्त्वा निधाय जिह्वां निरालयस्थाने ।
आपूर्य वक्त्रमीषद् गाढं कृत्वोष्ठसम्पुटकम् ॥ ४५ ॥

पञ्चव्योम प्रोक्तं सर्वायुधवारणं तदात्मगतम् ।
यावन्नहि तन्मुञ्चेत् तावद् वज्रोपमो देहः ॥ ४६ ॥

मुद्गरमुसुण्ठिपट्टिशमुसलगदादण्डवज्रलकुटाद्यम् ।
यन्त्रार्पितपाषाणं सनिष्ठुरं पार्थिवं शस्त्रम् ॥ ४७ ॥

ककचकुठारक्षुरिकाशुभङ्करीचक्रवर्त्तिकाद्यानि ।
तिर्यग्धाराद्यानि ज्ञेयानि च वारुणास्त्राणि ॥ ४८ ॥

कुन्तझषशक्तिवेलं त्रिशूलकम्पनकसङ्ख्यमाग्नेयम् ।
कार्मुकमुक्तास्त्राणि तु वायव्यानीह जातानि ॥ ४९ ॥

ध्वजपत्रभिण्डिपालं पाशाद्यं मोहनास्त्रभेदं च ।
तत्सर्वमस्त्रमुग्रं करणं तत् स्तम्भयेन्नित्यम् ॥ ५० ॥

ऊर्ध्वाधस्थं देहतां मुद्गलस्य
त्यक्त्वाचारं कृत्रिमाकाशसंस्थम् ।
जित्वा द्वन्द्वं वा धनुत्वात्(?)प्रयत्नात्
तिष्ठेद् यश्चेत् तस्य नोग्रास्त्रघातः ॥ ५१ ॥

सकलविदितमन्त्रशास्त्रयोग-
प्रभवनयानयसिद्धिरासनानाम् ।
गुरुमुखवचनादुपायबह्वी
नहि पठनान्न हठान्महौषधानाम् ॥ ५२ ॥

इति सङ्ग्रामविजयोदये *द्वाविंशोऽध्यायः ॥

अथ त्रयोविंशोऽध्यायः ।

अथ धूपदीपभक्षणभोज्यालेपात्मरक्षणं वक्ष्ये ।
राज्ञां शत्रुजयार्थं सम्मोहाच्छास्त्रतः सारम् ॥ १ ॥

हरितभुजङ्गमचूर्णं विषमूषिकया सहेमपञ्चाङ्गम् ।
भृङ्गरसेन तु भाव्यो धूपोऽयं सुसिद्धः प्रोक्तः ॥ २ ॥

सप्तरिपुरक्तदिग्धं पञ्चाङ्गं शातकुम्भसञ्जातम् ।
ह्यष्टोङ्गरससमेतं हैमैर्धूपात् स सम्मोहः ॥ ३ ॥

---

१. 'त्वा' ग. पाठः. २. 'तरपूगल', ३. 'कारं चित्रिमा' क. पाठः. ४. 'भेदप' क., 'देहमहीप' ग. पाठः. ५. 'द्वा', ६. 'हो' क. पाठः.

* ख. मातृकायाम् इह 'षड्विंशोऽध्याय' इति लिखितम् ।

चामीकरकारस्करकुडुम्बपारावताक्षिबीजाद्या (:?) ।
केङ्कुरसेनैव दृढं मोहनवन्ती श्वदुग्धयुता ॥ ४ ॥

वन्दाकरेणुरचितो दीपोऽयं चित्रवैरिणो भवने ।
रात्रौ कुरुतेऽन्धत्वं कारस्करतैलसंयुक्तम् ॥ ५ ॥

सखिवद् भ्रातृस्वामी स्नेहलतां शत्रुबीजसारेण ।
दद्याद् भक्ष्यं भोज्यं सम्मोहार्थं नरस्त्रीणाम् ॥ ६ ॥

निर्यासं शल्मल्याः शिरीषधुर्धूरबीजसंयुक्तम् ।
दद्यादाहाराद्यैर्द्विषतां स्यान्न प्रसं(ज्ञं ? ज्ञा) च ॥ ७ ॥

रक्तालाङ्गूलाङ्गं शववृषणं मर्कटकलांसलाङ्गूलम् ।
पीतस्योदरलम्बं नरतैलं भ्रमरदीपः स्यात् ॥ ८ ॥

गेरिकच्छपतैलप्रतिषेधः ।

बाढोदररक्ताङ्गं शरभोदरसृङ्मृतस्य संयावैः ।
कृकलाससर्परक्तं सूत्रं तद् भावयेद् बहुशः ॥ ९ ॥

कृष्णसमघोषजिह्वाषड्बिन्दुसहस्रपादधूलियुतम् ।
नरतैलेन विमिश्रं तन्तुं तं लङ्घयेद् भ्रमति ॥ १० ॥

नरपिशितं जनभोक्त्री श्यामा धारी गुदांत् प्रविष्टां च ।
भूतदिने पुष्यदिने चूर्णं कृत्वा विधानेन ॥ ११ ॥

---

१. 'सुमपा' ग. पाठः. २. 'कुङ्कुमर' क. पाठः. ३. 'दं संमो'
'यश्चित्र' ग. पाठः. ५. 'का', ६. 'वा' क. पाठः. ७. 'सः
पाठः. ८. 'विषनाख्यां न प्र' क. पाठः. ९. 'विलला' ग. पाठः
'रा' ख. पाठः. ११. 'वाकस्यो' ख., 'पाङ्कस्यो' ग. पाठः.
'कडोद' ग. पाठः. १३. 'तु' क. पाठः. १४. 'तल्लङ्घ' क. ग.
पाठः. १५. 'दां प्र' ख. पाठः.

नेत्रेऽञ्जयेन्निशीथे शलाकया पुष्यजनितलोहस्य।
अन्तर्धानं साक्षादिन्द्राणीमन्त्रयोगेन ॥ १२ ॥
माहिषनवनीतभु(जे ? जो) गुदपतितं कृष्णवायसस्यैव।
कज्जलमक्षिनियोगादन्तर्धानं सितार्केण ॥ १३ ॥
अथ वक्ष्यामि समासात् परनृपसेनाविनाशमैशानात्।
जपहोमकालरहितं त्रिकालवार्ताप्रबोधं च ॥ १४ ॥

ओं नमो भगवति! गुहावासिनि! शङ्करदयिते! कथय कथापय चक्षुरुपमृश्य स्वाहा। मूलमन्त्रोऽयम्।

ओं नमः कात्यायनीये यन्नाम किञ्चिच्छुभाशुभमात्मार्थे वा ममाख्याहि तत्त्वतः।

जयं वा कस्य पश्यामि भयं वा कस्य चेदृशम्।
आत्मक्षेमंपरक्षेमविद्यासिद्धिश्च कीदृशी ॥ १५ ॥
सर्वमेतद् यथातथ्यं कथयस्व महाव्रते!।

स्वाहा ॥

ओं धनुर्भुजे महिषधारिणी स्वाहा। महासेना पूर्वतः। ओं नमश्चण्डकात्यायनि त्रिलोचनि प्रविश्य विमलधारिणी स्वाहा। आदर्शप्रसेना दक्षिणतः। ओं नमः मरविदारिणी महाकाळे स्वाहा। खड्गप्रसेना पश्चिमतः। ओं भद्रकाळि हिमगिरिवासिनि स्वाहा। जलप्रसेना उत्तरतः। ओं विन्ध्ये-

१. 'त्रा', २. 'धानमै' ख. ग. पाठः. ३. 'स' क. पाठः. ४. 'क्षुरापमृग्या स्वा' क., 'क्षूरूपदृश्य स्वा' ख. पाठः. ५. 'काश्चिच्छुभ', ६. 'मवि', ७. 'क्र' ग. पाठः. ८. 'कि' क. पाठः. ९. 'र्शसे' ग. पाठः. १०. 'ओममर' ख. पाठः. ११. 'रिनिवासिने स्वा' क., 'रिनिबासिने' ग. पाठः. १२. 'न्ध्यनिवा' क. पाठः.

वासिनि कपिलशिखे धनुर्मुजे अवतर भगवति स्वाहा। अङ्गुष्ठप्रसेना आग्नेय्याम्। ओं त्रिपुरदहनि महागौरि स्वाहा। उरमस्तकमहि[1]षभाजनं च अभिमन्त्र्य स्वा[2]पयेत्। शुभाशुभं लिखितं दर्शयति । महागौरी नै[3]र्ऋत्याम् । ओं भद्रकालि महिषासुरमथि[4]नि स्वाहा[5]। रात्रावुपोषिता दारिका शृण्वन्ति शुभाशुभम्। भद्रकाली वायव्याम्। उच्छिष्टाशिखे चतुर्वक्त्रे विमले[6]चारिणि स्वाहा। तिलतण्डुलकालं भज्यमानाँ[7] दारिका शुभाशुभं पश्य[8]ति। अ अ। ओं उष्ट्रवक्त्रमैशान्याम्।

एवञ्च गन्धपुष्पसबलिधूपैर्महिषमर्दिनीं दुर्गाम्।
सम्पूज्य दशसहस्रं जपेदुमाधाम्नि तत्सिद्धिः ॥ १६ ॥

ओं नमो मारी[9] वीरसुखी पापाँ[10]यसैमेदाहे । अङ्गुष्ठप्रलेपना पराशी[11]कामन्त्रः।

ओन्नमः शरवणों[12] महाशरवणा सिद्धवीर्याणामेहि एहि चोरं बन्धय गृह्णातु तुह्य महाशबराय स्वाहा ।

अग्निहोत्रभस्मनाघोरं सम्पूज्य तन्मध्ये विषसार्थकान् निक्षिप्य अष्टशताभिमन्त्रितं कृत्वा आवेशयति। शुभाशुभं कथयति।

---

१. 'षाज', २. 'स्था' क. पाठः. ३. 'रीति नै' क. ग. पाठः. [४.] 'थं', ५. 'हा। तिलतण्डुलकालं भज्यमानां दारिका शृण्वति [शुभा]शुभं पश्यति। उच्छुष्मवक्त्रमैशा' ख. पाठः. ६. 'ले चरणे', ७. क. पाठः. ८. 'ति। ओम् उच्छुष्मव' ग. पाठः. ९. 'रीविमारी [१०.] 'वंय स इमे', ११. 'शीरवाम' क. पाठः. १२. [illegible] णां महाशरवणामे' ग. पाठः.

ओं नमो भगवते रुद्राय[1] ग्रस ग्रस । आवर्तय आवर्तय । चल चल । विचल विचल । चोरं गृह्ण गृह्ण । रुद्रो ज्ञापयति स्वाहा ।

कटोरकमन्त्रोऽयं सहस्रजपेन सिध्यति ।

ओं शराय महाशराय सिद्ध एहि एहि । प्रसर प्रसर । आवेशय आवेशय । चोरं गृह्णापय स्वाहा । भस्मना शरावं पूरयित्वा अष्टशताभिमन्त्रितं कृत्वा त्रिकालमधिवासयेत् ।

ओं अग्ने । अग्नेभ्यो उच्छिष्टे नमः ।

अङ्गुष्ठे[2] शताभिमन्त्रितमङ्गुष्ठेनावतरति ।

ओं चण्डे चकुटि चणी[3] । चकोरा[4]मलेन्दुक्रोधम्मोलाहारचम् । कडोरमन्त्रः ।

तण्डुलो भक्ष्यमाणः कडोरकं[5] ताडयेच्छुभाशुभं कथयति ।

ओं नमो भगवति रक्तचामुण्डे रक्तकपाले[6]भ्रमद्तिमिरपटले आघ[7]ट्ट विघट्ट तुरु तुरु वत्तिवेश्म भस्मपात्रमाविश चोरं गृह्ण गृह्ण अचोरं मुञ्च नष्टद्रव्यं दर्शय । ह्रीं चामुण्डायै स्वाहा ।

अयमपि करोटिमन्त्रो दशसहस्रं[8] जपेत् ततः सिद्धार्थो भवति । शुभाशुभं कथयति । ओं चिडिकालिविन्नमः ।

---

१. 'य शर शर प्र' ग. पाठः. २. 'ष्ठं' क. पाठः. ३. 'कञ्ची च' क. ग. पाठः. ४. 'राममिलेदुको घर्मोलाभाचं' क., 'राम........लाभारः बं क' ग. पाठः. ५. 'टोरगं ता ख. पाठः. ६. 'ललभ्र' ग. पाठः. ७. 'कध्य विकध्व तु' ख. ग. पाठः. ८. 'चण्डिका नमः' ख. पाठः.

उपवासी भूतादिने दुर्गास्थाने जपेत् सहस्रं च।
सिध्यति पश्चान्मन्त्रः सोऽवतरेत् खड्गताराग्रे ॥ १७ ॥
अम्भोजेऽष्टदलेऽस्मिन् संस्थाप्य कुमारकन्यकां वाथ।
अभिमन्त्र्य सहस्रेण प्रक्षाल्य शुभाशुभं वदति ॥ १८ ॥

ओन्नमश्चण्डालिकायै विजये स्वाहा।

सहस्रं जपेदङ्गुष्ठे शुभाशुभं कथयति।

ओन्नमश्चण्डालिकायै ह्रिरि ह्रिरि गिरि गिरि स्वाहा।

दीपेऽवतरति शुभाशुभं कथयति। ओन्नमश्चण्डालिकायै गिरि गिरि तुरु तुरु स्वाहा। भाजनेऽवतराति अलक्तपटे वा।

शुभाशुभं कथयति। भाजनप्रसेना। ओं रक्ताङ्गेषु अवतर देवि उच्छिष्टपिशाचिनि स्वाहा।

पूर्वोपचारदेशे सहस्रं जपेदङ्गुष्ठप्रसेनामङ्गुष्ठे वालक्तकेन भक्षयेत्।

दधिभक्तं भुञ्जमानः शुभाशुभं कथयति।

ओन्नमो भगवते रुद्राय विमलस्फटिकवर्णाय ज्वल ज्वल रूपं दर्शय सर्वजेनानुस्मर स्वाहा।

वृषभध्वजस्य भवने दक्षिणधाम्नि स्थितो जपेदयुतम्।
पश्चात् सिध्यति मन्त्रं शुभाशुभोदीपनं स्पष्टम् ॥ १९ ॥
दीपे जलेऽथ खड्गे वह्नौ चन्द्रे दिवाकरेऽङ्गुष्ठे।
आदर्शने प्रसेना कथयेदवतार्य सर्वं तत् ॥ २० ॥

ओन्नमो रक्ते महारक्ते अवतर अवतर भगवति योगेश्वरि स्वाहा। दशसहस्रं जपेन्निशि निराहारो वीरकः कुमारो वा। अङ्गुष्ठे शुभाशुभं कथयति। करवीरपुष्पैरष्टोत्तरशतेन पूजयेत्। तिलतण्डुलैकं भक्ष्यमाणं पश्यति।

ओं पिङ्गलि पशुपति विद्ये स्वाहा। सर्वं दर्शयति।

ओं हुलु हुलु फट् स्वाहा।

मन्त्रेणानेन ततः पताकमषिभाजनं च लेखिन्याम्।
अभिमन्त्र्य कुम्भमध्ये प्रक्षिप्य घटाधिवासेऽस्मिन् ॥ २१ ॥
अष्टशतं शिवभवने तज्जपमानस्य यानि कार्याणि।
सा लिखति सर्वकार्यं पत्रे च शुभाशुभं रात्रौ ॥ २२ ॥

ओन्नमः शबर महाशबर सिद्धविद्येश्वर सिद्धविद्येश्वर प्रसर प्रसर आवाहय आवाहय चल चोरं गृह्ण गृह्ण शीघ्रं तुरु तुरु स्वाहा। कटोरमन्त्रं चोरं दर्शयति। दशसहस्रं जपेत्।

ओं चामुण्डे नडी कुडी भस्मच्छन्ने अर्पल गृह्ण गृह्ण चोरं भगवति। मा विलम्ब तुरु तुरु स्वाहा। भस्म करोटिकामन्त्रं चोरं दर्शयति। दशसहस्राणि जपः।

एताः प्रसेकाः कथिताः समासाद्
भक्तस्य शान्तस्य जितेन्द्रियस्य।

---

१. 'पाकरः कु', २. 'तं पू' ग. पाठः. ३. 'लं भक्ष्यमाणः प' क. ग. पाठः. ४. 'वैत्रद' ख. पाठः. ५. 'पि', ६. 'च्छ' क. पाठः. ७. 'द्धि' क. ग. पाठः. ८ 'ल' ग. पाठः. ९. 'र' ख. ग. पाठः.

सिध्यन्ति देव्यः फलदाश्च सम्यङ्
न नास्तिकस्येश्वरदूषकस्य ॥ २३ ॥

अथ ऊर्ध्वं वक्ष्येऽहं संक्षेपात् स्वप्नदैवमन्त्रोऽयम् ।
सर्वशुभाशुभसूचनमखिलागमसारभूतोऽयम् ॥ २४ ॥

भूतदिने स्वाष्टम्यामुपवासी शुक्लकृष्णयोरुभयोः ।
दर्भप्रस्तरणेऽस्मिन् शुचिर्जपेन्मन्त्रसन्नद्धः ॥ २५ ॥

रात्रौ यावन्मन्त्रं तावन्निद्रासमागमैः पुरुषः ।
सर्वेषां विधिरेष ख्यातः पैशाचिमन्त्राणाम् ॥ २६ ॥

ओन्नमो रुद्राय हुलु हुलु स्वाहा ।

मन्त्रोऽयं स्वप्नपतिं मन्त्रं विद्यात् तथारिमित्रं च ।
स्थानं देशभ्रमणं कथयति सर्वं निशीथे तु ॥ २७ ॥

ओं त्रिजटे लम्बोदराय कडु कडु कथय कथय हुं फट् स्वाहा ।

यच्चिन्तितमभिलषितं भूतं भव्यं भविष्यदैन्यच्च ।
कर्णे कथयति रात्रौ जपमानस्याष्टवारं च ॥ २८ ॥

ओं चामुण्डे श्रवणपिशाचि स्वाहा । उपश्रुतिमन्त्रः ।

चण्डालरजकभवने प्रकीर्य तिलतण्डुलां मौनी च ।
श्रूयाच्चिन्तितकार्यं तद्वचनैः प्रेरितं वाक्यम् ॥ २९ ॥

ओं चन्द्रप्रभाय स्वाहा । ओं पिशाची कश्मली

दिनकरचन्द्रग्रहणे शून्यगृहे तं[1] जपेत् ततो यावत् ।
तावन्मुञ्चति राहुः पिशाचिका तत्र सान्निध्यात्[2] ॥ ३० ॥
त्रैलोक्योदरवार्ता सा कर्णे[3] तस्य निश्चयं वदति ।
षण्मासात् स्वर्ण[4]चयं ददाति जप्तस्य पुरुषस्य ॥ ३१ ॥
ओं ओं भलिन्दाय स्वाहा ।
वृक्षरुहे नद्यम्भः पुनः पुनस्तं ददेत् तदाभिमुखः ।
अष्टोत्तरशतयुक्तं षण्मासाल्लभ्यतेऽत्र निधिः ॥ ३२ ॥
मन्त्रोद्धारं वक्ष्ये देवस्य महेश्वरस्य देवीनाम् ।
अ क च ट त प य श वर्गा(न्) ध्वजादिभिस्तत्र सङ्क-
[ल्प्य ॥ ३३ ॥
गन्धैः पुष्पैर्बहुभिर्धूपैर्दीपैः फलादिभिर्देवम् ।
सम्पूज्य चन्द्रमौलिं समुद्धरेद् वर्णतो मन्त्रम् ॥ ३४ ॥
उद्धृत्याद्यं क्रोधं मूषिकपञ्चान्वितं मृ[5]गादियुतम् ।
ऊर्ध्वे मृगद्वितीयं [6]गजसंस्थं षष्ठसंयुक्तम् ॥ ३५ ॥
बिन्दु[7]ग्रहमूर्धनि [8]तत् तुम्बुरुबीजं रहस्यरूपमिदम् ।
स्मरणात् समस्तकिल्बिषविध्वंसं मोक्षदं नित्यम् ॥ ३६ ॥
अथ वक्ष्यामि समासात् संग्रामे शत्रुसैन्यभङ्गपटम् ।
शुभकरमशुभविनाशं स्वसै[9]न्यपरिरक्षणं दिव्यम् ॥ ३७ ॥
देवासुरसङ्ग्रामे महति महाघोरभीषणे पूर्वम् ।
दानववधाय भुवने तथ्यं त्रिपुरारिणा सृष्टम् ॥ ३८ ॥

---

१. 'तज्जपे' ग. पाठः. २. 'ध्यम्' ख. पाठः. ३. 'र्णे निश्चितं व', ४. 'स्य', ५. 'गजादि', ६. 'ध्व', ७. 'ग्र' ग. पाठः. ८. 'तं तु' ख. पाठः. ९. 'न्यसंर' ग. पाठः.

नक्षत्रे शुभवारे तिथियोगसमन्विते प्रकर्तव्यम् ।
कन्याकरतं[१]जसूत्रैर्वनपललीतूलसञ्जातैः ॥ ३९ ॥
तस्मिन् पटे विशाले तैर्विलिखेदष्टपत्रमम्भोजम् ।
बाह्ये तु षोडशारं सकर्णिकं रक्तमुत्पलं मध्ये ॥ ४० ॥
तन्मध्ये हनुमन्तं चतुर्भुजं भीमभीषणं घोरम् ।
रक्तमुखं पिङ्गाङ्गं खड्गध्वजशैलदण्डधरम् ॥ ४१ ॥
करचरणारुणवर्णं सितोदरं[२] धूम्रवर्णपृष्ठांसम् ।
रक्तं त्रिनेत्रमङ्गं विचित्रबहुवर्णलाङ्गूलम् ॥ ४२ ॥
पूर्वदले मायाख्यां विजयां याम्ये तु पश्चिमे पत्रे ।
अजितामुत्तरपत्रे पराजितामन्त्रसंलिख्यम् ॥ ४३ ॥
ईशाग्निनिर्ऋतिमरुतां स्थानेषु ततः कपिं समालिख्य ।
आरक्तं च सुरक्तं पृथुरक्तं चातिरक्तं च ॥ ४४ ॥
षोडशपत्रेषु पुनः षोडशदेवीगणाल्लिखेत् क्रमशः ।
पूर्वं माहेन्द्र्या[३]ख्यां कालिन्दाख्यां पुलिन्दाख्याम् ॥ ४५ ॥
मन्दाख्यां ताराख्यां बालाक्षीं कामकोटिकां दे[४]वीम् ।
एकारदलविरूढाः[५] पूर्वाद्याः पत्रकाश्ले[६]षाः ॥ ४६ ॥
क्रमशोऽग्निनीलकृष्णौ पृथुनीलं चानलो महानीलः ।
धूसरचलनोऽप्रचलः ख्याताश्चाष्टौ क्रमाद् दलकाः ॥ ४७ ॥
तद्बाह्ये लाङ्गूलं तन्मध्ये शत्रुनाम संलिख्य ।
यक्षाभ्यां बीजाभ्यां समन्वितं स्तम्भनाय ततः ॥ ४८ ॥

१. 'तूकसू' ख. पाठः. २. 'रे' ख., 'रो' ग. पाठः. ३. 'ज्ञा' ख. ग. पाठः. ४. 'मोहिम् ।' ग. पाठः. ५. 'दां' ख. पाठः. ६. [illegible] ग. पाठः.

पुच्छाग्रमहाकालीं चतुर्भुजां विकटलोचनां देवीम् ।
खट्वाङ्गशक्तिहस्तां कपालखड्गान्वितां क्रूरीम् ॥ ४९ ॥

संलिख्य कृष्णवर्णैं रसं पिबन्तीं रणं ग्रसन्तीं च ।
तद्बाह्ये [1] हेळाख्यां सुवेष्टयेत् तार्क्ष्यमन्त्रेण ॥ ५० ॥

ओं वज्रकाय वज्रतुण्ड कपिल पिङ्गल ऊर्ध्वकेश महाबल रक्तकेश तडिज्जिह्व महारौद्र दंष्ट्रोत्कट कह कह । तीव्रकराळि[2] महादृढप्रहारि[3] लङ्केश्वरसेतुबन्धशैलप्रवाहगमन-वेगचर एह्येहि भगवन् महाबलपराक्रम भैरवो ज्ञापयति । एह्येहि महारौद्र दीर्घलाङ्गूल अमुकस्य नाम वेष्टय भञ्ज भञ्ज । ख ख । रे रे । हुंफट् ॥

रूपावतारमन्त्रः सोऽष्टत्रिंशच्छताक्षरः प्रोक्तः ।
परसैन्यस्तम्भकरः स्वसैन्यसंरक्षकः साक्षात् ॥ ५१ ॥

मन्त्रेणानेन ततः सुवेष्ट्य सर्वं पटं समालिख्य ।
अष्टम्यां भूततिथौ पटप्रतिष्ठां प्रकुर्वीत ॥ ५२ ॥

एवं सिद्धपटः स्यान्मन्त्रेणानेन मन्त्रयेत् सम्यक् ।
अष्टोत्तरशतवारं ध्यात्वा सन्दर्शयेत् समरे ॥ ५३ ॥

परसैन्यस्याभिमुखं[7] पराङ्मुखं[8] स्वस्य सैन्यवृन्दस्य ।
ये दृष्ट्वा ते यान्ति प्रळयं भित्वा ततः शीघ्रम् ॥ ५४ ॥

---

१. 'फे', २. 'ळी', ३. 'रीं' ग. पाठः. ४. 'द्। स्वरू', ५. 'पू' ख. पाठः. ६. 'हि दर्श', ७., ८. 'खः' ग. पाठः.

अथ पुनरन्यं वक्ष्ये लोहशिलाकाष्ठमृन्मयं वापि ।
लेख्यं तस्मिन् पटजं हनुमद्रूपं ततः कुर्यात् ॥ ५५ ॥
दीर्घाङ्गं दीर्घमुखं दीर्घाङ्घ्रिचरं च दीर्घलाङ्गूलम् ।
दीर्घनखं दीर्घगळं दीर्घोरस्कन्धरोमचयम् ॥ ५६ ॥
ध्वजवामकरं भीमं दक्षिणहस्ताचलाधिराजधरम् ।
रक्ताम्भोरुहसंस्थं ध्यायेदेवं प्लवङ्गेशम् ॥ ५७ ॥
पङ्कजमिकारनाळं तस्य दलं रक्तवर्णमालिख्य ।
ऍ ऐ ओ तन्मध्ये प्रकल्पयेच्चानुपूर्व्येण ॥ ५८ ॥
शिखिसूर्यचन्द्रवृन्दं तस्मिन् संस्थाप्य मूलमन्त्रेण ।
तन्मूर्तिं विन्यस्य ततः षडङ्गं न्यसेत् तस्य ॥ ५९ ॥
सान्तो यान्तारूढः पवनोपरि संस्थितः सबिन्दुयुतः ।
षष्ठस्वरसंयुक्तः समुद्भूतः प्रथमवर्णोऽयम् ॥ ६० ॥
सान्तो मायायुक्तः शून्यार्पितमस्तको द्वितीयः स्यात् ।
याष्टौ बिन्दुकान्तः सैकादशभस्तृतीयश्च ॥ ६१ ॥
याष्टसृष्टिसमेतः प्रोक्तो वर्णश्चतुर्थमन्त्रस्य ।
तारादिस्वाहान्तो मन्त्रः स्यात् सप्तवर्णोऽयम् ॥ ६२ ॥
संस्तम्भनीं तु पूर्वे याम्यायां मोहनीं च वारुण्याम् ।
संरोधनीमुदीच्यां प्रभञ्जिनीं देवपार्श्वेऽस्मिन् ॥ ६३ ॥
आनलमुरुबीजासनमस्मिन् देवस्य कल्पयेत् सम्यक् ।
य र ल व वर्णास्तासां सप्तगवास्ते स्वनामयुताः ॥ ६४ ॥

गन्धादिभिरभ्यर्च्य च ततो जपेल्लक्षमीश्वरस्थाने ।
हुत्वा ध्यायेद् द्विभुजं रक्ताक्षं दीर्घलाङ्गूलम् ॥ ६५ ॥

यस्मिन् देशे सम्यक् प्रतिष्ठितश्चेत् प्लवङ्गराजोऽयम् ।
तस्मिन् नहि दुर्भिक्षं न व्याधिर्नैव शत्रुभयम् ॥ ६६ ॥

नहि ज्वरास्ते नहि भूतराक्षसा
न सर्पलूता विषकीटकादयः ।
न चान्यचक्रागमनं न च ग्रहा
न चोरबाधा न च चक्रपातनम् ॥ ६७½ ॥

इति सङ्ग्रामविजयोदये त्रयोविंशोऽध्यायः ॥

अथ चतुर्विंशोऽध्यायः ।

अथ सारविधिं वक्ष्ये परसैन्यस्तम्भनाय संक्षेपात् ।
कुर्यान्मण्डलमाद्यं भसितेन द्वाराभिन्नं[1] च ॥ १ ॥

सचतुर्विंशतिवारं भस्मचयः क्षुभ्यते[2] मुहुस्तत्र ।
रासं गायन्तीभ्यां कुमारिकाभ्यां दृढं द्वाभ्याम् ॥ २ ॥

खिरि विखिरि पिञ्जण[3] पविडिलउहु उहवायस आ-
णिहि विलउण विचलि उणलाविउ एवन्तुणे गव ।
एवं कथितो रासो मन्त्रोऽयं रुद्रवक्त्रसम्भूतः ।
स्तम्भयति शत्रुसैन्यं चतुरङ्गबलान्वितं सद्यः ॥ ३ ॥

---

१. 'हीनं च' ग. पाठः. २. 'कुब्यते', ३. 'विणुन्नविण्ठीलउ भपायस आणहित्तुबलनविचलिउणचालिउ एवन्तु सोहहिह । एवं क' ख. पाठः

भवकन्याहिसमेतो द्विकन्यकाहस्तिदन्त हन्ततत: (?) ।
हण्डाकारां लेखां सीमान्ते प्रक्षिपेत् प्राज्ञः ॥ ४ ॥

तल्लेखां परसेना न लङ्घयेत् सा पराङ्मुखी सद्यः ।
भयमोहाकुलचित्ता परस्परं द्वेषतां या(न्ति ? ति) ॥ ५ ॥

ओं कुमारि अवतरावतर हरबाणाग्रवासिनि त्रिपुरुषं-सत्येन भञ्जय भञ्जय । सर्वायुधान् भञ्जय स्वाहा ।

कुलविद्येयं श्रेष्ठा सद्यः फलदा च जप्तमात्रेण ।
पुष्पैर्मधुमांसाद्यैः सम्पूज्य जपेन्नवम्यां तु ॥ ६ ॥

सिध्यति पश्चाद् विद्या समस्तरौद्रास्त्रशस्त्रसङ्घातम् ।
स्तम्भयति तन्निरीक्षणमात्रेण सदा भवेच्छीघ्रम् ॥ ७ ॥

ओम् अतिविपरि सपरि सापरि मोपचरि माविरि अटिमबिमामद्रि ह्रीं नमः स्वाहा ।

आर्द्रकापासोद्भवकन्याकर्तुजातसुसिद्धसूत्रेण ।
अष्टग्रन्थिं कृत्वा कुसुम्भघृतरञ्जितेनैव ॥ ८ ॥

मातृगणान् न्यस्त्वाष्टौ तन्मन्त्रेणाभिमन्त्रयित्वा तु ।
धारयतु वामबाहौ सर्वायुधवारणं समरे ॥ ९ ॥

ओं कलिकुण्डं प्रवक्ष्यामि मट्टाकुण्डं चिन्ति ह्निर्मिय महादेवेन असिकोदण्डे उप्पर्णसशिरोवज्जळम् ॥ ओं यवमुपरि हन्तं ओं ओं डं जदुलिचिन्तिउत्तमहुमंगेभ्रमादहि वज्रं बाहहि हुत्थि ओं घ अङ्गे चं मे गृद्दे गृद्दे। ठरि ठरि ठार धय ईखिवाहरधयन्त्रपरिविमिलिजावतच्छोटविगण्डि हुंफट् स्वाहा। पूर्ववत् ॥

अथ वक्ष्ये सारतरं चामुण्डादेहभेदवदने चं[2]।
चामुण्डाबीजेन तु संवेष्ट्य महेशबीजाख्यम् ॥ १० ॥

ऐन्द्रासनस्थमुग्रं चतुर्लकारं शिरस्यधो मध्ये।
ऊर्ध्वस्थितांश्च पश्चाल्लिखेट्ठकारं ततो बाह्ये ॥ ११ ॥

षोडशदलमम्भोजं मन्त्रालङ्कारभूषितं चक्रम्।
षोडशकलाभियुक्तं लकारयुक्तं जकारं च ॥ १२ ॥

तद्बाह्ये द्वात्रिंशत्पत्राम्भोजं विलिख्य तद्दलगम्।
तत् कादिहकारान्तं लकारगं षष्ठबिन्दुयुतम् ॥ १३ ॥

दन्तान्तं तद्बाह्ये न्यस्त्वा घोरास्त्रमन्त्रवर्णगणैः।
सह युक्तं वक्ष्येऽहं तासां नामानि तन्त्रे[3]ऽस्मिन् ॥ १४ ॥

---

१. 'कूदं प्रवक्खामि मडांकुडं चिन्तिहं निर्मियं मवेवेन असिकोदण्डे उप्पण्णसशिरोहिवज्जळं। ओं कलिं कुंण्डंज्जंमलिचिन्तिउत्तमहुमंगेभमादंहि वज्जवाहहि हत्थि हत्थि। ओंखअं चम्मे चम्मे हद्दे हृद्धे ठरि ठारसयं रकखिवाहरसयन्त्रपरामिविलि जाव तच्छोटन विगाडि हुं फट्', २. 'न', ३. 'म' ग. पाठः.

चण्डा प्रथमा प्रोक्ता घण्टा तदनन्तरं कराली च ।
सुमुखी चतुर्मुखीयं रेवत्या पद्मधी दिव्या ॥ १५ ॥

घोरा सौम्या चान्या विभीषणीयं जया च विजयाख्या ।
विजयन्ती पराजितया महोदरीयं विरूपाक्षी ॥ १६ ॥

शुष्कशिखाखगमाता सहोदरी जातहारिणी चान्या ।
दंष्ट्रापि विशुष्कमुखी पिप्पलिका पुष्पहारी च ॥ १७ ॥

सुमतिः सस्यविहारी विभद्रकाली सुभद्रका भीमा ।
अतिभीमा द्वात्रिंशन्मातृगणास्ताः समाख्याताः ॥ १८ ॥

तद्बाह्ये विन्यस्त्वा कालीं फट्कारभीषणीं रौद्रीम् ।
पुनरपि तद्बाह्येऽस्मिन् विधास्ताः कर्णमोट्यां च ॥ १९ ॥

एकैकं क्रमकथनं कृत्वा सम्यग्यदार्णवेनैव ।
शान्तं रान्तं भान्तं वान्तं चतुरश्रके लिख्य ॥ २० ॥

कोणेषु न्यस्तव्या देव्योऽष्टौ रक्षणाय तत् क्रमशः ।
रक्तायां विकराळा विळम्पटा तत्र बलदाख्या ॥ २१ ॥

यावच्छरिका शक्तिर्वीराचिरिकात्र पिङ्गलाँ प्रोक्ता ।
प्रणवनमस्कारयुता कुलिशाष्टकसंयुताग्रे च ॥ २२ ॥

कालीं फट्काररवां वज्रारूढां भयङ्करीं चैव ।
बालेन लिखेद् यन्त्रं हरिद्रया वात्र गैरिकया ॥ २३ ॥

---

१. 'स' ख. पाठः २. 'शिष्टमु', ३. 'फे', ४. ग. पाठः. ५. 'रक्तवराचीरिकात्र' ख. पाठः. ६. 'रा', ७. ८. 'का: ।' ग. पाठः. ९. 'भ' ख. पाठः.

चामुण्डां तत्र लिखेद् व्यावृतवदनां भुजङ्गैः सहिताम् ।
दंष्ट्रास्यां भीममुखीं पिङ्गाक्षीं रूपगन्धां[2] च ॥ २४ ॥

प्रेतारूढां रौद्रीं नरान्त्रमालाविभूषितोरस्काम् ।
पाशाङ्कुशशूलधरीं डमरुकखेटककपालधरीम् ॥ २५ ॥

खड्गधरीं विकृतरुचामुदरे यन्त्रं लिखेत्[3] तस्याः ।
तत् पूजयेद् बुधेन्द्रः समस्तसिद्धिप्रदं नित्यम् ॥ २६ ॥

गन्धकुसुमासवाद्यैः प्रपूजयेत् सप्तकन्यकास्तत्र ।
ब्राह्मयाद्याश्[5]चण्डयन्त्याः सङ्कल्प्य यथाक्रमेणैव ॥ २७ ॥

पुनरिह भक्ष्यं भोज्यं ताभ्यो दत्त्वा प्रदापयेद्[4] ग्रासम् ।
शमयेच्छत्रुसमूहं राजायुष्मान् भवेत् सद्यः ॥ २८ ॥

ओं अवहु अवहु, मापडि आहोदसँ[7]रमञ्जोब्रापर्ग्रा-
च्छी उञ्छत् णिहे परा इति अजरक्ता पोचाणि शत्रुत्रासणि
आजदवण सञ्वरोसो इणि आहो[9] रुदिरे मासे त्रिळि विळि
आहो[10]ः सौबण्णपके पंच्छुरि आप[11]च्छौरि हौ कुमारि [12]स्कन्धदपा-
गणिहो घुजादाणं दयापणी आजकपणकाञ्जआं इति[13] ।

---

१. 'भ्यां' ख. पाठः. २. 'ण्डां'; ३. 'खे-
त्तस्याः' ग. पाठः. ४. 'न्त' ख. ग. पाठः. ५. 'न्च-
ण्डान्त्याः' ख., 'श्चण्डाख्यान्तं सं' गं. पाठः. ६. 'ब्रापे: ।'
ख. पाठः. ७. 'सउर', ८. 'आ अविआहो उज्जणीयेहेपरा
इति', ९. 'हौ'; १०. 'हो सौ', ११. 'च्छुरि आहौ', १२. 'कन्द-
दयावणीमहाकुजा', १३. 'ति अहो ...: .... रीडिकन्दपसाहणी
आहो वेग्गेतेतेच्छुवरा इडि आहो अवहुह मापडि आहो जप्तैक' ग. पाठः.

जप्त्वैकलक्षमाद्यं सैन्यस्तम्भं तु कारयेत् पश्चात् ।
तद्भसितं सीमान्ते क्षिपेद् रिपुस्तम्भनाय परम् ॥ २९ ॥

मातृगृहेऽन्तिमभवने भसितं सङ्गृह्य कुट्टनं कुर्यात् ।
इन्द्रद्रुममुसलाभ्यामुलूखले तद् भवेत् तत्र ॥ ३० ॥

संलिखिते चतुरश्रे द्वारविहीने सपङ्कजे संस्थे ।
रासं गायन्तीभ्यां कुमारिकाभ्यां सरूपाभ्याम् ॥ ३१ ॥

काला कुरुरचूडापमै उमासोक्ति उपं भणळमे वाय अ उत्ति परिर्णदक्खि आ ऐहि किं विगण हिस्सेग्ग उसो स्वर्ग ओ ॥

रेखाकारं दद्याद् रिपुसीम्नि ततश्च मन्त्रसंयुक्तः ।
रात्रौ पूजां कृत्वा परमेश्वरदेवतानां च ॥ ३२ ॥

नच पटहपत्रमध्ये स लिखेत् साध्यस्य नाम ये मुख्याः ।
तन्मध्ये बीजस्थाः प्रक्षिप्य लिखेत् क्षकारं च ॥ ३३ ॥

तन्मध्ये प्रविदश्यें च पुरं लिखेद् द्वादशारमम्भोजम् ।
वलयं च पुनर्दद्याद् दलेषु कुम्भस्थितं क्रोधम् ॥ ३४ ॥

द्वादशकलाविभेदितमैन्द्रारूढं विसर्गसंयुक्तम् ।
तद्बाह्ये चतुरश्रं वज्राष्टकभूषितं स्पष्टम् ॥ ३५ ॥

कोणेषु ग्लौङ्कारं दिक्षु क्रोधं चकारसंरूढम् ।
बिन्दुयुतं सविसर्गं पीतद्रव्येण संलिख्य ॥ ३६ ॥

---

१. 'गरुचूडावमे उमासोत्ति उवळभण उमपाय अउक्तिपरिण्णख आ', २. 'एकिंविगण एव हिमोग्गु ओं सास्वर्ग ओं । रे' ग. ३. 'स्थां' ख. पाठः. ४. 'कूहस्थि', ५. 'श्लौकारं', ६.

द्विजदण्डी चक्राङ्को कन्या मुसली च मोहिनी शूली ।
अश्वत्थोद्भवनिम्बं सधातकीजातिसंयुक्तम् ॥ ३७ ॥
पितृवनभृङ्गसमेतं त्रिकटुकयुक्तं सुमाषचूर्णयुतम् ।
चणचूर्णसमोपेतं प्रमर्दलं भोजयेद् बाढम् ॥ ३८ ॥

सन्नद्धसैन्यो नृपतिः प्रयायात्
प्रभातकाले द्विरदाधिरूढः ।
कुमारिकाणां नवभिः समेतं
प्रदर्शयेत् तत्पटमाहवेऽस्मिन् ॥ ३९ ॥
पराङ्मुखं स्वस्य बलस्य राजा
तूर्यस्य रावं तुमुलं प्रकुर्यात् ।
यावच्छृणोति द्विषतां च सेना
तावद् बिभेति प्रळयं प्रयाति ॥ ४० ॥

अत ऊर्ध्वं वक्ष्येऽहं प्रागुक्तकपीन्द्रमूलमन्त्रविधिम् ।
जप्त्वैकलक्षमाद्यं होमं पश्चात् प्रकुर्वीत ॥ ४१ ॥

तुषास्थिकेशैर्हलिनीसमन्वितैः
करञ्जसिद्धार्थकनिम्बपत्रकैः ।
प्लवङ्गमन्त्रेण हुताशनालये
परस्य नाम्ना जुहुयात् प्रयत्नतः ॥ ४२ ॥
महाज्वरस्फोटमसूरिकादयो
भयाकुलोपद्रवभेदविग्रहाः ।

१. 'ङ्कं', २. 'वि', ३. 'कावान् तु', ४. 'मेतैः'

भवन्ति यक्षग्रहनागराक्षसाः
प्रपीडनानि द्विषतां दशाहृतः ॥ ४३ ॥

अथान्यमेकं रणपिङ्गकस्य
प्रवच्मि सम्यग् विधिसाधनं च ।
भयप्रदं मृत्युकरं रिपूणां
स्वरक्षकृत् पिञ्जकमुत्तमं स्यात् ॥ ४४ ॥

मालामन्त्रं सूर्यचन्द्रोपरागे
यावद् राहुर्मुञ्चतीन्दुं रविं वा ।
तावन्मौनी[1] तज्जपेत् सोपवासः
शाम्भोर्वा(र्मौ ? र्मो) दक्षिणस्थानसंस्थः ॥ ४५ ॥

सिद्धं[2] साक्षात् पिञ्जकं तत्क्षणेन
यत्तत् सर्वं प्रार्थितं तत् करोति ।
शत्रुव्रातं स्तम्भयेद् युद्धभूमौ
सर्वव्याधिध्वंसकृत् प्रेक्षणेन ॥ ४६ ॥

समदगजविरूढः पिञ्जकं भ्रामयित्वा
लिखितपटमुदारं दर्शयेच्छत्रुसङ्घे ।
भयचकितसमेता विह्वला भ्रान्तचेष्टा
निधनमुपगताः स्युः शत्रुसैन्या[3] रणेषु ॥ ४७ ॥

प्रणिपत्य महादेवं ब्रह्मेन्द्रोपेन्द्रवन्दिताङ्घ्रियुगम् ।
जगदेकहेतुमीशं शशाङ्कमौलिं जयाय नरैः ॥ ४८ ॥

इति सङ्ग्रामविजयोदये[2] कपीन्द्रमन्त्रविधानं नाम
चतुर्विंशोऽध्यायः ॥

*सङ्ग्रामविजयोदयः समाप्तः ॥

शुभं भूयात ॥

---

१. 'हरम्' ग. पाठः २. 'ये अष्टाविंशोऽध्यायः ॥' ख. पाठः.

---

* वाक्यमिदं ग. पाठेन दृश्यते ।

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampuran.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3—नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4—शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭha Dīkṣita (*out of stock*).	2	0	0
No. 5—व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6—दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*).	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

	RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—पञ्चरात्रम् **Pancaratra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*second edition*).	4	0	0
No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*).	[illegible]	[illegible]	0

	RS.	AS.	P.
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	0

	RS.	AS.	P.
No. 33—वाररुचसंग्रहः **Vararucasangraha**. (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhuka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Śankara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*out of stock*).	1	8	0
No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama. (*out of stock*).	0	4	0

	RS.	AS.	P.
No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.**	1	0	0
No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭha Dīkṣita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् **Sidhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)	1	12	0
No. 48—सिद्धान्तसिद्धाञ्जनम् Do. Do. (Part II).	2	0	0
No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara.	0	4	0
No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Singa Bhūpāla.	3	0	0
No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).	2	0	0
No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tikâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).	1	8	0
No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavicara** (Vyâkaraṇa).	0	4	0
No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman. (*out of stock*).	0	8	0
No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*).	0	8	0
No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatî (Part III).	2	0	0

	RS.	AS	P.
No. 59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः **Sarvamatasangraha.** (*out of stock*).	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhâravi with the commentary Sabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidâsa with the commentary Pradīpa of Dakṣiṇâvartanâtha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Sankara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Âgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikâ of Śrī Kumâra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśânaśivagurudevamiśra Part I, Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part I).	2	8	0

	RS.	AS.	P.
No. 71—तन्त्रसमुच्चयः **Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśānaśiva-gurudevamiśra (Part II, Mantrapāda).	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipatti-prakasa** (Vedānta) by Madhusūdana-sarasvatī.	0	4	0
No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrī-kumâra (Part I).	2	12	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part II).	3	0	0
No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Iśānaśiva-gurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhya-sutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās).	3	12	0
No. 80—अर्थशास्त्रम् **Do.** Do. (Part II, 3—7 Adhikaraṇās).	4	0	0
No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśva-rūpācārya (Part II. Prâyaścit-tâdhyâya).	2	0	0
No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopā-dhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0

	RS.	AS.	P.
No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Iśāna-śivagurudevamiśra (Part IV, Kriyāpāda 31-64 Paṭalās and Yogapāda).	3	8	0
No. 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part III).	2	0	0
No 85—विष्णुसंहिता **Visnusamhita** (Tantra).	2	8	0
No. 86—भरतचरितम् **Bharatacarita** (Kâvya) by Kṛṣṇakavi.	1	8	0
No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Sangīta) of Sangītâkara Pârśvadeva.	1	2	0
No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacūdâmaṇi of Bhaṭṭagopâla (Part I, 1-5 Ullâsās).	3	0	0
No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—रसोपनिषत् **Rasopanisat.**	2	0	0
No. 93—वेदान्तपरिभाषा **Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—बृहद्देशी **Brihaddesi** (Sangīta) of Matangamuni.	1	8	0
No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumāragaṇaka.	0	4	0

	RS.	AS.	P.
No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	
No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin.	2	0	
No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumāra. (Part II.)	2	8	
No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsaslokavartika** (Mīmāmsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	
No. 100—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhityacūḍāmaṇi of Bhaṭṭagopāla (Part II, 3–10 Ullāsas).	5	0	
No. 101—आर्यभटीयम् **Aryabhatīya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	
No. 102—दत्तिलम् **Dattila** (Saṅgīta) of Dattilamuni.	0	4	
No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary.	0	8	
No. 104—साम्बपञ्चाशिका **Sambapancasika** (Stuti) with commentary.	1	0	
No. 105—निधिप्रदीपः **Nidhipradipa** of Siddhaśrikaṇṭhaśambhu.	0	4	
No. 106—प्रक्रियासर्वस्वम् **Prakriyasarvasva** (Vyākaraṇa) of Śrī Nārāyaṇa Bhaṭṭa with commentary (Part I.)	1	0	

	RS.	AS.	P.
No. 107—काव्यरत्नम् **Kavyaratna** (Kāvya) of Arhaddāsa	0	12	0
No. 108—बालमार्ताण्डविजयम् **Balamartanda-vijaya** (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—न्यायसारः **Nyayasara** with the commentary of Vāsudevasūri.	1	8	0
No. 110—आर्यभटीयम् **Āryabhaṭīya** (Jyotiṣā) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan.(Part II. Kālakriyāpāda)	1	0	0
No. 111—हृदयप्रियः **Hridayapriya** (Vaidyaka) by Parameśvara,	3	0	0
No. 112—कुचेलोपाख्यानम् अजामिलोपाख्यानं च । **Kucelopakhyana and Ajamilopakhyana** (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Maharaja.	0	4	0
No. 113—सङ्गीतकृतयः **Sangitakrtis** (Gāna) of H. H. Svāti Śrī Rāma Varma Māharaja.	1	0	0
No. 114—साहित्यमीमांसा **Sahityamimamsa** (Alaṅkāra)	1	0	0
No. 115—ऋक्संहिता **Rksamhita** (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya) (Part II 2nd Adhyaya in Ist Aṣṭaka.)	1	8	0
No. 116—वाक्यपदीयम् **Vakyapadiya** (Vyākaraṇa) with the commentary Prakīrṇakaprakāśa by Helaraja son of Bhutiraja. (Part I).	1	8	0
No. 117—सरस्वतीकण्ठाभरणम् **Sarasvatikantabharana** (Vyākarṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha.	1	8	0

	RS.	S.	P.
No. 118—बालरामभरतम् **Balaramabharata** (Nāṭya) by Bālarāma Varma Vanci Maharaja.	2	8	0
No. 119—विवेकमार्तण्डः **Vivekamarthanda** (Vedanta) of Visvarupadeva	0	६	0
No. 120—शौनकीयम् **Saunakiya.**	0	8	0
No. 121—वैखानसागमः **Vaikhanasagama** (Tantra) of Marichi.	2	0	0
No. 122– प्रबोधचन्द्रोदयम् **Prabodhacandrodaya** (Nāṭaka) by Kṛṣṇamiśrayati with the commentary Nāṭakābharaṇa of Śrī Govindāmṛtabhagavān.	2	0	0
No. 123—सङ्ग्रामविजयोदयः **Sangramavijayodaya**(Jyotisha).	2	0	0

Apply to:—

The Superintendent,
Government Press,
Trivandrum.